सम्पूर्णमृषिवाक्यं तु सूक्तमित्यभिधीयते ।
दृश्यन्ते देवता यस्मिन्नेकस्य[1] बहुषु द्वयोः ॥ १३ ॥
देवतार्षार्थछन्दोभ्यो[2] वैविध्यं तस्य जायते[3] ।
ऋषिसूक्तन्तु यावन्ति सूक्तान्येकस्य[4] वै स्तुतिः ॥ १४ ॥
देवतैका तु यावत्सु देवतायास्तदुच्यते[5] ।
यावदर्थसमाप्तिः स्यादर्थसूक्तं वदन्ति तत् ॥ १५ ॥
समानच्छन्दसो यास्तु[6] तच्छन्दःसूक्तमुच्यते ।
वैविध्यमेतत्सूक्तानामिह[7] विद्याद्यथातथम् ॥ १६ ॥
देवतानामधेयानि मन्त्रेषु त्रिविधानि तु ।
सूक्तभाञ्ज्यथ ऋग्भाञ्जि तथा नैपातिकानि तु ॥ १७ ॥
सूक्तभाञ्जि भजन्ते वै सूक्तान्यृग्भाञ्जि वै[8] ऋचः ।
मन्त्रेऽन्यदैवतेऽन्यानि[9] निगद्यन्ते प्रसङ्गतः[10] ॥ १८ ॥

---

(१) चित्रं तद्दृश्यते चास्मिन्नेतस्यामिति क० घ० । एकस्येत्यत्र एकस्मिन्निति घ० ।
(२) देवतार्षार्थच्छन्दस्तः इति ख० ।
(३) वैविध्यञ्च प्रजायते इति ख० ग० ङ० ।
(४) ऋषिसूक्तानि तान्यत्र यावन्त्येकस्येति क० घ० ।
(५) अस्मिन् श्लोकार्द्धस्थले ख० ग० ङ० पुस्तकेषु श्रूयन्ते तानि सर्व्वाणि ऋचे॰ सूक्तं हि तस्य तत् इति पाठो वर्त्तते ।
(६) याः स्युरिति ख० ग० ङ० ।
(७) वैविध्यमेवं सूक्तानामिहेति ख० ग० ङ० ।
(८) वै इत्यत्र येरिति क० ख० घ० ङ० ।
(९) यानि इति घ० ।
(१०) निगद्यन्तेऽत्र कानिचित् इति ख० ग० पुस्तकान्तरस्थ ।

साह्लोक्यात्साहचर्याद्वा तानि नैपातिकानि तु।
तस्माद्बहुप्रकारेऽपि[1] सूक्ते स्यात्सूक्तभागिनी ॥ १९ ॥
देवता तद्यथासूक्तमविशेषं[2] प्रतीयते।
भिन्ने सूक्ते[3] वदेदेव देवतामिह लिङ्गतः ॥ २० ॥
तत्र तत्र यथावच्च मन्त्रान् कर्मसु[4] योजयेत्।
देवतायाः परिज्ञानात्तद्धि कर्म समृध्यते ॥ २१ ॥
आद्यन्तयोस्तु सूक्तानां प्रसङ्गपरिकीर्त्तनात्।
स्तोतृभिर्देवतास्तास्ता उपेक्षेतेह[5] मन्त्रवित् ॥ २२ ॥
तत् खल्वाहुः कतिभ्यस्तु कर्मभ्यो नाम जायते।
सत्त्वानां[6] वैदिकानां च[7] यदन्यदिह[8] किञ्चन ॥ २३ ॥
नवभ्य इति नैरुक्ताः पुराणाः[9] कवयश्च ये।
मधुकः श्वेतकेतुश्च[10] गालवश्चैव मन्यते[11] ॥ २४ ॥
निवासात्कर्मणो रूपान्मङ्गलाद्वाच आशिषः।

---

(१) बहुप्रकारोऽपि इति क० ङ० घ०।
(२) अविशेषेति ख०, चविशेषमिति ग० ङ० पुस्तकान्तरेच।
(३) भिन्नसूक्ते इति क० घ०।
(४) कर्म प्रयोजयेदिति ख०।
(५) देवतानाम्ना उपेक्षेतेह इति ख०। देवतानामामपेक्षेतेह इति क० घ०।
(६) सत्त्वानामिति क०।
(७) वा इति क० ग०।
(८) यद्यान्यदिहेति क० घ०।
(९) पौराणा इति क० घ०।
(१०) मधुकाश्च सकेताश्चेति क० घ०।
(११) मन्यते इति क० ख० घ० ङ०।

यदृच्छयोपवसना[१]त्तथामुष्यायणाच्चपात्[२] ॥ २५ ॥
चतुर्थं इति तत्राऽऽर्यास्तुगार्ग्यरथीतराः[३] ।
आशिषोऽथार्थवैरूप्या[४] द्वाचः कर्मण एव च ॥ २६ ॥
सर्वाण्येतानि नामानि कर्मणस्त्वाह[५] शौनकः ।
आशीरूपञ्च वाक्यञ्च[६] सर्वं भवति कर्मतः ॥ २७ ॥
यदृच्छयोपवसना[७] त्तथामुष्यायणाच्च[८] यत् ।
तथा तदपि कर्मैव तच्छृणुध्वन्तु[९] हेतुतः[१०] ॥ २८ ॥
प्रजाः कर्मसमुत्था[११] हि कर्मतः सत्त्वसङ्गतिः[१२] ।
क्वचित् संज्ञायते[१३] यत्र निवासात्तत्प्रजायते[१४] ॥२९॥
यादृच्छिकं तु नामाभिधीयते[१५] त्विह कुत्रचित्[१६] ।

---

(१) यदृच्छयोपवचनादिति क० ङ० घ० ।
(२) तथा ग्यायणाच्चेति क० घ० ।
(३) रथन्तरा इति ख० ।
(४) आशिषोऽथ च वैरूप्यात् इति क० घ० । आशिषोऽर्थवैरूप्यादिति ख० ङ० ।
(५) कर्मतस्त्वाह इति क० ग० ।
(६) वाक्यञ्च इति ख० ग० ङ० ।
(७) यदृच्छयोपवचनादिति ख० ।
(८) यदृच्छया निवासाच्च यद्वा ग्यायणाच्चेति क० घ० ।
(९) तच्छृणु त्वं च इति ग० ।
(१०) हेतवः इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(११) प्रजाकर्म्मसमुत्था इति क० ख० ।
(१२) कर्म्मणः सत्त्व जायते इति क०, सत्त्वगा गतिः इति ख० ।
(१३) सतो निवसते इति क० घ०, क्वचित् स जायते इति ग० ।
(१४) तत्र जायते इति घ० ।
(१५) नाम नामाधीयते इति ख० । यादृच्छिकं नाम नाम धीयते ख० ङ० ।
(१६) यत्र कुत्रचिदिति ख०, यत्त्विह क्वचिदिति घ० ।

औपम्यादेव[1] तद्विद्याद्[2] भावस्यैवेह कस्यचित् ॥ २० ॥
नाकर्मकोऽस्ति भावो हि न[3] नामास्ति[4] निरर्थकम् ।
नान्यत्र भावान्नामानि तस्मात्सर्वाणि कर्मतः ॥ २१ ॥
मङ्गलात् क्रियते यत्तु नामोपवसनाच्च[5] यत् ।
भवत्येव तु सा ह्याशीः स्वस्त्यादेर्मङ्गलानि च[6] ॥ २२ ॥
अपि कुत्सितनामाय[7]मिह[8] जीवेत्कथञ्चिरम् ।
इति क्रियन्ते नामानि भूतानां विदितान्यपि[9] ॥ २३ ॥
मन्त्रा नानाप्रकाराः स्युर्दृष्टा वै[10] मन्त्रदर्शिभिः ।
स्तुत्या चैव विभूत्या च वाक्प्रभावेण चात्मनः[11] ॥ २४ ॥
स्तुतिः प्रशंसा निन्दा च संशयः परिदेवना[12] ।
स्पृहाशीः कत्थना याञ्चा[13]प्रश्नः प्रैषः प्रवह्लिका[14] ॥ २५ ॥
नियोगश्चानुयोगश्च श्लाघा विलपितञ्च यत् ।

---

(१) औपम्यादपीति ख०, औपम्यादिह इति ग० घ० ङ० ।
(२) तद्वत्ते इति घ० ।
(३) ना इति घ० ।
(४) तस्माच्च निरर्थकमिति ख० ।
(५) यच्च नामोपवचनञ्च इति क० ख० घ० ।
(६) आशास्ते मङ्गलानि च इति क० घ० । मङ्गलादिहेति ख० ङ० ।
(७) अचिकित्सितनामायमिति ख० ।
(८) अपि इति घ० ।
(९) निन्दितान्यपि इति क० घ० ।
(१०) ये इति ग० ङ० पुस्तकान्तरञ्च ।
(११) प्रभावाद्देवतात्मन इति ख० ग० अन्यत्पुस्तकञ्च ।
(१२) परिवेदना इति क० ङ० ।
(१३) कथनायाच्चेति क० ।
(१४) प्रवल्हिका इति ख० ग० ।

आचिख्यासा[1]ऽथ संलापाः परिवाख्यान[2]मेव च ॥ ३६ ॥
आहनस्या नमस्कारः प्रतिरोध[3]स्तथैव च ।
सङ्कल्पश्च प्रलापश्च प्रतिवाक्यश्च नाम यत्[4] ॥ ३७ ॥
प्रतिषेधोपदेशौ च प्रमादापह्नवौ च यत्[5] ।
उपप्रेषश्च यः प्रोक्तः सञ्ज्वरो नाम[6] विस्मयः ॥ ३८ ॥
आक्रोशोऽभिष्टवश्चैवा[7]क्षेपः शापस्तथैव च ।
उपसर्गा निपातश्च[8] नाम चाख्यातमित्यपि[9] ॥ ३९ ॥
भूतं भव्यं भविष्यच्च पुमांस्त्र्यथ[10]नपुंसकम् ।
एवंप्रकृतयो मन्त्राः सर्ववेदेष्विति स्थितिः[11] ॥ ४० ॥
तेषां निदर्शनार्थीया[12] ऋचोऽर्धर्चाः पदानि च ।
ब्राह्मणे चाथ कल्पे च निगद्यन्तेऽत्र कानिचित्[13] ॥ ४१ ॥

---

(१) आविख्यासेति ख॰ ।
(२) सल्लापा परिभाख्यान इति घ॰ ।
(३) प्रतिरोधः इति घ॰ प्रतिषेध इति अन्यत्पुस्तकद्वे ।
(४) तथैव च इति ग॰ अन्यत्पुस्तकद्वे ।
(५) च ह इति ग॰ अन्यत्पुस्तकद्वे ।
(६) यस्य इति ख॰ ग॰ ङ॰ अन्यत्पुस्तकद्वे ।
(७) आक्रोशोऽभिष्टवश्चैव इति ग॰ अन्यत्पुस्तकद्वे, आक्रोशोऽभिष्ठवश्चैव इति ख॰ ।
(८) उपसर्गा निपाताश्चेति क॰ घ॰, उपसर्गा निपातश्चेति ख॰ ।
(९) चाख्यानमेव चेति क॰ ।
(१०) स्त्री च इति ग॰ अन्यत्पुस्तकद्वे ।
(११) सर्ववेदेषु सर्वश इति ख॰ ग॰ ङ॰ अन्यत्पुस्तकद्वे । सर्वदेवेष्विति स्थितिरिति घ॰ ।
(१२) वाक्यार्थदर्शनार्थीया इति ङ॰ अन्यत्पुस्तकद्वे ।
(१३) विधौ कल्पे च देवे च निगद्यन्तेऽत्र कांश्चिदिति क॰ घ॰ ।

शब्देनोच्चरितेनेह येन द्रव्यं प्रतीयते ।
तदाक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः ॥ ४२ ॥
अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभूतयः(१) ।
तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः ॥ ४३ ॥

क्रियासु बह्वीष्वभिसंश्रितो यः
पूर्वापरीभूत इहैक एव ।
क्रियाभिनिर्वृत्तिवशेन सिद्ध
आख्यातशब्देन तमर्थमाहुः ॥ ४४ ॥
क्रियाभिनिर्वृत्तिवशोपजात
कृदन्तशब्दाभिहितो यदा स्यात् ।
संख्याविभक्त्यव्ययलिङ्गयुक्तो
भावस्तदा द्रव्यमिवोपलक्ष्यः(२) ॥ ४५ ॥

यथा नानाविधैः शब्दैरपश्यन्नृषयः पुरा ।
विविधान्यपि(३) वाक्यानि तान्यनुक्रमतः शृणु ॥ ४६ ॥
रूपादिभिः स्तुतिं प्रोक्ताऽथाशीः(४) स्वर्गादिभिस्तथा ।
यानि वाक्यान्यतोऽन्यानि(५) तान्यपि स्युरनेकधा ॥ ४७ ॥

---

(१) विभक्तय इति ग॰ पुस्तकस्थः पाठः ।
(२) शब्देनेत्यादि भावस्तदा द्रव्यमिवोपलक्ष्य इत्यन्तः सन्दर्भः क॰ ख॰ चिह्नितपुस्तकयोर्नोपलभ्यन्ते ।
(३) विविधानीह इति ख॰ ग॰ घ॰ ।
(४) आशीरिति क॰ ख॰ ग॰ ।
(५) यानि इति अन्यपुस्तकस्थः ।

मन्त्रे[१] प्रशंसा[क] भोजस्य[२] चित्रदत्[ख] सौभरेः[३][ग]स्तुतिः।
आक्रोशाशीस्तु दृश्यन्ते[घ]माता चेत्यभिमेथति[४] ॥४८॥
च्छङ्गोघमन्नं[ङ] निन्दा च[५] शापो[च] येमेत्यृगेव तु।
याञ्चा[६] [छ]यदिन्द्रचित्रेति चेमो भीदमिति त्वृचि ॥४९॥
आशीस्तु[ज] वात आवातु दण्डेति परिदेवना[७]।
प्रश्नस्य प्रतिवाक्यञ्च[झ] पृच्छामि त्वेत्यृचौ पृथक् ॥५०॥
संशयोऽधःस्विदासीच्च[ञ] कत्थना[८] स्या[ट]दहं मनुः।
इमं नो[ठ] यज्ञमित्यस्यां[ड] नियोगः[९] पाद उच्यते[१०] ॥५१॥

---

(१) मन्त्र इति क० घ०।

(२) प्रसङ्गाद्भोजस्य इति क० घ० मन्त्रप्रशंसा भोजस्येति ग०।

(३) सौभरस्तुतिरिति ख०।

(४) मा नामेथाभिमेथति इति ख०, माता मेत्यभिमेयति इति क०ङ०।

(५) ऋग्मोघमनतिदाच इति ख०।

(६) यास्या इति ख०, याच्ञा इति ग०, यच्ना इति घ० ङ०।

(७) दण्डादिपरिवेदना इति घ०, दण्डेतिपरिदेवना इति ख० च०।

(८) संशयोध स्विदासीदित्थकाथना इति क० घ०, कच्छना इति ङ०।

(९) यज्ञमित्याद्यानियोग· इति ख०।

(१०) उत्तमे इति क० घ०।

---

(क) ऋ० १०,१०७,१०। (ख) ऋ० ८,२१,१८। (ग) ऋ० ८,१९, २। (घ) ऋ० १,१९०, २१, १८५,१०। (ङ) ऋ० १०, ११७, ६। (च) ऋ० ८, २७,२०। (छ) ऋ० ५,३९, १। (ज) ऋ० १०,१८६, १। (झ) ऋ० १, १६४, ३४। (ञ) ऋ० १०, १२९, ५। (ट) ऋ० ४, २६, १। (ठ) ऋ० १, १, ४। (ड) ऋ० १, २६, १।

[क]इह ब्रवीत्वनुयोगः संलाप[1]स्त्वृगुपोपसे[2][ख] ।
प्रतिषेधोपदेशौ[3] तु अक्षैर्मैत्य[ग]चसंस्तुतौ[4] ॥५२॥
आख्यान[5]न्तु हये जाये[घ] विलापस्तु[6]नदस्य मा[ङ] ।
अवीरामिव मां[च] श्लाघा[7] सुदेव इति[छ] तु स्पृहा ॥५३॥
नमस्कार.[ज] भ्रुन मेघे,[8] नमस्ते अस्तु विद्युते ।
सङ्कल्पयन्विद तुभ्योऽह स्यामिति यदुच्यते[9] ॥५४॥
सङ्कल्पस्तु[झ] यदिन्द्राह प्रलापस्त्वेतग्रस्य तु.[ञ][10] ।
महानग्न्याहनस्या तु प्रतिरोधो भुगित्युत[11] ॥५५॥

---

(१) सल्लाप इति क० ग० घ० ।
(२) ऋगुपोपसे इति ख० ग० अन्यत्पुस्तकाच्च ।
(३) प्रतिषेधापदेशौ इति घ० ङ० ।
(४) अक्षैरित्यच्चसंस्तुत, इति घ० ।
(५) आख्यानमिति पुस्तकान्तरम् ।
(६) स्तादिति ख० ग० पुस्तकान्तरञ्च ।
(७) अवीरामात्मन श्लाघा इति ख० ग० घ० ।
(८) नमस्कारो मत ऋषे इति क० घ० घ्रेष इति ख०, घ्रेषे इति ङ० ।
(९) या कल्पयन्ति नो रय परिचाश्चक्तमिह ते इति क० ।
(१०) य इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(११) महानग्न्याह नम्यास्कात्प्रतिरोधो घुगित्यपि इति ख०, भुगित्यपि इति ग०, मुगित्यमि इति पुस्तकान्तरं ।

---

(क) ऋ० १, १५, ६ । (ख) ऋ० ८, ८२, ४ । (ग) ऋ० १०, ३४, १३ । (घ) ऋ० १०, ९५, १ । (ङ) १, १०९, ४ । (च) ऋ० १०, ८६, ९ । (छ) ऋ० १०, ९४, १४ । (ज) ऋ० १, २४, १२, १३ । (झ) ऋ० ८, १४, १ । (ञ) ऋ० ६, १५, ५ ।

प्रमादस्तेप[१]हन्ताहं[क] नमस्त[ख] इत्यभिप्लवः[२] ।
इन्द्राकुत्सेत्युपप्रैषो[ग][३] न विजानामि[घ] संज्वरः ॥ ५६ ॥
होतापचर्दिति प्रैषः[४] को अद्यैति तु विस्मयः ।
जामय[५]पङ्क्वो नेति वितताद्दिः[ङ] प्रवह्लिका[६] ॥ ५७ ॥
[च]न मृत्युरासीदित्येतामाचिख्यासां[७] प्रचक्षते[८] ।
अभिशापो[९]प्रजाः सन्तु भद्र[१०]माशीस्तु[छ] गौतमे[११] ॥ ५८ ॥
यक्ष्ण्येवं प्रकार[१२]न्तु शक्यं द्रष्टुमिहार्षजम्[१३] ।

---

(१) प्रमोदस्तेप इति घ० ।
(२) प्रमादस्तेकहन्ताहं गमस्त इत्यप्लव इति ख०, नसस्त इत्यपप्लवः इति ग० ।
(३) इन्द्राकुत्सेत्यपप्रैषो इति ख०, इन्द्राभरेत्युपप्रैषो इति क० ङ० ।
(४) होतापचर्दितिप्रैषा इति ख० ।
(५) जामये इति घ०, जामस्रु इति ग०, यामनु इति ख० ।
(६) प्रवल्हिका इति ख० ग० ।
(७) माचिख्यासमिति क०, माविद्यासामिति ख०, माचिख्यासमिति घ० ।
(८) प्रचक्षते इति क०, प्रचक्षमे इति ख० ।
(९) व्याविशापोः इति ख० ।
(१०) यद्रमिति ख० ।
(११) इगौतमे इति ख० ।
(१२) प्रश्नमेव प्रकारमिति ख० ।
(१३) इतीहार्षमिति ख० ग० पुस्तकान्तरस्थ ।

---

(क) ऋ० १०, ११९, ९ । (ख) ऋ० ७, ३८, १० । (ग) ऋ० ५, ३१, ९ । (घ) ऋ० १, १६४, ३७ । (ङ) ऋ० १, १५२, ४ । (च) ऋ० १०, १२९, २ । (छ) ऋ० १, ७९, १० ।

वक्तुं प्रयोगतस्त्वेषामृक्सूक्तार्धर्चसंश्रितम्[१] ॥ ५९ ॥
एते तु मन्त्रवाक्यार्थां देवतां सूक्तभागिनीम्[२] ।
संश्रयन्ते[३] यथान्याय स्तुतिस्त्वचानुमानिकी[४] ॥ ६० ॥
भवद्भूत भविष्यच्च जङ्गमं स्थावरञ्च यत्[५] ।
अस्लेके[६]सूर्यमेवैकं प्रभव प्रलयं विदुः ॥ ६१ ॥
[क]असतश्च [ख]सतश्चैव [ग]योनिरेषा[७] [घ]प्रजापतिः ।
त्यद्[ङ]चरञ्चा[च]व्यय[८]ञ्च यच्चैत[छ]द्ब्रह्म[९]शाश्वतम् ॥ ६२ ॥
कृत्वैव[१०] हि[ज] त्रिधा[झ]त्मानमेषु लोकेषु [ञ]तिष्ठति ।

---

(१) ऋक्सूक्तार्धर्चशस्त्विति इति क०, चैषा यक्सुक्तार्धर्चसंश्रित-
मिति ख० ।
(२) देवता सूक्तभागिनामिति क० घ०, देवता सूक्तभागिनी इति ख० ।
(३) संभूयते इति ख० ।
(४) त्वा थानुमानिकी इति ख०, तत्रानुमानिकी इति घ० ।
(५) भवद्भूतस्य भव्यस्य जङ्गमस्थावरस्य च इति ख० ग० पुस्तकान्तरञ्च ।
(६) एते इति क० घ० ।
(७) एषामिति क० ।
(८) यदच्चरञ्च वाच्यमिति ग०, वाक्यमिति ङ० पुस्तकान्तरञ्च ।
(९) यच्चैतद्ब्रह्म इति ग० ङ० पुस्तकान्तरञ्च ।
(१०) कृत्वैव इति ख० ग० पुस्तकान्तरञ्च ।

---

(क) ऋ० ५, १२, ४ । (ख) ऋ० १, ३६, ३ । (ग) ऋ० १, १०४, १ । (घ) ऋ० ४ ५३, २ । (ङ) ऋ० १, १६४, ४२ । (च) ऋ० ६, ३७, १ । (छ) ऋ० १, १०, ४ । (ज) ऋ० १, ११७, २४ । (झ) ऋ० १, १६३, ६ । (ञ) ऋ० १, ५१, ११ ।

(क)देवान् यथायथं(ख) सर्वान् निवेश्य(ग) त्रिषु(घ) रश्मिषु ॥ ६३ ॥
एतद्भूतेषु(१) लोकेषु अग्निभूतं स्थितं त्रिधा ।
(ङ)ऋषयो (च)गीर्भि(छ)रर्चन्ति व्यञ्जितं(२) (ज)नामभि(झ)स्त्रिभिः ॥ ६४ ॥
तिष्ठत्येव च(३) (ञ) भूतानां(ट) जठरे जठरे ज्वलन् ।
त्रिस्थानं चैनमर्चन्ति होत्रायां(ठ) सूक्तवर्हिषः ॥ ६५ ॥
इहैष(ड) पवमानो(ढ)ऽग्नि(४)र्मध्यमेऽग्निस्तु(ण) पावकः(५) ।
अमुष्मिन्नेष(६) विभेस्तु लोकेऽग्निः(त) शुचिरुच्यते ॥ ६६ ॥
इहाग्निभूतस्त्वृषिभिर्लोके स्तुतिभिरीडितः(७) ।
(थ)जातवेदाः स्तुतो मध्ये स्तुतो(द) वैश्वानरो दिवि ॥ ६७ ॥

---

(१) एतमेवैषु इति क० घ० ।
(२) व्यश्नितमिति ङ० घ० पुस्तकान्तरञ्च ।
(३) एष च इति ख०, एष हीति ग० पुस्तकान्तरञ्च ।
(४) पवमानाग्निरिति क० घ० ।
(५) वनस्पतिरिति ख० ग० ङ० पुस्तकान्तरञ्च ।
(६) अमुष्मिन्नेव इति ग० ङ० पुस्तकान्तरञ्च ।
(७) ईलितः इति क० ख० ङ० ।

(क) ऋ० १, १, २ । (ख) ऋ० १, १६१, ८ । (ग) ऋ० ८, ८४, ८ । (घ) ऋ० १, १३४, ४ । (ङ) ऋ० १, ४८, १४ । (च) १, ६, ६ । (छ) ऋ० १, १०, १ । (ज) ऋ० १, १५५, ६ । (झ) ऋ० ८, ५६, ५ । (ञ) ऋ० ३, २७, ६ । (ट) ऋ० १, १०४, ६ । (ठ) ऋ० १, ३, २ । (ड) ऋ० ८, १०१, १४ । (ढ) ऋ० १, १, ७ । (ण) ऋ० ३, ६०, ४ । (त) ऋ० १, ६६, १ । (थ) ऋ० १, ७७, ५ । (द) १, ५६, ६ ।

(क)रमान् रश्मिभि(ख)रादाय(ग) वायुनाऽयं गतः सह(१) ।
(घ)वर्षत्येष च यल्लोके(ङ) तेने(च)न्द्र (छ)इति स स्मृतः(२) ॥ ६८ ॥
(ज)अग्नि(झ)रस्मि(ञ)न्नथेन्द्रस्तु मध्यमो(३)(ट)वायुरेव च ।
(ठ)सूर्यो (ड)दिवीति विज्ञेयास्तिस्र एवेह(४) देवताः ॥ ६९ ॥
एतासामेव माहात्म्यान्नामान्यत्वं विधीयते ।
तत्तत्स्थानविभागेन तत्र तत्रोपलक्षयेत्(५) ॥ ७० ॥
(ढ)तासा(ण)मियं (त)विभूतिर्हि (थ)नामानि यदनेकशः ।
(द)आहुस्तासान्तु मन्त्रेषु(ध) कवयोऽन्योऽन्ययोनिताम्(६) ॥७१॥
यथाम्नानं(न) प्रदिष्टास्ता(७) सामान्येन देवताः ।

---

(१) सह संस्तुत इति क० घ० ।
(२) स स्तुत इति क० घ० ।
(३) मध्यत इति ग० ।
(४) एवहि इति क० घ० ।
(५) तत्र तत्रैव दृश्यते इति ग० ङ० पुस्तकान्तरञ्च ।
(६) अन्योऽन्ययोगितामिति ख० ।
(७) स्तु इति क० ।

---

(क) ऋ० १, १६, ८ । (ख) ऋ० ४, २६, ६ । (ग) ऋ० १, १४, १० ।
(घ) ऋ० ५, ८४, ३ । (ङ) ऋ० १, ११, ६ । (च) ऋ० १, २, ५ ।
(छ) ऋ० १, १०६, ३ । (ज) ऋ० १, १, २ । (झ) ऋ० १, ६, ६ ।
(ञ) ऋ० १, ४, ३ । (ट) ऋ० १, १३४, ३ । (ठ) ऋ० १, ३३, १० ।
(ड) ऋ० १, ६, १ । (ढ) ऋ० १, ३४, ८ । (ण) ऋ० १, ४८, ७ ।
(त) ऋ० १, ३०, ५ । (थ) ऋ० १, ७२, ३ । (द) ऋ० १, ११८, ३ ।
(ध) ऋ० ५, ५०, ८ । (न) ऋ० ३, २०, १२ ।

तद्भक्तास्तत्प्रधानाश्च[क] केचिदेवं वदन्ति ताः[१] ॥ ७२ ॥
[ख]पृथक् [ग]पुरस्ताद्ये तूक्ता[२] लोकादिपतय[घ][३]स्त्रयः ।
[ङ]तेषा[च]मात्मैव तत्सर्वं यद्यद्भक्तिः प्रकीर्त्यते[४] ॥ ७३ ॥
तेजस्त्वे[छ] वायुधं[५] प्राहुर्वाहनञ्चैव तस्य तत्[६] ।
[ज]द्यामैन्द्रीञ्च [झ]दिव्याञ्च [ञ]वाचमेवं पृथक् स्तुताम् ॥ ७४ ॥
यङ्देवतायाः [ट]स्तुतयो द्वन्द्वशः स्तुतयश्च[७] याः ।
प्राधान्यमेव सर्वासु[८] पत्नीनामेव[९][ठ] तास्वपि ॥ ७५ ॥

---

(१) नैवं केचिद्वदन्ति तु इति क॰ घ॰, तु इत्यत्र ता इति पुस्तकान्तरं।
(२) येत्यूक्ता इति ख॰, पुरस्ताद्यौयक्ता इति घ॰ ।
(३) लोकाधिपतय इति क॰ घ ।
(४) यदन्यद्भक्ति कीर्त्यते इति क॰ घ॰ ।
(५) तेजस्ते वायव इति क॰ ङ॰, वायवा इति ग॰। तेजसे वायवा इति ख॰, ।
(६) यस्य यत् इति क॰ ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च ।
(७) द्विवत्सं स्तुतयश्च इति ग॰ ङ॰ पुस्तकान्तरञ्च, द्विवत्सं ततयश्च इति ख॰ ।
(८) प्राधान्यमेवां भूतानां इति क॰ घ॰।
(९) इव इति ख॰ ग॰ ङ॰ ।

---

(क) ऋ॰ ५, ३०, ३ । (ख) ऋ॰ १, १३१, २ । (ग) ऋ॰ १, १२३, १० । (घ) ऋ॰ १, ३४, २ । (ङ) ऋ॰ १, ७, १ । (च) ऋ॰ १, ११५, १ । (छ) ऋ॰ २, १५, ४ । (ज) ऋ॰ १, ९१, १६ । (झ) ऋ॰ ८, ९०, १० । (ञ) ऋ॰ १, ३०, ६ । (ट) ऋ॰ ६, ३४, १ । (ठ) ऋ॰ ७, २८, ८ ।

[क]स्थान [ख]नामानि भक्तीश्च[1] देवताया स्तुतौ स्तुतौ ।
सम्पाद्यन्वपेक्षेत[2]याज्ञाश्चिदिह सम्पदम् ॥ ७६ ॥
अग्निभक्तिस्तु तान् सर्वान्[ग]ग्नावेव[3] समापयेत् ।
यदिन्द्रभक्ति तच्चेन्द्रे[4] [घ]सूर्ये[5] सूर्यानुगञ्च[ङ] यत् ॥ ७७ ॥
निरूप्यते[6] हवि[च]र्यस्मै[7] सूक्तन्तु [छ]भजते च [ज]या ।
[झ]सैव [ञ]तत्र प्रधान स्यान्न[ट]िपातेन [ठ]या [ड]स्तुता ॥७८॥
[ढ]इति[8]चयाणामेतेषा[10] [ण]मुक्त सामासिको विधि ।
समासेनैवमुक्तस्तु[11] विस्तरेण त्वनुक्रम[12] ॥ ७९ ॥

---

(१) भक्तिश्चेति क० ग० ।
(२) सवादो यन्त्वपेक्षेत इति क० ।
(३) या सर्व्वामग्नावेव इति क० ।
(४) यदिन्द्रभक्तिस्त्वैन्द्रे इति क० घ० ।
(५) सौर्य्ये इति ङ० पुस्तकान्तरञ्च ।
(६) निरुप्यत इति घ० ।
(७) यस्मै इति घ० ।
(८) तत्र तत्र प्रधानोऽसौ न इति क० घ० ।
(९) इह इति क० घ० ।
(१०) एवैषामिति ग० ।
(११) समापद्यन्तु तत्सर्व्वमिति क० घ० ।
(१२) अनुक्रमादिति घ० ।

---

(क) ऋ० ५, ७६ ४ । (ख) ऋ० १, ७२, ३ । (ग) ऋ० १, १२४, १ । (घ) ऋ० १, २३ १७ । (ङ) ऋ० १, १, ६ । (च) ऋ० १, १२, १ । (छ) ऋ० १, ६४, २ । (ज) ऋ० १, १२३, ४ । (झ) ऋ० १, २२, २ । (ञ) ऋ० १,४८, १० । (ट) ऋ० १, ६, ६ । (ठ) ऋ० १, १७, ६ । (ड) ऋ० १, २२, १७ । (ढ) ऋ० ४, ६७, ७ ।

अवश्यं वेदितव्यो हि नाम्ना[1] [क]सर्वस्य विस्तरः ।
न हि [ख]नामान्यविज्ञाय [ग]मन्त्राः शक्या हि वेदितुम् ॥८०॥
सत्त्वान्यमूर्त्तान्यपि च [घ]देवता च[2] महर्षयः ।
तुष्टुवुर्ऋषयः शक्त्या[3][ङ] तासु तासु स्तुतिष्विह[च] ॥८१॥
यैस्त्वग्नि[4][छ]रिन्द्रः [ज]सोमश्च [झ]वायुः [ञ]सूर्यो [ट]बृहस्पतिः ।
[ठ]चन्द्रोऽथ[ड]विष्णुः[ढ]पर्जन्यः[ण]पूषा वा[5][त]ऽप्यृभवो[6][थ]ऽश्विनौ॥८२
[द]रोदसी [ध]मरुतो [न]देवाः[7] [प]पृथिव्यापः [फ]प्रजापतिः ।

---

(१) नाम्नां इति क० ङ०, नाम्नः इति घ० ।
(२) देवतावदिति क० घ० ।
(३) तुष्टुवुश्च प्रशंसन्तेति क० घ० ।
(४) यैरग्निरिति घ० ।
(५) वा इति ख० ङ० पुस्तकान्तरेषु ।
(६) पूषोषा भगवः इति क० घ० ।
(७) देव्यः इति क० घ० ।

---

(क) ऋ० १०,१२७,६ । (ख) ऋ० १, ७२, ३ । (ग) ऋ० ६,१०,१४ । (घ) ऋ० १, २२, ५ । (ङ) ऋ० २, २८, ९ । (च) ऋ० १, १, २ । (छ ऋ० १, १, २ । (ज) ऋ० १, २, ५ । (झ) ऋ० १, १८, ४ । (ञ) ऋ० १, १३४, ३ । (ट) ऋ० १, २३, १७ । (ठ) ऋ० १, १५०, ३ । (ड) ऋ० १, ८२, १६ । (ढ) ऋ० ४, ५७, ८ । (ण) ऋ० १, २३, १४ । (त) ऋ० १, ११०, १ । (थ) ऋ० ५, ७५, ७ । (द) ऋ० १, १६०, ५ । (ध) ऋ० १, १५, २ । (न) ऋ० १, २३, १९ । (प) ऋ० १, २२, १६ । (फ) ऋ० ४, ५३, २ ।

(क)देवौ च (ख)मित्रावरुणौ पृथक् सह च ता(ग)वुभौ ॥८३॥
(घ)विश्वे च देवाः (ङ)सविता (च)त्वष्टा वै रूपकृन्मत(१) ।
(छ)अश्वो (ज)ऽन्न(झ)मृत्विजो(ञ) वज्रो(२)(ट)ग्रावाणो रथसयुत(३) ॥८४॥
(ठ)स्तुता पृथक् पृथक् (ड)स्वै स्वै सूक्तैर्ऋग्भिश्च(४) (ढ)नामभि ।
स्तुतौ स्तुतौ प्रवक्ष्यामि (ण)तानि (त)तेषामनुक्रमात् ॥८५॥
व्यवस्थे(थ)न्मन्त्रमाग्नेय लिङ्गै(द)रग्नेश्च(५) लक्षितम् ।
हविर्य्यद्धि(६) प्रधानैश्च(७) नामाङ्कानैश्च केवलै ॥८६॥

---

(१) रूपकृन्मुख इति घ० ।
(२) यज्ञ इति घ० ।
(३) रथसयुग इति घ० ।
(४) सूक्तैर्वृत्तु च इति घ० ।
(५) तु इति घ० ।
(६) हविष्यद्धि इति ग० घ०, हविर्द्धि इतिपाठ समीचीन ।
(७) निरूप्यैवमिति घ० ।

---

(क) ऋ० ६, ५६, ५। (ख) ऋ० १, ३५, १। (ग) ऋ० १, १७६, ६। (घ) ऋ० १, ८६, १०। (ङ) ऋ० १, २२,८। (च) ऋ० १, ३२, २। (छ) ऋ० १, ३६, ८। (ज) ऋ० १, १४०,२। (झ) ऋ० १, ६०, ३। (ञ) ऋ० १, ५१, ७। (ट) ऋ० १, ८६, ४। (ठ) ऋ० ४, ३७, ७। (ड) ऋ० १, ६८, ४। (ढ) ऋ० १, १५५, ६। (ण) ऋ० १, ५२ ६। (त) ऋ० १, २, १। (थ) ऋ० १, ३१, १३। (द) ऋ० १, २४, २।

ऐन्द्रस्तु[क][१] मन्त्रो[२] वायव्यैर्लिङ्गै[ख]रैन्द्रैश्च लक्ष्यते[३]।
नामधेयैश्च[४] [ग]वज्रस्य बलकृत्या बलेन च ॥ ८७ ॥
सौर्यस्तु लिङ्गैः[घ] सूर्यस्य[५] गुणैः सर्वैस्तु[६] तैजसैः।
[ङ]नामभिश्चैव[७] चन्द्रस्य सूक्तश्च[८] [च]भजतेऽत्र यैः[९] ॥ ८८ ॥
एतासां[१०] देवतानान्तु नामधेयानुकीर्त्तनैः।
[छ]यस्य यस्येह यावन्ति न व्यवस्यन्त्य[ज]तो[११][झ]ऽन्यथा ॥ ८९ ॥
[ञ]अयं प्रयोगस्त्वेतेषां[ट] ज्योतिषां[१२][ठ] त्रिषु[ड] वर्त्ततां।

---

(१) ऐन्द्रैस्तु इति ख॰ घ॰।
(२) मन्त्रैः इति घ॰।
(३) लक्षितमिति घ॰।
(४) नामभिश्चैव इति क॰ घ॰।
(५) सौर्य्यश्च इति घ॰।
(६) च इति ख॰ घ॰।
(७) नामधेयैश्चेति ख॰ ग॰ घ॰।
(८) सूर्य्यस्तु इति क॰ घ॰।
(९) यः इति ख॰ पुस्तकान्तरेषु, चखिलैरिति घ॰।
(१०) एतासामिति घ॰।
(११) न व्यवस्यतः इति ग॰ घ॰।
(१२) ज्योतिःषु इति ख॰ घ॰।

---

(क) ऋ॰ १, १३०, ३। (ख) ऋ॰ ३, ५३, ८। (ग) ऋ॰ ५, ३२, ७।
(घ) ऋ॰ १, २३, ६। (ङ) ऋ॰ १, १५५, ६। (च) ऋ॰ १, १२३, ३।
(छ) ऋ॰ १, ५, ३। (ज) ऋ॰ १, ६, ९। (झ) ऋ॰ ३, ३२, ८।
(ञ) ऋ॰ १, १९, ७। (ट) ऋ॰ १, ११३, १। (ठ) ऋ॰ १, १५, ३।
(ड) ऋ॰ १, ८९, २।

लोकेषु मन्त्रवि(क)दिदाम् प्रयोगेणावसीदति ॥ ९० ॥

(ख)नीयतेऽयं नृभिर्यस्मा(ग)न्नयत्य(घ)स्मा(ङ)दिमौ च तं(१) ।

(च)तेने (छ)मौ च (ज)क्रतुः (झ)कर्म समानावौ पृथक् पृथक्(२) ॥९१॥

य(ञ) द्विद्यते च(ट) जातस्य(३)(ठ) जातैर्यद्वाऽच(४)विद्यते ।

तेनेमौ तुल्यनामानावुभौ लोकौ समाप्नुतः(५) ॥ ९१ ॥

विसृजन्नयमेतेषां(६) (ड)भ्राजते द्योम्नि (ढ)मध्यमः ।

निपातमात्रे कल्प्यन्ते(७) तथा(८)ग्रेयानि कानिचित् ॥ ९२ ॥

---

(१) सकृदिति घ० ।

(२) सनातनौ इति घ० ।

(३) यतस्येति ख०, जात सन् इति घ० ।

(४) च्यथेति घ० ।

(५) समश्नुता इति घ० ।

(६) दृजन्तिरयमेकस्तु इति घ०, विसृज्य नयमेतेषामिति ख० ।

(७) कल्पन्ते इति घ०, कथ्यन्ते इति ग० ।

(८) तस्य इति घ० ।

---

(क) ऋ० १, २४, १३ । (ख) ऋ० ६, २७, ३ । (ग) ऋ० ४, २१, ४ । (घ) १, १०१, ४ । (ङ) ऋ० १, १०५, १६ । (च) ऋ० १, ११, ६ । (छ) ऋ० २, ४०, २ । (ज) ऋ० १, १७, ५ । (झ) ऋ० १, २१, ८ । (ञ) ऋ० १, ४४, ६ । (ट) ऋ० १, ८६, ७ । (ठ) ऋ० ५, १५, २ । (ड) ऋ० १०, २०, ३ । (ढ) १, १६४, १ ।

(क)अर्चिभिः(ख) केश्यग्नं(१) लग्निर्विद्युद्भिरेव(२) मध्यमः।
असौ तु(ग) रश्मिभिः(३) केशी तेनैनामाह(४) केशिनः(घ) ॥ ८३ ॥
एतेषां तु पृथक्त्वेन त्रयाणां केशिनामिह।
संलक्ष्यन्ते प्रक्रियासु त्रयः केशिन इत्यृचि(५) ॥ ८४ ॥
न चैवैषां(६) प्रसूतिर्वा विभूतिः स्थानजन्म वा(७)।
निर्वक्तुं शक्यमेतैर्हि कृत्स्नं व्याप्तमिदं जगत् ॥ ८५ ॥
(ङ)वैश्वानरं(८) श्रितो ह्यग्निरग्निं(९) वैश्वानरः श्रितः।
अनयो(च)र्जातवेदाश्च तथैव(छ) जातवेदसि(१०) ॥ ८६ ॥

---

(१) अर्चिभिः केश्यं इति ख०, अर्चिभिः केशयमिति ङ०।
(२) रूपेव इति ग० घ०।
(३) कुरश्मिभिरिति ख०।
(४) तेन नानाह इति घ०।
(५) प्रसिप्तानि कृतवच्च सर्वोंसि च इति घ०।
(६) नलेवैषां इति घ०।
(७) विभूतिस्थानजन्म वा इति ख० ग०।
(८) वैश्वानरे इति क० घ०।
(९) अग्नी इति क० घ०।
(१०) तु तयेनौ जातवेदसौ इति क० ख० ग० ङ०।

---

(क) ऋ० ५, ७९, ८। (ख) ऋ० १०, १०२, ६। (ग) ऋ० १, १९, ८। (घ) ऋ० १, १६४, ४४। (ङ) ऋ० ७, ५, ५,। (च) ऋ० १, ७७, ५। (छ) ऋ० ६, १६, ४२।

भाक्तोक्यार्थैकजातत्वाद्[१] व्याप्तिमत्त्वात्तु तैजस[२] ।
तस्य तस्येह[३] देवत्व दृश्यन्ते ते [४]पृथक्[५] स्तुता ॥९७॥
यत्त्वाग्नेयमिति ब्रूम[६] सूक्तभाक् तत्र[७] पार्थिव ।
जातवेदस्यमित्युक्ते सूक्तेऽस्मिन् मध्यम स्मृत[८] ॥ ९८ ॥
वैश्वानरीयमिति तु यत्र ब्रूमो[९]ऽथ वा क्वचित् ।
सूर्यसूक्तस्य[१०] भाक्तत्र ज्ञेयो वैश्वानरस्तुतौ[११] ॥ ९९ ॥
सूर्यप्रस्तुतावग्नी तु दृष्टौ[१२] पार्थिवमध्यमौ ।
एतेषामेव लोकानां त्रयाणामध्वरेऽध्वरे ॥ १०० ॥
[क]रोहात्प्रत्यवरोहेण चिकीर्षन्नाग्निमाहृतम्[१३] ।

---

(१) एकजन्याच्चेति क० घ० ।
(२) व्याप्तिमत्त्वाच्च तेजस इति क० घ० ।
(३) यस्य यस्येह इति क० घ०, तस्य तस्य ह इति ख० ङ० ।
(४) च इति ख० ग० ।
(५) स्तुतिषु इति घ० ।
(६) यच्चाग्नेयमिति ब्रूम इति ग०, यत्त्वाग्नेयमिति घ० ।
(७) सूक्त भक्त्या तु इति क० घ० ।
(८) सूक्त भक्त्या तु मध्यम इति घ० ।
(९) इत्युक्ते यद्ब्रूयामो इति क० घ० ।
(१०) सूर्यं सूक्तस्येति ग० ।
(११) सूर्यभक्तस्य सूर्यस्य ज्ञेयो वैश्वानरो दिवि इति क० घ० ।
(१२) दृष्टौ इति ख०, दृष्टौ इति क० घ० ।
(१३) चिकीर्षन्नग्निमावर्तामिति ग० ।

---

(क) ऋ० १, ५६, २ ।

यस्त्वं[१] वैश्वानरीयेण सूक्तेन प्रतिपद्यते ॥ १०१ ॥
ततस्तु मध्यमस्थाना देवतास्त्वनुशंसति[२]।
इन्द्रश्च[३] मरुतश्चैव स्तोचियेऽग्नि[४]मिमं पुनः ॥ १०२ ॥
तथैत[५]दुक्तमेतेषां विभूतिस्थानमम्भवम्।
यथा[६] च देवदेवस्य तत्र तत्रेह दृश्यते ॥ १०३ ॥
यद्यत्र पृथिवीस्थानं पार्थिवं चाग्निमिश्रितम्[७]।
तत्सर्वमानुपूर्व्येण[८] कथ्यमानं निबोधत ॥ १०४ ॥
जातवेदाः[क] श्रितो ह्य[९]ग्नि[ख]मग्निं वैश्वानरः[ग] श्रितः[घ]।

---

(१) यास्त्वमिति ग०।
(२) मध्यमे स्थानादेवतास्त्वनुशंससि इति ख०, देवतास्तत्र शंसति इति घ०।
(३) यदस्चेति ग०।
(४) स्तोत्रियामिमिति घ०।
(५) यथैतदिति ख० ग० घ०।
(६) तथा इति ख० ग० ङ०।
(७) वाग्निमिश्रितमिति क० घ०, वाग्निमिश्रितमिति ङ०।
(८) थानुपूर्व्येणेति ग० घ० ङ०।
(९) ह्यपि इति घ०।

---

(क) ऋ० ३, ७७, ५। (ख) ऋ० १, १, १। (ग) ऋ० १, ५९, ६।
(घ) ऋ० १, ७५, ३।

द्रविणोदा[क]स्तथेध्म[ख]श्च श्रितस्त्वाग्निं[1] तनूनपात्[ग] ॥ १०५॥
नराशंसः[घ] श्रितस्त्वेन[ङ] मेन[2]मेवाश्रित[3]स्त्विलः[च] ।
बर्हिर्द्वार[छ]श्च देव्यो[ज]ऽग्नि[4]मेन[5]मेव तु संश्रिताः ॥ १०६ ॥
नक्तोषा[झ] सा च देव्यौ[6] च होतारा[ञ]वेतदाश्रयौ[7] ।
देव्य[ञ]स्तिस्रः श्रितास्त्वेनं त्वष्टा[ट] चैवैतदाश्रयः ॥ १०७ ॥
श्रितो वनस्पति[ठ]श्चैनं[9] स्वाहाकृतय[ड] एव च ।
अश्वश्च[ढ] शकुनिश्चैव मण्डूका[ण]श्चैतदाश्रयाः[10] ॥ १०८ ॥

---

(१) श्चाग्निरिति घ० ।
(२) एतमेनमिति ग०, एवमेतमिति घ० ।
(३) श्चाश्रिता इति ख० घ० पुस्तकान्तरञ्च ।
(४) देवोऽग्निमिति ख० ।
(५) एतमिति घ० ।
(६) देव्यौ इति ङ० ।
(७) एतदाश्रितौ इति घ०, होतारौ च तदाश्रयौ इति पुस्तकान्तरं ।
(८) देव्या इति ग० ।
(९) एवमिति ख० ।
(१०) तदाश्रया इति ख० ।

---

(क) ऋ० १, १५, ७-९ । (ख) ऋ० ८, ४५, २ । (ग) ऋ० १, १८८, २ ।
(घ) ऋ० १, १४२, ३ । (ङ) ऋ० १, ९, २ । (च) ऋ० १, १२८, १ ।
(छ) ऋ० १, १३, ६ । (ज) ऋ० १, १४०, ७ । (झ) ऋ० १, १३, ७ ।
(ञ) ऋ० १०, ६५, १० । (ट) ऋ० १, ३२, २ । (ठ) ऋ० १, ९०, ८ ।
(ड) ऋ० ९, ५, ११ । (ढ) ऋ० १, ३६, ८ । (ण) ऋ० ७, १०३, ७ ।

[क]ग्रावाण[१]श्चैन[२]मचा[३][ख]श्च नराशंसस्तथा रथः[ग] ।
[घ]दुन्दुभिश्चेषुधि[ङ]श्चैव[४] हस्तघ्नो[च][५] भीशवो[६] धनुः[छ] ॥१०९॥
[ज]ज्या चैतदाश्रितेषुश्च[७] श्रिता अश्वाजनी[झ][८] च या ।
[ञ]वृषभो द्रुघण[९]श्चैल[ट][१०] श्चैतं पितुरुलूखलम्[११][ठ] ॥११०॥
नद्यश्चैवैनमापश्च सर्वाश्चौषधयस्तथा[१२] ।
रात्र्यश्वाप्याम्य[ड]रण्यानिः[ढ][१३] श्रद्धे[ण]ला[त]पृथिवी[थ]तथा[१४] ॥१११॥

---

(१) श्रावणा इति ख०, ग्रावणा इति ग० ।
(२) एवमिति ख०, एतमिति घ० ।
(३) मद्या इति ग० ।
(४) एनमिति ग०, एतमिति ङ०, पुस्तकान्तरञ्च ।
(५) हस्तघ्नी इति पुस्तकान्तरं ।
(६) अभीषव इति पाठः सुसङ्गततया भाति ।
(७) आश्रयेषुरिति घ० ।
(८) आश्वाजनी इति ख०, चाश्वाजनी इति घ० ।
(९) वृषभो द्रुघण इति ग०, वृषाद्द्रुघण इति घ० ।
(१०) एनमिति ग० ङ० पुस्तकान्तरञ्च, एवमिति घ० ।
(११) वृषभेद्रुघ्यणश्चैलमेषैतं पितुमुलूखलमिति ख० ।
(१२) सद्देति ख०, सर्व्वा ओषधयश्च हेति ग० ङ० पुस्तकान्तरञ्च ।
(१३) रात्रिरथाक्षेप्यरण्यानी इति ख०, रात्र्यथाप्यरण्यानी इति ग० ङ०, आदर्शपुस्तकमात्रे अरण्यानीति दीर्घस्वरान्तपाठोऽस्ति ।
(१४) श्रद्धा द्यावा पृथिव्यथेति क० घ० ।

---

(क) ऋ० १, ८९, ४ । (ख) ऋ० ८, ४३, ५ । (ग) ऋ० १, ३०, १८ ।
(घ) ऋ० १, २८, ५ । (ङ) ऋ० ६, ७५, ५ । (च) ऋ० ६, ७५, १४ ।
(छ) ऋ० ६, ७५, २ । (ज) ऋ० ६, ७५, ३ । (झ) ऋ० ५, ६२, ७ ।
(ञ) ऋ० १, ३१, ५ । (ट) ऋ० १०, ९५ १८ । (ठ) ऋ० १, २८, ६ ।
(ड) ऋ० ५, ४६, ८ । (ढ) ऋ० १०, १४६, २ । (ण) ७, ३२, १४ ।
(त) ऋ० १, १३, ९ । (थ) ऋ० १, २२, १३ ।

भजते चैन[१] मेवोर्व्वी[क][२] द्वन्द्वभूते च रोदसी[ख][३] ।
मुषलोलूखले[ग] चैनं[४] हविर्धाने च ये स्तुते ॥११२॥
जोष्ट्री[५]घोर्जाञ्जती[घ] चैन[६] शुतुद्री[७][ङ] च विपाट्[च] सह ।
यौ च देवौ शुनासीरौ[छ][८] तौ चाग्नी चैतदाश्रयौ[९] ॥११३॥
लोके वै[१०] यच्च वै प्रातः सवन[ज] क्रियते मखे[झ] ।
वसन्त[ञ]शरदौ[ट] चर्तू स्तोमौ[ठ]ऽनुष्टुवयौ[ड] त्रिवृत्[ढ][११] ॥११४॥

---

(१) चैवमिति ख०, भजेते चैतमिति क० घ०, भजेते चैनमिति ङ० ।
(२) एवार्व्वी[च] इति क० ग० घ० ।
(३) तु रोदसी इति ख० ।
(४) एवेति क० घ० ।
(५) जोष्ट्री इति ख० ।
(६) घोर्जाञ्जतिश्चैनमिति ख०, एवेति क० घ० ।
(७) सुतुद्रा इति ख० ।
(८) सुनासीरौ इति ख० ।
(९) चैवाचैतदाश्रयौ इति क० घ०, चाग्नि चैतदास्तथेति ख० ।
(१०) लोकोऽयमिति क०ग० घ० ङ० ।
(११) च यस्त्रिवृत् इति क० घ० ।

---

(क) ऋ० १, १४, ९ । (ख) ऋ० १, १६७, ५ । (ग) ऋ० १, २८, ६ ।
(घ) ऋ० ८, ३९, ४ । (ङ) ऋ० ३, ३३, १ । (च) ऋ० ३, ३३, १ ।
(छ) ऋ० ४, ५७, ५ । (ज) ऋ० १, १६, ५ । (झ) ऋ० १, ६, ८ ।
(ञ) ऋ० १०, ९०, ६ । (ट) ऋ० १, ७२, ३ । (ठ) ऋ० १, ८, १० ।
(ड) ऋ० १, २८, ६ । (ढ) ऋ० १, १४०, २ । (ण) ऋ० ६, ७५, ४ ।

गायत्री(क) चैकविंशश्च यच्च साम(ख)रथन्तरम्(१)(ग)।
साध्याः(घ) साम च वैराजमाप्य(ङ)श्च वसुभिः(च)(२) सह ॥११५॥
इन्द्रेण च मरुद्भिश्च सोमेन वरुणेन च।
पर्ज्जन्येनर्त्तुभिश्चैव विष्णुना चास्य संस्तवः ॥११६॥
अस्यैवाग्नेस्तु पूष्णा च(३) साम्राज्यं वरुणेन च।
देवता वाहनश्चैव(४) हविषां(५) वहनं तथा ॥११७॥
देवतामर्थतत्त्वज्ञो मन्त्रैः संस्तूयते(६)हविः(७)।
असन्ततस्या(८)पि सतो(९) हविरेकं(१०) निरूप्यते ॥११८॥
कर्म दृष्टे च(११) यत् किञ्चिद्(१२) विषये(१३) परिवर्त्तते।

(१) साध्यं रथन्तरमिति ख०।
(२) श्चाप्यश्चवसुभिरिति ख०, श्चाप्याश्च वसुभिरिति ग० घ० ङ०।
(३) पुष्णश्चेति ख०, पुष्णा चेति ङ० पुस्तकान्तरश्च॥
(४) श्चपि इति क० घ०।
(५) हविष इति क० घ०।
(६) संयोजयेदिति क० घ०।
(७) विदुरिति ख०।
(८) श्चसंस्कृतस्येति क० घ०।
(९) विततः इति घ०।
(१०) एषा इति ख०, एवमिति ग०।
(११) तु इति क० घ०, कर्म्म दृष्टेष्विति ङ० पुस्तकान्तरश्च।
(१२) य कश्चिदिति क० घ०।
(१३) विकये इति ख०, विग्रये इति ङ०।

(क) ऋ० १०, १४, १६। (ख) ऋ० १,६२,२। (ग) ऋ० १०,१८२,१। (घ) ऋ० १, १६४,५०। (ङ) ऋ० १, १०५, ८। (च) ऋ० १, ५८, ३।

इत्युक्तोऽथ गण सर्वं पृथिव्यन्याश्रयो महान् ॥११९॥
यस्त्विन्द्रो(१) मध्यमस्थानो गण सोऽयमत पर ।
विमानानि च दिव्यानि गन्धर्वाप्सरसा(२)तथा ॥१२०॥
इन्द्राग्नयस्तु(३) पर्जन्यो रुद्रो वायुर्बृहस्पति ।
वरुण कश्च मृत्युश्च देवश्च ब्रह्मणस्पति(क) ॥१२१॥
मन्यु(४)श्च विश्वकर्मा च मित्र क्षेत्रपति(५)र्यम ।
तार्क्ष्यो वास्तोष्पतिश्चैव सरस्वांश्चैवमत्र तु(६) ॥१२२॥
अपान्नपादधिक्रा(ख) श्च(७) सुपर्णो(ग)ऽथ पुरूरवा(घ) ।
असुतो(ङ)ऽसुनीति(च)र्वेन(छ)श्च(८) तथेन्दुश्च स्त्रियो दिति(ज)(९) ॥१२३॥

---

(१) त्विन्द्र इति क० घ० ।
(२) गन्धर्वाप्सरस इति क० घ०, गन्धर्वाप्सरसामिति ग० ङ० पुस्तकान्तरञ्च ।
(३) इन्द्राश्च यस्तु इति क० घ० ।
(४) मनुरिति ख० ङ० ।
(५) मित्रक्षेत्रपतिरिति ख० ग० ।
(६) तत्र तु इति क० घ० ।
(७) अपान्नपादधिका चेति क० घ० ङ०, अपान्नपादधिकाश्चेति ग० ।
(८) वैनश्चेति घ० ।
(९) तन्वीतस्याप्यये दिति इति क० घ०, तथेन्दुश्च स्त्रियो दितिरिति ङ० पुस्तकान्तरञ्च ।

---

(क) ऋ० २, २४, ७ । (ख) ऋ० ४, ३८, ९ । (ग) ऋ० १,१५,० ।
(घ) ऋ० १, ९१, ४ । (ङ) ऋ० ८, १०, ५ । (च) ऋ० १०, १२, ४ ।
(छ) ऋ० ६, ८३, ५ । (ज) ऋ० ७, १५, १२ ।

त्वष्टा[क] च सविता चैव वातो[ख][१]वाचस्पतिस्तथा ।
धाता प्रजापतिश्चैव अथर्वाण[ग]श्च[२] ये स्तुताः ॥१२४॥
भृगव[घ]श्चैवमग्निश्च[३] तथेला[ङ] चैव याः स्तुताः ।
विधातेन्दुरहिर्बुध्न्यः [च]सोमोऽहिरथ चन्द्रमाः ॥१२५॥
विश्वानर[छ]श्च वै[४]देव ऋभूणां[ज] संस्तुतो[५] गणः ॥१२६॥
मरुतोऽङ्गिरसश्चैव पितरश्चर्तुभिः सह ।
राका[झ][६]वाक्[ञ]सरमा[ट]प्या[ठ]श्च[७]भृगवो[ड]ऽग्ना सरस्वती॥१२७॥
यम्यु[८]र्वम्री[ढ]सिनीवाली[ण] पथ्या[त] स्वस्ति[थ]रुषाः कुहूः ।

---

(१) वाचः इति क० घ० ।
(२) वाघर्वाणश्चेति ख० ।
(३) श्येनश्चैवैवमापश्चेति ख० घ० ।
(४) चैवेति ख० पुस्तकान्तरञ्च ।
(५) वडवायां चाश्रितः इति क० घ० ।
(६) एका इति क० ।
(७) वाक्सरमाद्यश्चेति ङ० ।
(८) यभ्युरिति ख० ।

---

(क) ऋ० १, ३२, २ । (ख) ऋ० १, २८, ६ । (ग) ऋ० ६, ११, २ ।
(घ) ऋ० १, ५८, ६ । (ङ) ऋ० १, १३, ९ । (च) ऋ० १, १८६, ५ ।
(छ) ऋ० १, १८६, १ । (ज) ऋ० ४, ३५, २ । (झ) ऋ० २, ३२, ८ ।
(ञ) ऋ० १, १६४, ४५ । (ट) ऋ० १, ६२, ३ । (ठ) ऋ० १, १०५, ९ ।
(ड) ऋ० १, ५८, ६ । (ढ) ऋ० १, १०१, ४ । (ण) ऋ० २, ३२, ८ ।
(त) ऋ० ३, ५४, ५ । (थ) ऋ० ३, ८९, ६ ।

पृथिव्यनुमतिर्धेनुः सीते[क]ला[ख]ख्या तथैव[१] गौः ।
गौरी[ग] च रोदसी[घ] चैव इन्द्राण्या[२]श्चैष वै पतिः ॥१२८॥
छन्दस्त्रिष्टुप् च पङ्क्ति[ङ]श्च लोकानां मध्यमश्च यः ।
एतेष्वेवाश्रयो[३]विद्यात्सवनं[च] मध्यमञ्च यत् ॥१२९॥
ऋतू च ग्रीष्महेमन्तौ यच्च सामोच्यते[४] बृहत् ।
शक्वरीषु[छ] च यद्गीतं नाम्ना तत्साम शाक्वरम् ॥१३०॥

इति बृहद्देवतायां प्रथमोऽध्यायः ।

---

(१) अनिराचैषा दितिश्चेति क० घ०, सीतालाख्या तथैवेति ख० ग०।
(२) चैवेन्द्राण्या इति ख०।
(३) एकश्चैवाश्रय इति क० घ०, आश्रये इति ख० पुस्तकान्तरे च।
(४) साम्नोच्यते इति ख०।

---

(क) ऋ० ४, ५७, ७। (ख) ऋ० १, १६८, ७। (ग) ऋ० ८,१२,३।
(घ) ऋ० १, १६०,५। (ङ) ऋ० १०, ११०, ८। (च) ऋ० १, १६, ५।
(छ) ऋ० ७, ११, ४।

# अथ द्वितीयोऽध्यायः।

आह चास्यैव तौ(१)स्तोमा(क)वाश्रयौ शाकटायनः(२) ।
यस्य(३) पञ्चदशो नाम्ना सङ्ख्यया(४) त्रिणवश्च(५) यः ॥१॥
संस्तुत(६)श्चैव पूष्णा च विष्णुना वरुणेन च ।
सोमवाय्वग्निकुत्सैश्च ब्रह्मणस्पतिनैव च ॥२॥
बृहस्पतिना च तथा(७) बृहत(ख)श्चैव वै पतिः(८) ।
कासुचित्(९) केचिदित्याहुर्निपाताः(ग) स्तुतिषु स्तुताः(१०) ॥३॥

---

(१) द्वौ इति ख० ग० ङ०।
(२) साकटायनः इति क० घ०।
(३) यस्येति ख०।
(४) सङ्ख्यायामिति क० घ०।
(५) त्रिनवः इति दन्त्यनकारयुक्तपाठो विशुद्धः।
(६) संस्तुतः इति क० घ०।
(७) स बृहस्पतिना चैव इति ख०, बृहतस्पतिना चैवेति ग० ङ०।
(८) नाम्ना यश्चापि पर्व्वतः(घ) इति ख० ग० ङ० पुस्तकान्तरेषु।
(९) कश्चित्तु इति क० घ०।
(१०) निपाताः स्तुतिषु स्तुतः इति क० घ०।

---

(क) ऋ० १, ८, १०। (ख) ऋ० १, १३०, ९। (ग) ऋ० ४,५५,२।
(घ) ऋ० १, ६४, ७।

मित्र(क)श्च(१) स्तूयते(२)देवो वरुणेन महा(३)(ख)सह ।
रुद्रेण सोम पूष्णा(४) च पुन पूषा च वायुना ॥४॥
वातेनैव तु(५) पर्जन्यो लक्ष्यते वै क्वचित्(६) क्वचित् ।
ऋच(ग)र्द्धर्चेषु(७) पादेषु सूक्तेष्वेषु तु(८) कृत्स्नश ॥५॥
रसादानं(९) तु कर्मास्य वृत्रस्य(१०)(घ) च निबर्हणं ।
स्तुते प्रभुत्व सर्वस्य बलस्य(ङ) निखिला कृति ॥६॥
इत्येन्द्रो मध्यमस्थानो गण सम्यगुदाहृत ।
य परस्तु(११)गण सौर्यो द्युस्थानस्त निबोधत ॥७॥

---

(१) तु इति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(२) श्रूयते इति ग॰ ङ॰ पुस्तकान्तरञ्च ।
(३) सर्वेषु आदर्शपुस्तकेषु, महा इति निर्विसर्गपाठो वर्तते ।
(४) पूषा इति ख॰ ।
(५) चैव इति ख॰ ङ॰ । चेति ग॰ ।
(६) क्वचन वै इति ग॰ ङ॰ पुस्तकान्तरञ्च ।
(७) अर्धर्चेष्वृच इति क॰ घ॰, ऋचार्द्धेष इति ख॰ ऋचार्द्धर्चेषु इति ग॰ ।
(८) सूक्तेष्वेव स्थिति क॰ घ॰, सूक्तेष्वेतेषु इति पुस्तकान्तर ।
(९) रसदानमिति क॰ घ॰ ।
(१०) वृत्रस्येति क॰ घ॰ ।
(११) दश दश इति क॰ ।

---

(क) ऋ॰ १, २३ ६ । (ख) ऋ॰ ८, २०, २० । (ग) ऋ॰ ६,४९ ९ ।
(घ) ऋ॰ १, ३२ १० । (ङ) ऋ॰ १ ३०, १७ ।

तस्य मुख्यतमौ देवावश्विनौ[1]सूर्य्यमाश्रितौ ।

वृषाकपायि[2][क] सूर्य्या[ख]षा:[ग] सूर्य्यस्यैव तु पत्नय:[3] ॥८॥

अमुतोर्वाङ्[4]निवर्त्तन्ते प्रतिलोमास्तदाश्रया:[5] ।

पुरोदया[6]त्तामुषसं सूर्य्यां मध्यन्दिने स्थिते ॥९॥

वृषाकपायिं[2] सूर्य्यास्तकाल आहु:[7] स्तुतिष्वृचि[8] ।

तस्या[9]श्रये[10]सरण्यूश्च[घ][11] भग:[ङ] पूषा वृषाकपि:[च][12] ॥१०॥

---

(१) त्वश्विनौ इति क॰ घ॰ ।

(२) सर्व्वेषु आदर्शपुस्तकेषु वृषाकपायी इति दीर्घस्वरान्तपाठो वर्त्तते ।

(३) पत्नय इति क॰, यत्नतः इति ख॰ ।

(४) अमुतोर्वागिति ङ॰ पुस्तकान्तरश्च । अमुतो वागितिपाठः शुद्ध ।

(५) पलोदये इति क॰ घ॰ ।

(६) पुरोदये इति क॰ घ॰ ।

(७) सूर्य्यस्य तामेवाहुरिति क॰ घ॰, सूर्य्यस्य स्तानेवाहुरिति ख॰ ।

(८) तु निम्नुचि इति क॰, निमुचि इति ख॰ ।

(९) अस्येति क॰ घ॰ ।

(१०) आश्रमे इति ग॰ ।

(११) तस्याएश्चेति ख॰ ।

(१२) वृहस्पतिरिति ख॰ ।

---

(क) ऋ॰ १०, ८६, १३ । (ख) ऋ॰ ५, ७३, ५ । (ग) ऋ॰ १, ४६, १ ।
(घ) ऋ॰ १०, १७, २ । (ङ) ऋ॰ १, २४, ४ । (च) ऋ॰ १०, ८६, १ ।

यमो वैश्वानरो(क) विष्णुर्वरुणश्चैकपादज(१) ।
पृथिवी च समुद्राश्च देवा सप्तर्षयश्च ये ॥११॥
आदित्या केशिसाध्याश्च सविता(२) वसुभिर्मनु ।
दध्यङ्(ख)थर्वा(ग) विश्वे(घ) च वाजिनो(ङ)(३)देवपत्नय ।१२॥
असौ तृतीय सवन(४) लोक साम च(५) रैवत ।
वैरूपश्चैव वर्षाश्च(६) शिशिरोऽथ ऋतुस्तथा(७) ॥१३॥
त्रयस्त्रिंशश्च(८)य स्तोम(च)(९) कृपा मसद्गणश्च य ।
छन्दश्च जगतीनाम्ना(१०) तथाऽतिच्छन्दसश्च(११)या(१२) ॥१४॥

---

(१) अथ पादज इति क० घ० ।
(२) आदित्यपुत्र साध्याश्च साद्धश्चेति क० घ० ।
(३) वाजिनौ इति ख० ।
(४) तृतीयसवनमिति क० घ० ।
(५) तृतीयः सर्व्वेन लोमसामा चेति ख० ।
(६) वैरूप्यश्चैव मर्षाश्चेति ख० ।
(७) शिशिरश्चैव यावगु इति क० घ० ।
(८) त्रयस्त्रियश्चेति ख० ।
(९) यत् स्तोम इति क०घ० ।
(१०) चैवेति क० घ० ।
(११) अतिस्कन्दसाश्चेति ग०, अतिच्छन्दसाश्चेति क० ख० घ० ।
(१२) यदिति क० घ० ।

---

(क) ऋ० १, ५९, ६ । (ख) ऋ० १, ८०, १६ । (ग) ऋ० १, ८०, १६ ।
(घ) ऋ० १, ३, ७-८ । (ङ) ऋ० १, ११, २ । (च) ऋ० १, ८, १० ।

यौरुपश्चाऽङ्करस्यैतत्सर्वमेव तु[१] यौरुपं।
एतस्यैव तु विज्ञेया देवाः संस्तविका[२]स्त्रयः[३] ॥१५॥
चन्द्रमाश्चैव वायुश्च पञ्चमं वत्सरं[४] विदुः।
केचित्तु निर्वपत्य[५]स्य सौर्य्यं वैश्वानरं हविः ॥१६॥
सौर्य्यवैश्वानरीयं हि तत् सूक्ष्मिव[६]दृश्यते।
ऋगर्द्धर्चोऽथ[७]वा पादो दृचो वा यदि वा त्र्यचः ॥१७॥
अनेन तु प्रवादेन[८] दृष्टा मूर्द्धन्वतास्तुतिः।
सूर्य्यवैश्वानराग्नीना[९] मैकात्म्यमिह दृश्यते ॥१८॥
हरणं तु रसस्यैतत्कर्मणाऽमुत्र[१०]रश्मिभिः।
यानीमानि च पश्यन्ति सर्वभूतानि तेजसा[११] ॥१९॥

---

(१) ह्येति ख०।
(२) संस्तापिकाः इति क० घ०।
(३) तये इति ख०।
(४) यच संवत्सरमिति क० घ०, पञ्चसंवत्सरमिति ख०।
(५) निर्व्वपते चेति क० घ०।
(६) न सूक्ष्मिह्येति क० घ०।
(७) ऋगर्द्धर्चश्चेति क० घ०, ऋग्वर्द्धर्चायेति ख०।
(८) प्रयोगेणेति क० घ०, प्रपादेनेति ख०।
(९) सौर्य्यवैश्वानराग्नीनामिति क० ख० घ० पुस्तकान्तरञ्च।
(१०) रश्मिभिश्चास्य कर्म्माऽमुत्र चेति ग० ङ० पुस्तकान्तरञ्च।
(११) येन भातिविभान्ति सूर्य्यभूतानि चक्षुषेति ख० ग० ङ० पुस्तकान्तरञ्च।

विभागमिममेतेषां विभक्तिस्थानसम्भवं ।
सम्यग्विज्ञाय(१)मन्त्रेषु तन्तु(२)कर्मसु योजयेत् ॥२०॥
अध्यापयन्नधीयानो मन्त्रां(३)श्चैवानुकीर्तयन् ।
स्थानं सालोक्यं सायुज्यमेतेषामधिगच्छति(४) ॥२१॥
अग्नेस्तु यानि सूक्तानि(५) पञ्च नामानि कारव(क) ।
यद्विभक्तिस्तथेन्द्रस्य प्राहुः सूर्यस्य सप्त च ॥२२॥
तेषां पृथङ्निर्वचनमेकैकस्येह कर्मजं ।
उच्यमानं यथान्यायं शृणुध्वमखिलं मया ॥२३॥
जातो यदग्रे भूतानामग्रणीरध्वरे च यत् ।
नाम्ना सन्नयते वाङ्ग(६) स्तुतोऽग्निरिति(७)सूरिभिः(ख) ॥२४॥
द्रविणं(ग) धनं बलं वापि प्रयच्छत्येन(८) कर्मणा ।

---

(१) विज्ञायमिति क० घ० ।
(२) तान्वेति क० घ० ।
(३) मन्त्रु इति क० घ० ।
(४) यत्र गच्छतीति ख० ग० ङ० पुस्तकान्तरेषु ।
(५) सूक्तेषु इति क० घ० ।
(६) सन्नियते चाग्रे इति क० घ० ।
(७) इत्येति क० घ० ।
(८) चेद प्रयच्छेदेनेति क० घ० ।

---

(क) ऋ० १, ११, ६ । (ख) ऋ० १,३१,१५ । (ग) ऋ० १,८३,१३ ।

तत्कर्म दृष्ट्वा[१]कुत्स[क]स्तु प्राहैनं द्रविणोदसं[घ] ॥२५॥
अयं तनूनपाद्[ग]ग्निरसौ हि तननात्तनुः[२][घ]।
ततस्तु मध्यमो जज्ञे स्थानेऽयं[३] मध्यमात्तत[४] ॥२६॥
अनन्तरं[५] प्रजामाहुर्नपा[ङ]दिति ऋषयः।
नपादसुष्य[६]चैवायमग्निस्तेन तनूनपात् ॥२७॥
पृथक्तेन ममल्लेन[७] यज्ञे यच्छास्यते[८] नृभिः।
स्तुवन्त्याग्नीषु तेनेमं नराशंस[च]न्तु कारवः[९][छ] ॥२८॥
पुनाति[१०] यदिदं विश्वमेवाग्निः[११] पार्थिवोऽथ च[१२]।

---

(१) कृत्वेति क० घ०।
(२) तपसा तनूरिति क० घ०।
(३) स्थानेऽयमिति ख०।
(४) जज्ञे यस्यैव मध्यमादिति क० घ०।
(५) अनन्तरामिति ङ० पुस्तकान्तरञ्च।
(६) अमुष्येति ख०।
(७) समासैरित्विति ख० ग० ङ० पुस्तकान्तरञ्च।
(८) वास्यते इति क० ख०।
(९) सूरयः इति क० घ०।
(१०) जानाति इति ख०।
(११) विश्वमेवाग्निरिति ख०।
(१२) पार्थिवोऽप्यचेति ख०।

---

(क) ऋ० १, १०६, ६। (ख) ऋ० ६, ८८, ३। (ग) १, १८८, २। (घ) ऋ० १, १२०, ११। (ङ) ऋ० १, १४३, १। (च) ऋ० १, १३, ३। (छ) ऋ० १, ११, ६।

वैश्वानरमृषिभि[१] स्तौन पवमान[क] इति स्तुत[२] ॥१९॥
भूतानि वेदयज्जातो जातवेदाऽथ[ख]कथ्यते[३] ।
यच्चैव[४]जातविद्यो[५]ऽभूद्वित्ता[६]जातोऽधिवेत्ति[७] वा ॥२०॥
विद्यते सर्वभूतैर्हि[८] यद्वा जातः[९] पुनः पुनः ।
तेनैव मध्यभागिन्द्रो[ग][१०] जातवेदा इति स्तुत ॥२१॥
पुनाति यदिदं विश्वं स्त्रोपोऽग्निः[घ] पार्थिवोऽप्सु सन् ।
वैश्वानरमार्थितैस्तस्मात्पवमान इति स्तुत.[११] ॥२२॥

---

(१) वैखानस ऋषिरिति ख० ।
(२) पुनातीत्यादि पवमान इति स्तुत इत्यन्तपाठ क० घ० पुस्तकयो र्नास्ति ।
(३) जातवेदाऽथ विद्यते इति क० घ० ।
(४) यद्वैव इति क० घ० ।
(५) जातं वेद इति क० घ० पुस्तकान्तरस्य ।
(६) वित्तमिति ख० ग० ङ० ।
(७) यद वेत्तीति क० घ० ।
(८) सर्व्वैतर्हीति क० घ० ।
(९) जातामिति क० घ० ।
(१०) मध्यभागेन्द्र इति ख० ग० ।
(११) अयं श्लोक ख० ग० ङ० पुस्तकेषु पुस्तकान्तरे च न विद्यते ।

---

(क) ऋ० ८, १०१, १४ । (ख) ऋ० १, ७७, ५ । (ग) ऋ० १, ९, ५ ।
(घ) ऋ० १, १, ९ ।

अणिष्ठ एष[१] यत्तु त्रीन्[२]व्याप्यैको व्योम्नि तिष्ठति ।
तेनैनमृषयोऽर्चन्त.[३] कर्मणा वायु[क]मब्रुवन् ॥२३॥
त्रीणीमान्यावृणोत्येको[४]मूर्त्तेन तु रसेन यत् ।
तथैनं वरुणं[ख] भक्त्या स्तुतिभ्वाङ्‌ः क्षपणवः[५] ॥२४॥
अरोदीद[६]न्तरिक्षे यद्विद्युदृष्टिं ददन्नृणां[७] ।
चतुर्भिर्ऋषिभिस्तेन रुद्र[ग] इत्यभिसंस्तुतः[८] ॥२५॥
चतुर्विधानां भूतानां प्राणो भूत्वा व्यवस्थितः ।
इष्टे चैवास्य सर्व्वस्य तेनेन्द्र इति स स्तुतः[९] ॥२६॥
इरां[घ] दृणाति[१०] यत्काले मरुद्भिः सहितोऽम्बरे ।

---

(१) अनिष्ठश्चैवेति क० घ० ।

(२) यत्तन्वा इति क०, यन्तु त्रीनिति ख० ङ०, यन्तन्वा इति घ० ।

(३) अर्चन्ते इति ख० ग० ङ० पुस्तकान्तरश्च ।

(४) त्रीनिमानावृणोल्लोकानिति क० घ० ।

(५) तु कारव इति क० घ० ।

(६) रोदस्यामिति क० घ० ।

(७) विद्युदृष्टिरदान्नृणामिति क० घ० ।

(८) अभिधीयते इति क० घ० ।

(९) एष श्लोक: क० घ० पुस्तकयोर्नास्ति ।

(१०) इरा ददातीति क० घ० ।

---

(क) ऋ० ५, ४१, ६ । (ख) ऋ० १, २, ७ । (ग) ऋ० १, ४३, ३ । (घ) ऋ० ५, ८३, ४ ।

रवेण महता युक्तस्तेनेन्द्रमृषयोऽब्रुवन् ॥३७॥
यदिमां प्रार्जयत्ये[1]को रसेनाम्बरजेन गां ।
कालेऽचिरौर्वैषयवर्षी[2]तेन पर्जन्य[क]माहतुः ॥३८॥
तर्पयत्येष यमोकान् जन्यो जनहितश्च यत् ।
परो[3]ऽजेता जनयिता यदाग्नेयस्तुतौ[4]जगौ[5] ॥३९॥
बृहन्तौ पाति यमोकावेष द्वौ मध्यमोत्तमौ ।
बृहता[6]कर्म्मणा तेन[7] बृहस्पति[ख] रितीडितः[8] ॥४०॥
ब्रह्म वाक् ब्रह्म सत्यञ्च ब्रह्म सर्व्वमिदं जगत् ।
पातारं ब्रह्मणस्तेन शौनहोत्रः स्तुवन् जगौ ॥४१॥
घर्षा[ग][9] चितिभ्यो विदधद्दृतुम्बविगत् चितौ[10] ।

(१) प्राजयतीति क० घ० ।
(२) चार्वी इति क० घ० ।
(३) पुर० इति ख० ।
(४) स्वाग्नेयस्तत इति ख० ग० ।
(५) एष श्लोकः क० घ० पुस्तकयोर्न दृश्यते ।
(६) बृहन्तीति ख० ।
(७) चैवेति क० घ० ।
(८) बृहतश्चैव वै पतिरिति क० घ० ।
(९) चमतमिति ग० ।
(१०) ब्रह्मणाशितिमादि चपिशात् चितौ इत्यन्तपाठः क० घ० पुस्तकयो-र्न दृश्यते ।

(क) ऋ० ५, ५१, ९ । (ख) ऋ० १, १०, १ । (ग) ऋ० ६, ६८, ९ ।

ददाति यदि सह्लेचे लृतावम्वरजं पुनः[१] ।
तेनैनमाह चेत्रस्य वामदेवः[क][२]स्तुवन् पतिं ॥४३॥
मनसेमन्तु यं दृश्यं[३] मध्यमं लोकमाश्रितं ।
ग्रंसत्[ख] सत्येन सत्ये[ग] वै स[४] एष स्तुतवानृतं[५][घ] ॥४३॥
रवेणान्तरसैः चित्रैः[६]स्थितो व्योम्न्येष मायया ।
ऋतस्य श्लोक[ङ] इत्येष पुनश्चैनं ततोऽब्रवीत् ॥४४॥
वास्तु[च] प्रयच्छंल्लोकस्य मध्यमस्य तु पाति यत्[७] ।
तेन वास्तोष्पतिं प्राह चतुर्भिरिममौर्वशः ॥४५॥
वाचा वेदा ह्यधीयन्ते वाचा छन्दांसि तत्र ह ।
अथो[छ] वाक् सर्व्वमेवेदं तेन वाचस्पतिः स्तुतः[८] ॥४६॥

---

(१) एतच्छ्लोकार्द्धं ग० ङ० पुस्तकयोर्न विद्यते ।
(२) याकादेवेति क० घ० ।
(३) मनसेममिसं दृश्यमिति क० घ०, मनसेयं वमादृश्यमिति ख०, मनसेमन्तु यद्दृश्यमिति ग० ।
(४) य इति ङ० पुस्तकान्तरस्य ।
(५) ऋषिरिति क० घ० ।
(६) रसं चितौ रवेणार्त्तौ इति क० घ० ।
(७) पातितः इति क० घ० ।
(८) वाचा वेदा ह्यधीयन्ते इत्यादि तेन वाचस्पति स्तुत इत्यन्तं क० घ०, पुस्तकयोर्न विद्यते ।

---

(क) ऋ० ४, ३६, १८। (ख) ऋ० ६, २३, ५। (ग) ऋ० ९, १०९, ६।
(घ) ऋ० १, ४१, ४। (ङ) ऋ० १, १९०, ४। (च) ऋ० ८, १५, ५।
(छ) ऋ० १, २८, ६।

न कुत[१]श्चैव[२] यद्दीनो हत्वा[क] तिष्ठति मध्यम ।
राहूगण ऋषिस्तेन प्राहैन गौतमो[३] दिति[ख] ॥४७॥
प्रजाभ्यस्त्वेष यच्छक्त एष वीर' शिव सुख[४]।
हिरण्यगर्भं[ग] स्तेनैनमृषिरर्धंतु[५]वाचकम् ॥४८॥
इह प्रजा प्रयच्छेति[६] सङ्गृहीता[७] प्रयाति[८] च ।
ऋषिर्विवस्वत पुत्त्र तेनाहैन पुन[९] र्यम[घ] ॥४९॥
मित्रोह्यत्य जना विश्वे यदिम[१०] पर्य्युपासते ।
मित्र[ङ] इत्याह तेनैन विश्वामित्र[च] स्तुवन् स्वयम् ॥५०॥
निदाघमासातिगमे यदृते भावति चितिम्[११] ।

---

(१) नकुत इति ख०, न ऊत इति ङ० ।

(२) एष इति क० घ० ।

(३) गौतम इति क० घ० ।

(४) प्रजाभ्यस्त्वेष यच्छम्मंकमिच्छन्नसा सखम् इति ख० ग० ।

(५) एव लिति ख०, इच्छम् इति ग० ङ० पुस्तकान्तरञ्च ।

(६) प्रयच्छन् स इति ख० ग०, नियच्छद्भिरिति क० घ० ।

(७) सङ्गृहीतेति ग० ङ०, पुस्तकान्तरञ्च ।

(८) सङ्गृहीताह याति इति घ० ।

(९) यम इति क० घ० ।

(१०) मैत्र हार्थैजंना विश्वे यदेते इति क० घ०, यदिमे इति ख० ।

(११) यदि मेभावक्रीलितमिति क० घ०, यदतेमा च नियाति इति ख० ।

---

(क) ऋ० १०, ९०, १ । (ख) ऋ० ४, ३, ११ । (ग) ऋ० १०, १२१, १ ।
(घ) ऋ० १, ७३, १० । (ङ) ऋ० १, ३१, ८ । (च) ऋ० ३, ५२, ८ ।

विश्वस्य जनयन् कर्म विश्वकर्मा[क] स तेन सः[१] ॥५१॥
सरांसि घृतवन्त्यस्य सन्ति लोकेषु यच्चिषु ।
सरस्वन्त[ख]मिति प्राह वाचं प्राहुः सरस्वतीम्[ग][२] ॥५२॥
प्राणभूतस्तु भूतेषु यद्वितत्येह[३] तिष्ठति ।
तेनैनं वेन[घ]माहर्षिर्वेनो[ङ]नामेह[४] भार्गवः ॥५३॥
ससृजे मासि मास्येनमभिमत्य[५]ततो मजन्[६] ।
तेनैनं मन्यु[च]रित्याह मन्युरेव तु तापसः ॥५४॥
यदन्तकाले भूतानामेक[७] एव नयत्यसून् ।
तेनासुनीति[छ]रुक्तोऽयं स्तुवता श्रुतबन्धुना ॥५५॥
निदाघमासातिगमे जन्म मध्ये भवत्यपां[८] ।
नप्तार[ज]माह तेनैनमृषिर्गृत्समदः[झ]स्तुवन्[९] ॥५६॥

---

(१) त्विति क॰ घ॰ ।
(२) इतीमन्तु ब्रूतो दीर्घ्यनमौर्वभ्रौ इति क॰ घ॰ ।
(३) यद्देनत्येष्विति ग॰, यद्देनलेन्द्विति ख॰ पुस्तकान्तरञ्च ।
(४) आह्वार्चन् वेनोऽन्यमेहेति क॰ घ॰ ।
(५) अभिवत्येति ख॰, अभिपत्येति ग॰ ।
(६) मासि मासीमामभितप्य तपोऽग्रजः इति क॰ घ॰ ।
(७) एष इति क॰ घ॰ ।
(८) मध्येऽस्य यत्त्वपामिति क॰ घ॰ ।
(९) त्वपामिति क॰ घ॰ ।

---

(क) ऋ॰ ८, ९८, २ । (ख) ऋ॰ १, १६४, ५२ । (ग) ऋ॰ ६, ६१, २ ।
(घ) ऋ॰ ९, २१, ५ । (ङ) ऋ॰ १, ८३, ५ । (च) ऋ॰ २, २४, १४ ।
(छ) ऋ॰ १०, १२, ४ । (ज) ऋ॰ २, ३५, १४ । (झ) ऋ॰ २, १९, ८ ।

पुष्यन् क्षितिं[१] पोषयति प्रणुदन् रश्मिभिस्तमः[२]।
तेनैनमस्तौत् पूषेति भरद्वाजस्तु पञ्चभिः ॥६५॥
त्रीणि भान्ति रजांस्यस्य यत्पदानि तु तेजसा[३]।
तेन मेधातिथिः प्राह विष्णु[क]मेनं[४] त्रिविक्रमम् ॥६६॥
कृत्वा सार्यं पृथग्याति[५] भूतेभ्यस्तमसोऽत्यये।
प्रकाशं किरणैः कुर्वंस्तेनैनं केशिनं[ख] विदुः ॥६७॥
सम्प्रत्येकैकशस्त्वेनं[६] यन्मन्यन्ते पृथङ्नराः।
विश्वे[ग] विश्वानर[७][घ] स्तेन कर्मणा स्तुतिषु स्तुतः ॥६८॥
वृषे[ङ]व कपिलो[८],[च] भूत्वा यन्नाकमधिरोहति।
वृषाकपि[छ]रसौ तेन विश्वस्मादिन्द्र उत्तरः[ज]।
रश्मिभिः कम्पयन्नेति वृषा वर्षिष्ठ[झ] एव सः ॥६९॥

---

(१) उद्यन् क्ष्मादिति क० घ०।
(२) ततः इति ख०।
(३) तेजसः इति क० घ०।
(४) एतमिति क० ख० घ० ङ०।
(५) सौर्यं पृथक् तेऽपी इति क० घ०।
(६) मां प्रत्येकैकशस्त्वेवेति क० घ०।
(७) वैश्वानरः (ञ) इति क० घ०।
(८) वृषेव कपिल इति क० घ०, वृषैककपिल इति ख० ग०।

---

(क) ऋ० १,१५४,१। (ख) ऋ० १,१०,३। (ग) ऋ० १,३,७-९।
(घ) ऋ० १,१८६,१। (ङ) ऋ० १,५९,६। (च) ऋ० १,७,८।
(छ) ऋ० १०,२७,१६। (ज) ऋ० १०,८६,१। (झ) ऋ० ४,१८,९।
(ञ) ऋ० १,१०,६।

साधाक्रकाले भूतानि स्वापयन्नस्तमेति यत्।
वृषाकपि[क]रितो[१] वा स्यादिति मन्त्रेषु दृश्यते ॥७०॥
त्रिषु धन्वे[ख]ति[२] ह्यैन्द्रेण प्रत्युक्तो वारिषाकपे[३]।
विष्णातेर्विशतेर्वा स्याद्वेवेष्टेर्व्याप्तिकर्म्मणः।
विष्णुर्निरुच्यते वातः सर्व्वं सर्व्वान्तरस्थ सः[४] ॥ ७१ ॥
पञ्च षड्विंशतिश्चैव यानि नामानि सप्त च।
मध्यगग्नीन्द्रसूर्य्याणां तान्युक्तानि यथाक्रमम् ॥ ७२ ॥
नैपातिकानां नाम्नां तु प्रागुक्तैर्नामलक्षणैः।
सम्पन्नानां पृथक्त्वेन परिसङ्ख्या न विद्यते ॥ ७३ ॥
पार्थिवी[ग] मध्यमा[घ] दिव्या वागपि त्रिविधा तु या।
तस्याः सूक्तानि नामानि यथास्थानं निबोधत ॥ ७४ ॥
इत्त्वन्तु भजते सूक्तमेता[५]नद्यः स्तुता[६]भुवि।

---

(१) स्यतः इति पुस्तकान्तरं।
(२) धात्वेतीति ग॰ त्रिवुधन्वेतीति ङ॰।
(३) वृषाकपे(ङ) इति ख॰।
(४) रश्मिभिः कम्पयन्नेतीत्यादि सर्व्वं सर्व्वान्तरस्थ स इत्यन्तपाठः क॰ घ॰ पुस्तकयोर्नेष्यते।
(५) ह्येषा इति क॰ घ॰, एषा इति ख॰ ग॰।
(६) तदेति क॰ घ॰।

---

(क) ऋ॰ १०, ८७, १६। (ख) ऋ॰ १, ३८, ७। (ग) ऋ॰ ८, २५, ६। (घ) ऋ॰ ६, २५, १। (ङ) ऋ॰ १०, ८६, २०—२२।

यं वै वैन[१] भजन्त्यापो[२] यदा[३] चौषधयः सदा[४] ॥ ७५ ॥
अरण्यानी[क] च रात्री[ख] च श्रद्धा[ग] घोषाः[५][घ] सरस्वती ।
पृथिवी चैव नामैषा भूत्वा[ङ]द्या च भजन्ति च[६] ॥ ७६ ॥
अग्नायी[च]नामतोऽप्येषा[७] भूत्वाग्नेयेषु[८] केषुचित् ।
स्तुता निपात[छ]मात्रेण तत्र तत्रेह दृश्यते ॥ ७७ ॥
मध्ये सत्यदिति[ज]र्वाक्च[९] भूत्वा चैषा सरस्वती ।
समग्रं भजते सूक्तं त्रिभिरेव तु नामभिः ॥ ७८ ॥
एषैव दुर्गा भूत्वर्चं[झ] कृत्वा[१०] स्यात् सूक्तभागिनी[११] ।

---

(१) यदा चैनमिति क० ख० घ०, यत्र वैनमिति ग० ।
(२) भवन्त्याप इति ख० ।
(३) तदेति क० घ० ।
(४) तथेति क० घ० ।
(५) चैषेति क० ख० घ० ।
(६) भूत्वा या भजते स्तृचीति क०, व्याभजते स्तृचीति घ० ।
(७) अग्नायीत्वा च नामैषेति क० घ० ।
(८) भूत्वाग्नेयीष्विति क० घ० ।
(९) वाक्यमिति क० घ०, मध्यसत्यदितिर्वाक्पेति ख० ।
(१०) कृत्येति ङ० पुस्तकान्तरस्थ ।
(११) एषैव दुर्गां भूत्वर्चमिति श्लोकार्द्धं क० घ० पुस्तकयोर्न विद्यते।

---

(क) ऋ० १०, १४६, ४। (ख) ऋ० १, ११३, १। (ग) ऋ० ७, ९२, १४ ।
(घ) ऋ० १, ४६, १ । (ङ) ऋ० १०, १६१, ५। (च) ऋ० ५, ४६, ८।
(छ) ऋ० ४, ५५, ३। (ज) ऋ० १, ३३, २। (झ) ऋ० ७, ६६, ११ ।

तथामानि य(१) मिन्द्राणी सरमा(क)रोमशो(ख)र्व्वशी(ग) ॥७९॥
भवत्पथ्या(घ)सिनीवाली(२)(ङ) राका(च) चानुमतिः(३)(छ) कुहूः।
गौर्धेनुर्देवपत्न्योऽग्न्या(४) पथ्या स्वस्त्यय(५) रोदसी।
नैपातिकानि ऋग्भाञ्जि(६) येषां नामानि कानिचित् ॥८०॥
यदा तु वाग्भवत्येषा(७) सूर्य्याऽसुं लोकमाश्रिता।
तदा सूक्तमुषा(८)(ज) भूत्वा सूर्य्या(झ) च भजतेऽखिलम्। ८१॥
वृषाकपाय्यृचं(ञ) भूत्वा सरण्यू(ट)र्द्वे च ते भुवम्(९)।

---

(१) सूक्तार्धानीयमिति क० घ०। सूक्तार्धाक्षीयमितिपाठो विशुद्ध।
(२) ऋचस्वघ्न्या(ठ)सिनीवालीति क० घ०, भवस्वग्न्या सिनीवालीति ख०, भवत्ययुग्ना सिनीवालीति ग०।
(३) राकोचानुमतिरिति क०, राकोचानुमितिरिति घ०, राका चानुमितिरिति पुस्तकान्तरम्।
(४) गोरीगौर्धेनुपत्न्योग्न्या इति क० घ०, देवपत्न्योम्रा इति ङ० पुस्तकान्तरञ्च।
(५) स्वस्ति चेति ख०,स्वस्त्येति ग० ङ० पुस्तकान्तरञ्च।
(६) नैपातिकान् ऋचग्भाञ्जीति क०।
(७) भजत्येवेति क० घ०।
(८) सूक्तमुखेति ख० ग०, तथा सूक्तमुषेति ङ० पुस्तकान्तरञ्च।
(९) त्वेव तदृचमिति क० घ०, ते भुवमिति पुस्तकान्तरम्।

---

(क) ऋ० १, ६२, ३। (ख) ऋ० १, १२६, ७। (ग) ऋ० ५, ४१, १९।
(घ) ऋ० ३, ५४, ५। (ङ) ऋ० १९, ३२, ८। (च) ऋ० ११, ३२, ८।
(छ) ऋ० १०, ५९, ६। (ज) ऋ० २, १८२, ६। (झ) ४, ४४, १।
(ञ) ऋ० ७, ६६, ११। (ट) ऋ० १०, १७, २। (ठ) ऋ० ७,८१,४।

निपातमात्रं भजते द्यौश्च[१] पृथिवी सती ॥ ८२ ॥
सूर्य्यामिव[२] सतीमेतां गौरीं वाचं सरस्वतीम् ।
पश्यामो वैश्वदेवेषु निपातेनैव केवलाः[३] ॥ ८३ ॥
घोषा[क] गोधा[ख] विश्ववारा[ग] पालोपनिषदन्निषत्[४] ।
ब्रह्मजाया[घ] जुहूर्[ङ]नामागस्त्यस्य[५][च] स्वसाऽदितिः[छ] ॥ ८४ ॥
इन्द्राणी चेन्द्रमाता[६] च सरमा[ज] रोमशो[झ]र्व्वशी[ञ] ।
लोपामुद्रा[ट] च नद्यश्च यमी[ठ] नारी च शाश्वती[७][ड] ॥ ८५ ॥
श्रीर्लक्ष्मीः सार्पराज्ञी[८] वाक् श्रद्धा मेधा च दक्षिणा ।
रात्री सूर्य्या[ढ] च सावित्री ब्रह्मवादिन्य ईरिताः ॥ ८६ ॥

---

(१) क्वचित्तु इति क० घ०, द्युवश्चेति ग० ।
(२) पृथिवी त्विति क० घ० ।
(३) केवलामिति क० घ० ।
(४) पालोपनिषन्निषत् इति क० ख० घ० ङ० ।
(५) छन्दोऽनुरोधात् नाम ष्वगस्त्यस्येति पाठ समीचीन' ।
(६) चन्द्रमातेति ख० ।
(७) शश्वतीति क० घ०, तथैव चेति ख० ।
(८) सार्व्वराज्ञेति ख० ।

---

(क) ऋ० १०, ४०, ५ । (ख) ऋ० ८, ६९, ९ । (ग) ऋ० ५, ८, ३ ।
(घ) ऋ० १०, १०९, ३ । (ङ) ऋ० १, ५८, ४ । (च) १०, ६०, ६ ।
(छ) ऋ० १, ४३, २ । (ज) ऋ० १, ६२, ३ । (झ) ऋ० १, १२६, ७ ।
(ञ) ऋ० ५, ४२, १९ । (ट) ऋ० १, १७९, ४ । (ठ) ऋ० १०, १०, ९ ।
(ड) ८, १, ३४ । (ढ) ऋ० ४, ४४, १ ।

स्तवकः प्रथमस्तासां[१] वर्गं[२] तुष्टाव देवताः ।
ऋषिभिर्देवताभिश्च समूदे[३]मध्यमो गणः ॥ ८७ ॥
आत्मनो भाववृत्तानि जगौ वर्गस्तथोत्तमः ।
उत्तमस्य तु वर्गस्य य ऋषिः सैव[४] देवता[५] ॥ ८८ ॥
आत्मानमस्तौद्वर्गस्तु देवतां यस्तथोत्तमः[६] ।
तस्मादात्मस्तवेषु स्याद्य ऋषिः सैव[७] देवता ॥ ८९ ॥
संवादेष्वाह वाक्यं यः स तु तस्मिन् भवेदृषिः[८] ।
यस्तेनोच्येत वाक्येन देवता तत्र[९] सा भवेत् ॥ ९० ॥
उच्चावचेषु चार्थेषु निपाताः समुदाहृताः ।
कर्मोपसंग्रहार्थे च[१०] क्वचिच्चौपम्यकारणात् ॥ ९१ ॥
ऊनानां पूरणार्थो वा[११] पादानामपरे क्वचित् ।

---

(१) तासामिति ख० ।
(२) वर्गा इति क० घ० ।
(३) समूहे इति क०, समुद्रे इति ख० ।
(४) ऋषिस्सैव चेति घ० ।
(५) आत्मनो भाववृत्तानीत्यादि य ऋषि सैव देवता इत्यन्तपाठ क० घ० पुस्तकयोर्न विद्यते ।
(६) देवता चोत्तमस्तु य इति क० घ० ।
(७) आत्मस्तवेष्वेवं भवेदृषैवेति क० घ० ।
(८) भवत्यृषिरिति क० घ० ।
(९) तेष्विति क० घ० ।
(१०) कर्म्मोपसंग्रहणार्थेष्विति क० घ० ।
(११) पूरणार्थेष्विति क० घ० ।

मिताक्षरेषु ग्रन्थेषु पूरणार्थास्त्वनर्थका[१] ॥८२॥
कमीमिद्विति[२] विज्ञेया ये त्वनेकार्थकाश्च ते[३] ।
इव न चित्तु चत्वार[४] उपमार्था भवन्त्यमी[५] ॥८३॥
उपमार्थे[६] नकारस्तु क्वचिदेव निपात्यते ।
मिताक्षरेषु ग्रन्थेषु प्रतिषेधस्त्वनेकश[७] ॥८४॥
इयन्त[८] इति सङ्ख्यान निपातानां न विद्यते ।
प्रयोजनवशा ह्येते[९] निपात्यन्ते पदे पदे ॥८५॥
उपसर्गास्तु विज्ञेयाः क्रियायोगेषु[१०] विंशतिः ।
विशेषयन्ति ते त्वर्थ[११] नामाख्यातविभक्तिभि.[१२] ॥८६॥

---

(१) पूरणार्थे त्वनर्थकाः इति क॰ घ॰ ।
(२) कामिमिद्वतीति ख॰ ।
(३) त्वन्ये सार्थकाः स्तुतौ इति क॰ घ॰ ।
(४) इवोनचिन्नुचत्वार इति ग॰ । इवेनचिन्नुचत्वार इति घ॰ ।
(५) भवन्ति ते इति ख॰ ग॰ घ॰ ।
(६) उपमार्थे इति ग॰ घ॰ ।
(७) ध्यनकशः इति ख॰ ग॰ घ॰ ।
(८) इयन्तु इति ख॰ ।
(९) वशात् प्रकरणेष्वेते इति ग॰ घ॰ । वशा प्रकरणेष्वेते इति ख॰ ।
(१०) क्रियायोगेनेति ख॰ ग॰ घ॰ ।
(११) ते त्वर्थमिति ग॰ घ॰ । ह्यर्थानिति ख॰ ।
(१२) विभक्तिभः इति ख॰ । विभक्तिषु इति ग॰ ग॰ घ॰ ।

वाक्यजं व्यतिकीर्णञ्च निर्वाच्यं पञ्चधा पदम् ॥१०६॥
द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः ॥१०७॥
विग्रहान्निर्वचः कार्यं समासेष्वपि तद्धिते।
प्रविभज्यैव निब्रूयाद्दण्डार्हो दण्ड्य इत्यपि ॥१०८॥
भार्य्या रूपवती चास्य रूपवद्भार्य्य इत्यपि।
इन्द्रश्च सोमश्चेत्येवमिन्द्रासोमौ निदर्शनम् ॥१०९॥
शब्दरूपं पदार्थश्च व्युत्पत्तिः सङ्गतिर्गुणः।
सर्व्वमेतदनेकार्थं दृश्यानवगमे गुणः ॥११०॥
सामान्यवाचिनः शब्दा विशेषे स्थापिताः क्वचित्।
पलायने यथावृत्ति कोनुमर्या इतीष्यते ॥१११॥
विशेषवाचिनस्त्वन्ये सामान्ये स्थापिताः क्वचित्।
हिमेनाग्निमिति मन्त्रे हिमशब्दो निदर्शनम् ॥११२॥
पदमेकं समादाय द्विधा कृत्वा निरुक्तवान्।
पुरुपादः[ख] पदं यास्को वृचे वृचे इति त्वृचि ॥११३॥
अनेकं सत्तया चान्यदेकमेव निरुक्तवान्।
अरुणो मासकृन्मन्त्रे मासकृदित्यदेन तु ॥११४॥
पदव्यवायेऽपि पदे एकीकृत्य निरुक्तवान्।
गर्भं निधानमित्येते स जामय[ग] इति त्वृचि ॥११५॥
पदजातिरविज्ञाता सः पदार्थः सिसासति।

---

(ख) ऋ० १०, २७, २२। (ग) ऋ० १,२२,१६।

वाक्यजं व्यतिकीर्णञ्च निर्वाच्यं पञ्चधा पदम् ॥१०६॥
द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः ॥१०७॥
विग्रहान्निर्वचः कार्यं समासेष्वपि तद्धिते।
प्रविभज्यैव निब्रूयाद्दण्डार्हो दण्ड्य इत्यपि ॥१०८॥
भार्या रूपवती चास्य रूपवद्भार्य्य इत्यपि।
इन्द्रश्च सोमश्चेत्येवमिन्द्रासोमौ निदर्शनम् ॥१०९॥
शब्दरूपं पदार्थश्च व्युत्पत्तिः प्रकृतिर्गुणः।
सर्व्वमेतदनेकार्थे ह्यालवगमे गुणाः ॥११०॥
सामान्यवाचिनः शब्दा विशेषे स्थापिताः क्वचित्।
पलायने यथाहन्ति कौतुमर्षा इतीर्य्यते ॥१११॥
विशेषवाचिनस्त्वन्ये सामान्ये स्थापिताः क्वचित्।
हिमेनाग्निमिति मन्त्रे हिमशब्दो निदर्शनम् ॥११२॥
पदमेकं समादाय द्विधा कृत्वा निरुक्तवान्।
पुरुषादः[क] पदं यास्को वृचे वृचे इति लृचि ॥११३॥
अनेकं सत्तया चान्यदेकमेव निरुक्तवान्।
अरुणो मासकृन्मन्त्रे मासकृद्विग्रहेण तु ॥११४॥
पदव्यवायेऽपि पदे एकीकृत्य निरुक्तवान्।
गर्भे निधानमित्येते न जामय[ख] इति लृचि ॥११५॥
पदजातिरविज्ञाता त्वः पदार्थः सिनामनि।

(क) ऋ० १०, २७, २२। (ख) ऋ० १, २३, १६।

स्वरानवगमो धायि[क]( वनेनेत्यृचि दर्शितः ॥११६॥
पूष्णःपोषं[ख] नराशंसं[ग] व्याख्यानः पृथिवीति च ।
निरछ्नतेति प्रभृतिस्वर्यादासीत् क्रमो यथा ॥११७॥
वर्णस्य वर्णयोर्लोपो वह्नां व्यञ्जनस्य च ।
अचाणीतिकपिर्नाभाद्[घ]नोयामित्यघास्तु च ॥११८॥
अर्थात् पदं स्वाभिधेयं पदाद्वाक्यार्थनिर्णयः ।
पदसङ्घातजं वाक्यं वर्णसङ्घातजं पदम् ॥११९॥
अर्थात् प्रकरणाल्लिङ्गादौचित्याद्देशकालतः ।
मन्त्रेष्वर्थविवेकः स्यादितरेष्विति च स्थितिः ॥१२०॥
इति नानान्वयोपायैर्नैरुक्तेयो यतेत सः ।
जिज्ञासुर्ब्रह्मणो रूपमपि दुष्कृत् परं व्रजेत् ॥१२१॥
यथेदमग्रे नैवासीदसदप्यथ वापि सत् ।
जज्ञे यथेदं सर्वं तद्भाववृत्तं वदन्ति तु ॥१२२॥
भावप्रधानमाख्यातं षड्विकारा भवन्ति ते ।
जन्मास्तित्वं परीणामो वृद्धिर्ह्रानं विनाशनम् ॥१२३॥
एतेषामेव पश्चात्तु येऽन्ये भावविकारजाः।
ते यथावाक्यमप्यूह्याः सामर्थ्यान्मन्त्रवित्तमैः ॥१२४॥
देवानाञ्च पितॄणाञ्च नमस्कारैस्तथैव च ।
अथ व्यस्तं समस्तं वा शृणु व्याहृतिदैवतम् ॥१२५॥
*व्याहृतीनां समस्तानां दैवतन्तु प्रजापतिः ।*

(क) ऋ॰ १, १५८, ३। (ख) ऋ॰ ५, २, ७। (ग) ऋ॰ १, १३, ३।
(घ) ऋ॰ ८, ७, ६।

व्यस्तानामयमग्निश्च वायुः सूर्य्यश्च देवताः ॥१२६॥
वाग्दैवत्योऽथ वायैन्द्रो यदि वा परमेष्ठिनः।
ओङ्कारो वैश्वदेवो वा ब्राह्मो दैवः क एव वा) ॥१२७॥
भावप्रधानमाख्यातं षट्प्रकारा भवन्ति तु।
जन्मास्तित्वं परीणामो वृद्धिर्हानिर्विनाशनम् ॥१२८॥
एतेषामेव वर्णाः स्युरन्ये भावविकारजाः।
यथावचनमप्यूह्याः सामर्थ्यान्मन्त्रवित्तमैः ॥१२९॥
त्रीण्येव लोके लिङ्गानि पुमान् स्त्र्यथ नपुंसकम्।
नाभसूक्तप्रदेशेषु योऽयं प्रकरणं त्वनु ॥१३०॥
तेषां तु नामभिर्लिङ्गैर्यद्वर्णं सर्वनामभिः।
कुर्वन्नामानि वै वाङ्नरन्यदेवत्यया यथा ॥१३१॥
यथेदमग्रे नैवासीदसद्वाप्यथवापि सन्।
जज्ञे यथेदं सर्वन्तु भाववृत्तं प्रचक्षते ॥१३२॥
वाग्दैवत्योऽथ वायैन्द्रो यदि वा परमेष्ठिनः।
ओङ्कारो वैश्वदेवो वा ब्राह्मो दैवः क एव वा ॥१३३॥
व्याहृतीनां समस्तानां दैवतं तु प्रजापतिः।
व्यस्तानामयमग्निश्च वायुः सूर्यश्च देवताः ॥१३४॥

इति शौनकाचार्यकृतौ बृहद्देवतायामुपोद्घातप्रकरणम्।

---

आग्नेयं प्रथमं सूक्तं मधुच्छन्दस आदितः[१]।
ज्ञेयास्त्वन्योऽन्यदेवत्या[२] सूचाः मप्तात उत्तराः ॥१२५॥
वायव्यः प्रथमस्तेषामैन्द्रवायव उत्तरः।
मैत्रावरुण आश्विन्य[३] ऐन्द्रो यः पञ्चमस्तृचः[४] ॥१२६॥
[५]नान्यः षष्ठादिद्विलिङ्गो गायत्रोऽन्यस्तु यस्तृचः[६]।
बहुदैवतमन्यत्तु[७] वैश्वदेवेषु मस्यते ॥१२७॥
सुग्रेदुवस्यो[८]ग्रार्याते[क] गोतमेऽथ स्वजिश्वनि[ख]।
अवत्सारे[ग] परु[घ]च्छेपे[९] अत्रौ[१०] दीर्घतमस्यु[ङ]पौ[११] ॥१२८॥

---

(१) आर्षकमिति ग० ङ०। घ० पुस्तकोद्धृतपाठश्च।
(२) सर्वेऽन्यदेवत्या इति ग० ङ०। घ० उ०।
(३) *मैत्रावरुणोऽथाश्विन इति ख० ग० ङ०। घ० उ०।*
(४) त्विन्द्रोवो वैश्वदेवत इति ख०। अपैन्द्रोऽवो वैश्वदेवक इति ग०ङ०।
(५) तन्नामा विश्वलिङ्गो वेति ग० ङ०। घ० उ०।
(६) गायत्रोऽस्यपरस्तृचः इति क० घ० च०।
(७) बहुदेवतमन्यस्त्विति क० घ०। बहुदैवत्यमन्यत्त्विति ग०।
(८) सुग्रेऽथ वात्से इति ग० ङ०। घ० उ०।
(९) परुच्छेपे इति ग०। अवत्सारपरच्छेपे इति ख०।
(१०) पुत्रे इति ख० ग० ङ०। घ० उ०।
(११) तव् एथौ इति ख०।

---

(क) ऋ० १, ५१, ७। (ख) ऋ० ८, ४६, १०। (ग) ऋ० ५, ४४, १०।
(घ) ऋ० १०, १००, ५। (ङ) ऋ० १, १५८, ६।

वसिष्ठे नाभानेदिष्ठे[क] गये[ख] मेधातिथौ मनौ[ग] ।
कक्षीवति[(घ)१] विहव्ये[ङ] च बहुष्वन्येषु चर्षिषु[२] ॥१३९॥
अगस्त्ये बृहदुक्थे[च] च विश्वामित्रे च[३] गाथिनि[छ] ।
दृश्यन्ते विप्रवादास्तु[४] तासु तासु स्तुतिष्विह ॥१४०॥
बह्वीनां सन्निपातस्तु यस्मिन्मन्त्रे प्रदृश्यते ।
आचार्यौ यास्कशाण्डिल्यौ वैश्वदेवं तमाहतुः[५] ॥२४१॥
पादं वा यदि वार्धर्चमृचं वा सूक्तमेव वा ।
वैश्वदेवं वदेत्सर्वं यत्किञ्चिद्बहुदैवतं[६] ॥१४२॥
ऋषिभिर्देवताः सर्वा विद्याभिः स्तुतिभिः स्तुताः ।
संज्ञा तु विश्वमित्यासां[७] सर्वासाममिरे निपातिता[८] ॥१४२॥

---

(१) काक्षीवते इति ख० । कक्षीवते इति घ० ङ० ।
(२) चर्षिषु इति ख० ग० ङ० । घ० ङ० ।
(३) विश्वामित्रेऽप्येति ख० ङ० । घ० ङ० ।
(४) विप्रपादास्वेति क० घ० च० ।
(५) तदाहतुरिति ग० ङ० । घ० ङ० ।
(६) बहुदैवतमिति क० च० ।
(७) विश्वमित्येषेति ख० ग० ङ० । घ० ङ० ।
(८) निपातितौ इति ङ० । घ० ङ० ।

---

(क) ऋ० १०,६१,१८ । (ख) ऋ० ६, २, ८ । (ग) ऋ० १, ३६, १९ ।
(घ) ऋ० १, ५१, १३ । (ङ) ऋ० १, १०८, ६ । (च) ऋ० ७, २०, १० ।
(छ) ऋ० १, ८, १ ।

सारस्वतः सप्तमस्तु[१] एताः प्रउगदेवताः[२] ।
अविद्यमान ऊने वा प्रउगेष्वत आवपेत्[३] ॥१४४॥
सरस्वती तु द्विविधा ऋक्षु सन्दृश्यते स्तुता[४] ।
नदीवच्चैव वाग्वैव तयेवनुभयं स्मृतं[५] ॥१४५॥
[६]सुरूपकृत्नु[क]मित्यैन्द्रं सप्त चान्योऽन्यतः परं ।
पञ्चादश[७] स्वधामिति मारुत्योऽनन्तरा ऋचः ॥१४६॥
एका वीलु[ख]चिदिन्द्राय[८] मरुद्भिः सह गीयते ।

---

(१) सारस्वतस्तु सप्तम इति ग० ङ० । घ० उ० ।

(२) सारस्वतस्तु उत्तरमष्टमा प्रउगदेवता इति ख० ।

(३) अविद्यमान इत्यादिश्लोकार्द्धं ख० ग० ङ० चिह्नितपुस्तकेषु नोपलभ्यते ।

(४) ऋक्षु सर्वासु सा स्तुतेति ग० ङ० । घ० उ० ।

(५) नदीवद्देवतावच्च सूत्राचार्य्यस्तु शौनक इति ख० । अत्र सूत्राचार्य्य इति ग० ङ० । घ० उ० ।

(६) इत. पूर्वं ख० ग० ङ० । घ० उ० चिह्नित पुस्तकेषु नदीवन्निगमा. धट्ते सप्तमो नेत्युवाच ह । अन्येकाच दृषद्वत्या चित्रश्च सरस्वती । इयं शुष्मेभिरित्येतं मेने यास्कस्तु सप्तमम् । पवीरा सारस्वतस्यैता याज्या मैत्रायणीयके । प्राधान्याद्धविषः पश्यन् वाच एवेतरोऽब्रवीत् । इत्यधिकं पठ्यते ।

(७) वषादश इति ख० पषादश इति घ० ।

(८) एकाविद्युचिमिन्द्रीयमिति क० । एकाविड्रुचिदिन्द्रायेति ख० । एकापोलुचिदिन्द्रायेति ग० । एकावालुचिदिन्द्रायेति ङ० ।

---

(क) ऋ० २, ४, १ । (ख) ऋ० १, ६, ५ ।

तस्या एकान्तरायास्तु अर्धर्चन्त्यो[1]द्विदैवत ॥१४७॥
मरुद्गणप्रधानोऽयं हौन्द्रस्तु[2] विचिकित्सित ।
मन्दू[क][3]समानवर्चस्यौ[4] मन्दुनावासवर्चसा ॥१४८॥
मन्दू इति[ख] प्रपश्यन्ति[5] येषामेष[6] द्विदैवत ।
एकदैवत्यमाम्नायो विज्ञेयाध्ययनात् पद[7] ॥१४९॥
रोदसी[ग] देवपत्नीनामथर्वाङ्गिरसे[घ] यथा[8]।
[9]मरुद्गणप्रधानेयमाचार्याणां स्तुतिर्मता ॥१५०॥
मरुद्गणप्रधानत्वादिन्द्रस्तु विचिकित्स्यते[10] ।

---

(१) अर्धर्चोऽन्त्योद्विदैवत इति घ० ङ० । ङ० ।
(२) हौत्य चेति ख० ग० । घ० ङ० । मरुद्गणप्रधानो हौत्य चेन्द्र इति ङ० ।
(३) मन्दु इति ख० ।
(४) समानवर्चस्यमिति ग० । समानवर्चसा इति घ० ।
(५) मधू इति प्रपश्यन्तीति क० घ० ङ० च० ।
(६) एषमेवेति ख० । येषामेवेति ग० ङ० । घ० ङ० ।
(७) विज्ञायात्ययनात्पदमिति ख० । विज्ञानाध्ययनात्पदमिति क० घ० ङ० ।
(८) रोदसी इत्यादि श्लोकार्द्धं क० घ० च० चिह्नितपुस्तकेषु नोपलभ्यते ।
(९) मरुद्गणेति ङ० ।
(१०) विचिकित्सितः इति ख० ग० । घ० ङ० ।

---

(क) ऋ० १, ६, ७ । (ख) ऋ० १ ६, ० । (ग) ऋ० १, १६७, ५ ।
(घ) ऋ० १०, १२, १ ।

मरुद्गणं महेन्द्रस्य(१) समांशं सकल विदुः(२) ॥१५१॥
अग्निमित्यग्निदैवत्यं पादस्तच द्विदेवत.(३) ॥
निर्मथ्याहवनीयार्थावग्निनाग्नि.(४) समिध्यते ॥१५२॥
द्वितीये द्वादशर्चे तु प्रत्यृचं देवताः स्तुताः।
स्तूयन्ते ह्यग्निना सार्द्धं तासां नामानि मे शृणु(५) ॥१५३॥
प्रथमायां स्तुतस्त्विध्मो(क)(६) द्वितीयायां तनूनपात्(ख)।
नराशंस(ग) तृतीयायां चतुर्थ्यां स्तूयते त्विळः(घ) ॥१५४॥
बर्हि(ङ)रेव तु पञ्चम्या द्वारो(च) दैव्यस्ततोऽन्यया(७)।
नक्तोषा सा तु सप्तम्यामष्टम्यां तु स्तुतौ(८) सह ॥१५५॥

---

(१) मरुद्गणमहेन्द्रस्येति घ०। मरुद्गणेनेन्द्रस्येति क० ख० घ० च०।

(२) समास प्राकर्ल विदुरिति क० घ० च०।

(३) पादस्तत्र द्विदेवत इति ग० ङ०। घ० ङ०।

(४) निर्मथ्याहवनीयार्थां ग्निनाग्निरिति क० घ०। निर्मथ्याहवनीयार्थे ऽग्निनाग्निरिति च०।

(५) श्रूयते देवताऽग्नासा नामानि शृणुते ह्न इति क० घ० घ०।

(६) समिद्धस्त्विति क० घ० च०।

(७) अन्ययेति ख०, अन्यथा इति च०।

(८) सस्तुतौ इति ग०, स स्तुतौ इति ङ० पुस्तकान्तरञ्च।

---

(क) ऋ० १३, ४५, २। (ख) ऋ० १, १३, २। (ग) ऋ० १, १३, ३।
(घ) ऋ० १, १२८, १। (ङ) ऋ० ३, ५३, १०। (च) ऋ० ५, ५, ५।

दैव्या[क]विति[१] तु होतारौ नवम्यामृचि संस्तुताः।
तिस्रो देव्यो दशम्यां तु ज्ञेयस्त्वष्टै[ख]व तु स्तुतः ॥१५६॥
एकादश्यां तु सूक्तस्य स्तुति[२] विद्याद्वनस्पतिम्[ग]।
द्वादश्यां तु स्तुता देव्यो विद्यात्स्वाहाकृती[घ]रिह[३] ॥१५७॥
सूक्तेऽस्मिन् प्रत्यृचं यास्तु[४] देवताः परिकीर्त्तिताः।
ता एव सर्वास्वाप्रीषु द्वितीयाया[५] विकल्प्यते[६]॥ १५८॥
प्रैषैः सहैव चैतानि ह्येकादश प्रचक्षते[७]।
यजुःषु[८] प्रैषसूक्तं वा दशैतानीतराणि तु ॥१५९॥
सौत्रामणानि[९] तु त्रीणि प्राजापत्याश्वमेधिके।

---

(१) दैव्याविति ख॰ ङ॰।
(२) स्तुतमिति ङ॰।
(३) देवी विद्यात्स्वाहाकृतीरितीति ग॰।
(४) प्रत्यृचे यास्त्विति क॰ ग॰ घ॰।
(५) द्वितीया त्विति ख॰।
(६) विकल्पते इति ख॰ ग॰ घ॰।
(७) प्रैषैः सहाप्रीसूक्तानि तान्येकादश सन्ति चेति ख॰ ग॰ ङ॰। सहाप्री इत्यत्र सहैवेति ख॰।
(८) यजूंषीति ख॰ ग॰ ङ॰।
(९) सौत्रामणीतीति क॰ ग॰ घ॰।

---

(क) ऋ॰ १, २७, १२। (ख) ऋ॰ १, ३२, २। (ग) ऋ॰ ६, ४८, १७।
(घ) ऋ॰ १, १८८, ११।

पुरुषस्य च यन्मेधे यजुःष्वेव तु तच्च षट्[1] ॥१६०॥
ऋच्येव प्रैषसूक्तं स्यान्न यजुःष्वाद्रियेत तत्[2] ।
तेषां प्रैषकृतं[3] यच्च यच्च[4] दीर्घतमा जगौ ॥१६१॥
मेधातिथं[5] यदुक्तं च चोष्वेवोभयवन्ति तु ।
ऋषिर्गृत्समदो[क][6] यच्च वाध्र्यश्व[ख]स्तु[7] यदुच्यते ॥१६२॥
नराशंसवदत्रि[ग]स्तु[8] ददृशेऽथ[9] यदौर्वशः ।
तनूनपाद्गस्त्यस्तु[10] जमदग्नि[घ]स्तु[11] यज्जगौ ॥१६३॥
विश्वामित्र[ङ] ऋषिर्यच्च जगौ वै काश्यपोऽसितः[च] ।
मेधातिथेस्तृचां[12] यास्तु प्रोक्ता द्वादश देवताः ॥१६४॥

---

(१) तानि षडिति ख० ग० ङ० ।
(२) यजुष्वादि येषु चेति क० घ० च० ।
(३) प्रैषगतं सूक्तमिति ग० ।
(४) यच्च तच्चेति ख०, यत्तु तच्चेति ङ० पुस्तकान्तरञ्च ।
(५) मेधातिथेरिति ख०, मेधातिथाविति ग० ङ० पुस्तकान्तरञ्च ।
(६) ऋषौ गृत्समदे इति ग० ङ० पुस्तकान्तरञ्च ।
(७) वाध्र्यश्वे चेति ग० ङ० पुस्तकान्तरञ्च ।
(८) चात्रेश्चेति ख० ग० ङ० पुस्तकान्तरञ्च ।
(९) ददर्श चेति ख० ग० ङ० पुस्तकान्तरञ्च ।
(१०) चेति ग० ङ० पुस्तकान्तरञ्च ।
(११) वामदेवस्येति ग०, जामदग्न्यस्येति ङ० पुस्तकान्तरञ्च ।
(१२) ऋचः इति ख० ग० ङ० पुस्तकान्तरञ्च ।

---

(क) ऋ० २, १९, ८ । (ख) ऋ० १०, ६९, ५ । (ग) ऋ० १, १३९, ९ ।
(घ) ऋ० ३, ५३, १५ । (ङ) ऋ० ३, ५३, ९ । (च) ऋ० १, ४६, १० ।

सम्पद्यन्ते यथाग्नीकाः(१) सम्पदं तां निबोधत ।
इभो(क)यः सोऽय(२)मेवाग्निरयं द्यौभे(ख)(३) समिध्यते ।
भातेवैतत्कृतं(४) रूपं भातो(ग) द्यौभाः(५) समिध्यते(घ) ॥१६५॥

इति बृहद्देवतायां द्वितीयोऽध्यायः ।

---

(१) यथाग्निं वाः इति ख० ग० ङ० पुस्तकान्तरेषु ।
(२) सर्व्वमिति ख० ग० ङ० पुस्तकान्तरेषु ।
(३) द्यौभ्नः इति ग० ङ० पुस्तकान्तरेषु ।
(४) भातैर्वैतत्कृतमिति क० ग० घ० च० ।
(५) द्यौन्धे इति ग० ङ० पुस्तकान्तरेषु ।

---

(क) ऋ० ८, ४६, २ । (ख) ऋ० ७, १, १६ । (ग) ऋ० ५, ८, ५
(घ) ऋ० ४, १५; ४ ।

## अथ तृतीयोऽध्यायः ।

तनूनपादयन्त्वेव नाम्ना सोऽप्युच्यते तनूः[१] ।
नपा[क]दिति प्रजामाङ्गरम्तस्य[२] च सम्भवम् ॥ १ ॥
नराशंसन्त्विहैके तु[३] होदभिस्त्वाङ्गरध्वरे[४] ।
नराः शंसन्ति सर्व्वेऽस्मिन्नासीना इति वादिन.[५] ॥ २ ॥
तदाङ्गरग्निमेवाय[६] नराशंसोऽध्वरे त्वयम्[७] ।
नरैः शस्यत आसीनैराङ्गस्य ऋत्विजो नरा.[८] ॥ ३ ॥
इला त्विति कृतं रूपं ह्यृषिभिर्गतिकर्मण.[९] ।

---

(१) यच्छ्रत्यसौ तनुमिति ख० ग० ङ० पुस्तकान्तरस्य ।

(२) श्रमुतोऽस्येति ख० ग० ङ० पुस्तकान्तरस्य ।

(३) नराशंसमिहैके त्विति ख० ग० ङ० पुस्तकान्तरस्य ।

(४) श्रग्निमाङ्गरयेतरे इति ग० ङ० पुस्तकान्तरस्य ।

(५) वाऽध्वरे इति ग० ङ० पुस्तकान्तरस्य ।

(६) एतमेवाङ्गरन्येऽग्निमिति ग० ङ० पुस्तकान्तरस्य ।

(७) ह्ययमिति ख० ग० ङ० पुस्तकान्तरस्य ।

(८) चैवत्विंशो नर इति ख० ग० ङ० पुस्तकान्तरस्य ।

(९) इडस्त्विषिकृतं रूपमीडेस्य स्तुतिकर्म्मणः इति ग० ङ० पुस्तकान्तरस्य। इड इंत्यत्र इय, इंडेस्य इत्यत्र ईङ्गोस्येति ख०, स्तुतिकर्म्मणः इत्यत्र, गतिकर्म्मणेति घ० ।

---

(क) ऋ० १, १४३, १ ।

द्रुडावां[क]स्तेन चोक्ताग्निरिरिणा[ख][१]गतिकर्मणा[२] ॥ ४ ॥
वर्हि[ग]रेवायमग्निस्तु सर्वं हि परिवृंहितम् ।
अनेन यः स्तुतौ[३] वाधन्विधेन परिदृश्यते[४] ॥ ५ ॥
द्वार[घ]स्तु[५] देव्यो याः प्रोक्ता विश्वेषां तास्तु यत्नतः ।
आम्नायी[ङ]मनुवर्त्तन्ते तथाम्नाय्यग्निमेव च[६] ॥ ६ ॥
अग्नौ ध्रुवं स्थितास्तास्तु[७] स्तूयन्ते चाग्निना[८] सह ।
प्राधान्यन्तासु चैवाग्नेः स्तुतिष्वथ[९]हविःषु च ॥ ७ ॥
नक्तोषा सा[१०] च ये देव्यावाग्नेय्यावेव ते स्तुते ।

---

(१) इडिनेति ग०, ईडिनेति ङ० पुस्तकान्तरञ्च ।
(२) वर्धिकर्म्मिणेति ग०, वर्धिकर्म्मणेति ङ०, वृद्धिकर्म्मणेति पुस्तकान्तरं ।
(३) यद्भुत इति ग० ङ० पुस्तकान्तरञ्च ।
(४) परिवृंहित इति ग० घ० ङ० ।
(५) द्वारस्येति ख० ग० ङ० पुस्तकान्तरञ्च ।
(६) आम्नायीमन्ववर्त्तन्त नाग्निं नाम्नाय्य एव चेति क० ख० घ० ।
(७) ध्रुवास्थितत्वात्त्विति क० ख० घ० ।
(८) संस्तूयन्तेऽग्निनेति ख० ग० ङ० ।
(९) स्तुतिष्वेवेति ग० ङ० पुस्तकान्तरञ्च ।
(१०) नक्तोषाऽग्नी इति ख० ग० ङ० पुस्तकान्तरञ्च ।

---

(क) ऋ० ४, २, ५ । (ख) ऋ० ८, ८७, १ । (ग) ऋ० ३, ५३, १७ ।
(घ) ऋ० १, १३, ६ । (ङ) ऋ० १, २२, १२ ।

श्यामाग्नेयी[१] हि कालस्य तस्यैवोषाः[क] कलैव तु[२] ॥ ८ ॥
तम उच्छत्यु[घ]षा नक्ता[ङ] नक्तोमां हिमविन्दुभिः ।
अपि वा[३] व्यक्तवर्णेति नञ् पूर्वां वे[च]रिदं[४] भवेत्[५] ॥ ९ ॥
नाम्ना भवत्युषा[६]श्चैव सैषा[७] प्रागुदयाद्रवेः ।
[८]षा हि वोषा[९] भवत्यादौ मध्ये प्राप्ते तमस्वती[१०] ॥१०॥
दैव्याविति[११] तु होतारावुभौ[१२] पार्थिवमध्यमौ ।

---

(१) भाव्याग्नेयीति ख०, श्यावाग्नेयीति ग०, श्याव्याग्नेयीति ङ० पुस्तकान्तरस्थ ।

(२) किला(ख)ऽवमे(ग)ति क० घ० च० ।

(३) अभि वेति ख० ।

(४) येरिदमिति ख० ।

(५) तम उच्छत्युषेति श्लोक क० घ० च० पुस्तकेषु न दृश्यते ।

(६) उषाः इत्यच उषेति पाठ संगतः।

(७) प्रेषेति ख० ।

(८) ख० ग० ङ० पुस्तकेषु, सा हि वोषेति श्लोकार्द्धं, नाम्ना भवत्युषा सैवेति श्लोकार्द्धात् प्राक्, पठितं ।

(९) दोषेति क० घ० च० ।

(१०) निशीथे सा तमस्विनीति ख० ग० ङ० पुस्तकान्तरस्थ ।

(११) दैव्याविति ख० ग० ।

(१२) अमी इति ग० ङ० पुस्तकान्तरस्थ ।

---

(क) ऋ० १, ३६, १ । (ख) ऋ० १ ३२,४ । (ग) ऋ० ३, ५४, ५ ।
(घ) ऋ० १, ४६, १ । (ङ) ऋ० १, ७३, ७ । (च) ऋ० १,७२, ६ ।

दिव्यादग्नेस्तु(१) जज्ञाते देव्यौ तेनेह जन्मना(२)॥ ११ ॥
तिस्रस्तु देव्यो याः प्रोक्तास्त्रिस्थानैवेह सा तु वाक्।
त्रिविधेनोच्यते नाम्ना ज्योतिःषु त्रिषु वर्त्तिनी ॥ १२ ॥
अग्निमेवानुगेला(३) तु मध्ये त्वैन्द्री(४) सरस्वती।
अमुं स्थिताधिलोकन्तु(५) भारती भारती द्युभी ॥१३॥
सैषा तु त्रिविधा वै वाग्दिवि च व्योम्नि चेह च।
व्यस्ता (६)चैव समस्ता च भजतेऽग्नीनिमानपि(७) ॥१४॥
त्वष्टा तु यः सोऽयमेव (८)पार्थिवोऽग्निरिति श्रुतिः(९)।
पार्थिवस्यास्य वर्चः स्युः कस्याप्यृक्(१०)चार्त्तवेषु च(११) ॥१५॥
त्विषित(क)स्त्वष्टुतो वा स्यात् (१२)तूर्णमश्नुवतीति वा(१३)।

---

(१) द्यौति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च।
(२) कथ्यत इति क॰ ख॰ ङ॰ च॰।
(३) अनुश्लेलेति ख॰, अनुश्लेलेति क॰ घ॰ च॰।
(४) प्रासेति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च।
(५) स्थितविलोकन्त्विति क॰ घ॰ च॰।
(६) व्याप्तेति क॰ घ॰ च॰।
(७) भजत्यग्नीनिमानन्विति क॰ घ॰ च॰।
(८) त्वयामेवेति ख॰ ङ॰ पुस्तकान्तरञ्च, यत् स्वयं प्रोक्त इति ग॰।
(९) स्तुतिरिति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च।
(१०) काश्यावीदिति ख॰, कस्याप्युगिति ङ॰ पुस्तकान्तरञ्च।
(११) पार्थिवो वाध्याश्वे च कौत्सा त्रिश्वार्त्तवेषु चेति क॰ घ॰ च॰।
(१२) तुचिते वा स्यादिति ख॰, त्वचतेर्वा स्यादिति ग॰ ङ॰ पुस्तकान्तरञ्च।
(१३) अश्नुत एव वेति ख॰ ग॰, वा इत्यत्र चेति ङ॰ पुस्तकान्तरञ्च।

---

(क) ऋ॰ १०, ८४, २।

कर्मसु त्वरणां वेत्ति (१)तेन नामैत(२)दश्नुते ॥१६॥
यः सहस्तमोजस्तु (३)स्त्वेयमन्द्रमुपाश्रितः(४)।
सोऽयं(५) त्वष्टारमेवाग्निः (६)परं वन्दे च यन्मधु(७)(क) ॥१७॥
प्रादाद्ब्रह्मा च (८)सुप्रीतः पुत्राय(९) यदथर्वणे(१०)।
स चाभवदृषिस्तेन ब्रह्मणा वीर्यवत्तमः(११) ॥१८॥
तमृषि(१२)र्निषिषेधेन्द्रो (१३)मैवं वोचः (१४)कचिन्मधु।
न हि भोक्ते मधुन्यस्मिन् जीवन्तं त्वोत्सृजाम्यहं(१५) ॥१९॥

(१) कर्म्मसूत्तारणो वेत्तीति ग० ङ०, वेत्तीत्यत्र वेत्तीति ख० पुस्तकान्तरञ्च।
(२) नाम्नैतदिति ख०।
(३) सहस्तमो रश्मिरिति ग० ङ०।
(४) चन्द्रमसोश्रित इति क० घ० च०।
(५) सोऽप्यौति ख० ग० ङ० पुस्तकान्तरञ्च।
(६) अग्निमिति ग० ङ० पुस्तकान्तरञ्च।
(७) वेदवतं मनुमिति ख०, वेद्द च यन्मध्विति ग०, वेद च यन्मध्विति ङ०, देव च यन्मध्विति पुस्तकान्तरं।
(८) अपीति ख० ग० ङ० पुस्तकान्तरञ्च।
(९) सुतायेति ख० ग० ङ० पुस्तकान्तरञ्च।
(१०) तदथर्वंग इति ख० ग० ङ० पुस्तकान्तरञ्च।
(११) दीप्तिमत्तरः इति ख० ग० ङ० पुस्तकान्तञ्च।
(१२) तं तृषिरिति क० घ० च०।
(१३) निषिषिदेन्द्र इति क० घ० च०।
(१४) मेदं वाचः इति क० घ० च०।
(१५) मधौ ब्रह्मन् जीवनं त्वद्दमुत्सृजे इति क० घ० च०।

(क) ऋ० १, १४, १०।

तन्मत्रे सोऽय[१]मेवाग्निर्भवतीति विनिश्चयः ॥२९॥
अयं कर्त्ता च देवानां [२]साकृतिस्तामिद्धिकृता।
अयं प्रकृतिर्भूतानां स तेषा[३]मयमव्ययः ॥३०॥
तनूनपा[क]द्द्वितीया तु [४]नराशंस[ख]वती च या।
समस्यते [५]प्रयोक्तव्ये त्रिष्वेवोभयवत्स्विह[६] ॥३१॥
नराशंसवती वा स्या[७]द्द्वितीयेह [८]प्रजार्थिनां।
बलकामोऽथ वा यः स्या[९]द्भूरिमिच्छति वापि [१०]यः[११] ॥३२॥
आग्नेयमिति[१२] यत्तेभि[१३]र्वैश्वदेवमिहोच्यते।

---

(१) त्वयमिति ग० ङ० पुस्तकान्तरञ्च।
(२) अयं हि कर्त्ता स्वाहानामिति ख० ग० ङ० पुस्तकान्तरञ्च।
(३) सर्व्वेषामिति ख० ग० ङ० पुस्तकान्तरञ्च।
(४) चेति ख० ग० ङ० पुस्तकान्तरञ्च।
(५) समस्येते इति ख० ग०, समर्थ्येते इति ङ० पुस्तकान्तरञ्च।
(६) उभयवत्स्वितिति ग०, उभयवत्सु त्विति ङ०, उभयवत्सु चेति पुस्तकान्तरं।
(७) स्याद्विति ग० ङ०।
(८) चेति ख० ग० ङ० पुस्तकान्तरञ्च।
(९) धनकामो वेति ख० ग० ङ० पुस्तकान्तरञ्च।
(१०) भूतिमिच्छेद्यदीति ख० ग० ङ० पुस्तकान्तरञ्च।
(११) वेति ग०।
(१२) आग्नेयं यज्ञमिति ख० ग० पुस्तकान्तरञ्च, आग्नेये यज्ञमिति ङ०।
(१३) यज्ञेभिर्यद्विति ख० ग० ङ० पुस्तकान्तरञ्च।

---

(क) ऋ० १, १८८, २। (ख) ऋ० १, १४२, ३।

तद्दिश्वमिन्द्र गायत्र (क)वैश्वदेवेषु शस्यते ॥२३॥
इन्द्रसोममितीन्द्र तु (१)यदा दशकमार्त्तवम् ।
तस्मिन् वदर्त्तुना यत्र प्रत्यृच स्तौति देवताः ॥२४॥
तथर्त्तुनेति षट्स्वृचु ऋतरूपमृतुभि सह ।
पुनर्द्वयोर्ऋतुनेति वक्तव्येकवलक्षिता ॥२५॥
ऋतवो देवताभिश्च निपातेनेह संस्तुता ।
अयर्त्तुभिपसूक्ते च तथा गार्त्समदेऽपि च(२) ॥२६॥
मुख्यया त्विन्द्रमेवाहौ(३)मरुतस्तु द्वितीयया ।
तृतीयया तु त्वष्टारमग्निन्तु परया तत(४) ॥२७॥
पञ्चम्या तु पुन शक्र षष्ठ्या देवावृतावृधौ ।
सप्तम्या द्राभिरग्निन्तु चतुर्भिर्द्रविणोदस(ख) ॥२८॥
आदेशाद्दैवत ज्ञेयमृत्वस्थाणां न(५) चिह्नत ।
न शब्द चिह्नतोऽप्याषां(६) ज्ञातुन्तत्वेन दैवत(७) ॥२९॥

---

(१) इन्द्रसोम पिवतोममिति ख॰ ग॰ पुस्तकान्तरयोः, इन्द्रमित्यत्र इत्यमिति ग॰ ।
(२) तथर्त्तुनेति षट्स्वृत्तु इत्यादि तथा गार्त्समदेऽपि चेत्यन्तपाठ क॰ ख॰ घ॰ चिह्नितपुस्तकेषु न विद्यते ।
(३) त्वोपेंद्रिति क॰ ख॰, त्वष्टारेंद्रिति च॰ ।
(४) चतुर्भ्यां चापि वर चेति ख॰ ग॰ ।
(५) मन्त्राद्र स्थिति क॰ ख॰ घ॰ ।
(६) ज्ञायात्मिति ख॰ ग॰ पुस्तकान्तरयोः ।
(७) दैवत इति क॰ ख॰ घ॰ ।

---

(क) ऋ॰ १, १० ॥ (ख) ऋ॰ ८, ८८, १ ।

एकादश्या तु नासत्यौ[क] द्वादश्याग्निमिम पुन ।
पृथक् पृथक् स्तुतौ[1] तत्त्वक्तमाह रथीतर[१] ॥४०॥
बहुदेवे द्विदेवे[२] वा गुणैर्वा[३] यत्र कर्मजे ।
स्तूयते देवतैकैका विभक्तस्तुति[४] तद्विदु ॥४१॥
वैश्वदेवानि सूक्तानि त्रिविधानि भवन्ति तु ।
सूर्यसद्भावसंयुक्त विश्वलिङ्ग पृथक्स्तुति[५] ॥४२॥
पृथक्स्तुति तु यत्प्रोक्त तद्विद्या[६]द्बहुदैवतम् ।
विश्वलिङ्गन्तु तद्यत्र विश्वै स्वै कर्मजैर्गुणै[७] ॥४३॥
विश्वानुद्दिश्य यद्देवान् स्तौति[८] सूर्यमनेकधा ।
देवानेवा[९]भिसंस्तौति त प्राङ्. सूर्यसत्स्तवम् ॥४४॥
न तु भागोऽस्यसूक्तादौ[१०] न सूर्ये त्वौषधेषु वा[११]।

---

(१) रथान्तर इति ख॰ ।
(२) बहुदेवतद्वन्द्वे इति क॰ घ॰ च॰, बहुदेवते द्वन्द्वे इति ख॰ ।
(३) गुणे स्वैरिति क॰ घ॰ च॰ ।
(४) देवतैककामभक्तिस्तुतीति क॰ ख॰ घ॰ च॰ ।
(५) पृथक् स्तुतीति निर्विसर्गान्तपाठ समीचीन ।
(६) यद्विद्यादिति क॰ घ॰ च॰ ।
(७) कर्मभि स्तुत इति क॰ घ॰ च॰ ।
(८) देवांस्तु यथेति क॰ घ॰ च॰ ।
(९) देवैरेवेति क॰ घ॰ च॰ ।
(१०) भागस्य सूक्तादाविति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च, भागो स्वसूक्तादाविति च॰ ।
(११) सूक्तेष्वेवौषसेषु वेति ग॰, सूक्तेष्वेवौषसेषु वेति ङ॰ ।

---

(क) ऋ॰ १०, २४, ५ ।

यद्धेतुमष्टनडुहो[१] वोढा दोग्ध्राथुरेव वा ॥५०॥
भागेयः स्तौति चाम्याद्दौन्मित्रादीनश्वसंस्तुतौ[२] ।
यदैभिरिति चैतस्मिन् वैश्वदेवेऽग्निमर्चति ॥५१॥
तदाङ्करादावन्ते च प्रायशोऽन्यां स्तुवन्नृषिः[३] ।
प्रातर्योगात्[क][४] प्रसङ्गाद्वा स्तौत्यन्यामपि देवताम् ॥५२॥
यस्यां वदत्यर्थवादान्[५] सा ज्ञेया सूक्तभागिनी ।
यान्तु स्तौति प्रसङ्गेन सा विज्ञेया निपातिनी ॥५३॥
यतुर्द्वो भण्यते[६] चास्मिन् सूक्ते वै[७] सूक्तभागिनी ।
यस्मिन् सर्वांस्तु राजर्षीनृषीन् वापि स्तुवन्नृषिः ॥५४॥
मेधातिथिरगस्त्यस्तु[८] वृहदुक्थो मनुर्गयः[ख] ।
ऋजिश्वा[ग] च सुकर्षस्तु ग्रार्यातो[घ] गोतमो लुशः[९] ॥५५॥

---

(१) यद्धेतुः सप्तनश्वाहाविति ङ॰ पुस्तकान्तरञ्च ।

(२) चाश्वसंस्तुताविति क॰ ख॰ घ॰ च॰ ।

(३) अन्याः स्तुवन्नृषः इति ग॰ ङ॰ पुस्तकान्तरञ्च ।

(४) प्रतियोगादिति ग॰ ङ॰ पुस्तकान्तरञ्च ।

(५) वदन्त्यर्थपादाः इति क॰ घ॰ च॰ ।

(६) न तु श्वाह्यन्यते इति क॰ घ॰ च॰ ।

(७) वेति ग॰ ।

(८) चेति ख॰ ङ॰ ।

(९) मानवो यमः इति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च ।

---

(क) ऋ॰ १०, ४१, २ । (ख) ऋ॰ ६, २, ८ । (ग) ऋ॰ ५, २९, ११
(घ) ऋ॰ ३, ५१, ७ ।

ऋचोनूर्यिर्वा स्तौति दध्यङ्ङेऽस्या-
मात्मानं वा तेषु यं मन्त्रजन्म(१) ।
तस्मादस्या विप्रवदन्ति केचित्
इन्द्राग्नी तस्या तु(२) निपातभाजौ ॥१०॥
उशुचथ्य(क)वृहस्पती ऋषिपुत्रौ बभूवतुः ।
आसीदुचथ्यभार्या तु ममता नाम भार्गवी ॥११॥
तां यवीयान्(३) वृहस्पतिर्मैथुनायोपचक्रमे ।
शुक्रस्योत्सर्गकाले तु गर्भस्त प्रत्यषेधत(४) ॥१२॥
इहास्मि पूर्वसम्भूतो न कार्यः शुक्रसङ्करः ।
तच्छुक्रप्रतिषेधं तु न ममर्ष वृहस्पतिः(५) ॥१३॥
स व्याजहार तं गर्भं तमस्ते दीर्घमस्त्विति ।
स च दीर्घतमा नाम बभूवर्षिरुचथ्यजः ॥१४॥
स जातोऽप्यतप(६)ल्लोकानेतस्मा(७)दन्धतां गतः ।

---

(१) ऋचापञ्चास्य स्तौति प्रथम जन्मेति क० ग० च० । ऋचापञ्चास्य इन्द्रम ऋतमेवापञ्चास्यः इति ग० ।
(२) केचिदेन्द्रौ स्वेवेति क० ग० च० ।
(३) कनीयानिति ख० घ० च० ।
(४) प्रत्यभाषतेति क० ग० घ० च० ।
(५) तं शुक्रप्रतिषेधं तु बृहस्पतिरमर्षयदिति घ० ।
(६) चाध्यतपदिति ख० घ०, चाध्यवददिति ग० च० पुस्तकान्तरम् ।
(७) चतस्मादिति ख० ग० च० ।

2472

---

(क) ऋ० ८, ४६, २८ ।

A VIDYA BHAV... S.N.

मैत्रावरुणं सुसुमे(क)ति सूक्तं(१)
प्रप्र(ख)पौष्णं वैश्वदेवं द्वितीयं(२) ।
एतत्सूक्तं(३) वैश्वदेवं तृतीयं
वैश्वदेवं स्या(४)द्बहुदेवतेषु ॥७॥
बहुशस्तु वैश्वदेवेषु सस्तवः(५)
अर्धर्चा(६) द्वैपदास्त्रैपदाश्च ।
द्विप्रधाना अपि चैकप्रधाना
बहुप्रधाना अपि वैश्वदेवाः(७) ॥८॥
वैश्वदेवी मित्रावरुणी द्वितीया
तिस्रोऽश्विभ्यां तत ऐन्द्री ततोऽग्नेः ।
मारुत्येका तत ऐन्द्राग्न्यनन्तरा
बार्हस्पत्या चोत्तमा स्तौति देवान् ॥९॥

(१) सुसुमेतीह सूक्तमिति ख०, ग० ङ० पुस्तकान्तरञ्च ।
(२) तृतीयमिति क० घ० च० ।
(३) स्यात्तु औषादिति ख० ।
(४) वैश्वदेवं हि स्यादिति ङ० ।
(५) सम्पृथ इति क० घ० च० ।
(६) अर्धर्चाविति क० घ० च० ।
(७) अपि ता वैश्वदेव्यः इति ख० पुस्तकान्तरञ्च ।

(क) ऋ० १, १२०, ८ । (ख) ऋ० १, ३०, ७ ।

जीर्णन्तु दीर्घतमसं खिन्नास्तत्परिचारिणः[१] ।
दासा अथ[२] नदीतोये दृष्टिहीनमुपादधुः[३] ॥२१॥
तत्रैकस्त्रैतनो[४][क] नाम शस्त्रेणैनमपाहनत् ।
शिरस्त्रांसावुरस्यैव स्वयमेव न्यकृन्तत[५] ॥२२॥
अङ्गदेशसमीपे तु नद्य सर्वाः समुत्खिदन्[६] ।
[७]जनयामास चोत्थाय[८] कक्षीवत्प्रमुखान्नृपान् ॥२३॥

---

(१) तत्परिचारका इति ख० ङ० पुस्तकान्तरञ्च ।

(२) दासा बध्वेति क० घ० च० ।

(३) प्रवादधुरिति क० घ० च० ।

(४) त्रैनत इति क० घ० च० ।

(५) ख० ङ० पुस्तकयोः पुस्तकान्तरे च,—

हत्वा दीर्घतमास्तु पापेन महता हतम् ।
आत्माङ्गान्यनुदच्चैव ततोऽदाम्नोद्धितो भृशम् ॥

इत्यधिकं पठितम् ।

(६) तं नद्यं समुदक्षिपदिति ङ० पुस्तकान्तरञ्च ।

(७) जनयामास चोत्थायेति श्लोकार्द्धात् प्राक्, ख० ङ० पुस्तकयोः पुस्तकान्तरे च,—

अङ्गराजमहिषे युक्ता मुशिज पुत्रकाम्यया ।
राज्ञा च प्रेषितां दासीं भक्त्वा मत्वा महातपाः ॥

इत्यधिकं पठितम् ।

(८) सोऽजीजनद्दशैकादिति ख० ङ० पुस्तकान्तरञ्च ।

---

(क) ऋ० १,।१५८, ५ ।

ददुर्देवा सुता नेत्रे ततोऽनन्धो बभूव स(1) ॥१५॥
स वेदिषद् इत्यस्तौ(2) चतुर्भिर्जातवेदसं।
समिद्ध आप्रियोऽन्त्यैन्द्री तमित्यग्नेः पराणि षट्(3) ॥१६॥
स्तुतौ तु मित्रावरुणौ सूक्तैर्मित्रमिति त्रिभिः।
मित्रं मैत्री वदत्येता(4) माधैनवश्च शंसति ॥१७॥
अदितिं चाथ वाप्यग्निं तथा रूपं हि दृश्यते।
अग्निं मेने दितिं नैव कुत्से चेह(5) च शौनकः ॥१८॥
ऋषिरत्र प्रथमत्वादा दर्शनादानुकीर्तयेत्(6)।
विष्णोर्नुकमिति त्रीणि वैष्णवानि पराण्यतः ॥१९॥
अतः पान्तं चतुर्भिस्तु(7) इन्द्राविष्णू सह स्तुतौ।
स्तवाणि वा वैष्णवानि ऋषिस्त्वेन्युचि(8) कांक्षति ॥२०॥

---

(१) नु तस्यास्तौ मैत्रे न लभ्यत गत इति क० ख० घ०।
(२) इत्यादिरिति ख०।
(३) आद्यः परेन्द्रो ऋतुभिः त्वयिं तमित्यत इति क० ख० घ०, आग्नि-योऽन्त्यैन्द्रो माध्यापि पराणि षेति ग०।
(४) मैत्रीव देवतामिति ग०।
(५) यास्कः कुत्सो चेचेति ट० पुस्तकान्तरेषु।
(६) ऋषिदर्शैः प्रथमत्वाद्दर्शनादनुकीर्तयेदिति ग०।
(७) प्रत्यक्षचतुर्भिर्श्चेमिरिति ग०, गाथा ऋतचतुर्भिश्चेमिरिति ट० पुस्तकान्तरेषु।
(८) माधाभिस्तुचोति ख० ग० पुस्तकान्तरेषु।

जीर्णन्तु दीर्घतमसं क्षिप्त्वास्तत्परिचारिणः[१] ।
दासा अथ[२] नदीतोये दृष्टिहीनमुपादधुः[३] ॥२१॥
तत्रैकस्त्रैतनो[४][क] नाम शस्त्रेणैनमपाहनत् ।
शिरश्चांसावुरश्चैव स्वयमेव न्यकृन्तत[५] ॥२२॥
अङ्गदेशसमीपे तु नद्यः सर्वाः समुत्क्षिदन्[६] ।
[७]जनयामास चोत्थाय[८] कक्षीवत्प्रमुखानृषीन् ॥२३॥

---

(१) तत्परिचारका इति ख० ङ० पुस्तकान्तरञ्च।

(२) दासा वध्वेति क० घ० च०।

(३) अवादधुरिति क० घ० च०।

(४) त्रैनतः इति क० घ० च०।

(५) ख० ङ० पुस्तकयोः पुस्तकान्तरे च,—

हत्वा दीर्घतमास्तं तु पापेन महता वृतम्।
आत्माङ्गान्यनुदच्चैव ततोऽदान्मोहितो भृशम्॥

इत्यधिकं पठितम्।

(६) तं न्द्यं समुदक्षिपदिति ङ० पुस्तकान्तरञ्च।

(७) जनयामास चोत्थायेति श्लोकार्द्धात्प्राक्, ख० ङ० पुस्तकयोः पुस्तकान्तरे च,—

अङ्गराजगृहे युक्ता सुभिक्षं पुत्रकाम्यया।
राज्ञा च प्रहिता दासी भक्ता मत्वा महातपाः॥

इत्यधिकं पठितम्।

(८) सोऽभीगनद्यसैकादिति ख० ङ० पुस्तकान्तरञ्च।

---

(क) ऋ० १,।१५८, ५।

तुष्टाव चैव सूक्ताभ्या[१]मवोचीत्यश्विनावृषिः ।
प्रेति द्यावापृथिव्यौ तु[२] पराभ्यामेतदुत्तरम् ॥२४॥
किमाभेव पर[३] मा नो मेध्यस्याश्वस्य संस्तवः ।
इमां[क]ता स इति त्वश्वां नीयमानं प्रशंसति ॥२५॥
स्वयूथ्यास्तस्य चैवात्र बहवः संस्तुता हयाः ।
नियुक्ताश्चानियुक्ताश्च प्रसङ्गादनुकीर्त्तिताः ॥२६॥
यज्ञवदयज्ञं हविष्य[ख] चाह सूनवः[४] ।
तस्मिन्मांसस्य सूनस्य चतुर्धा हविषस्तथा[५] ॥२७॥
वासोऽधिवाससोश्चात्र स्वधिते[ग]श्च प्रकीर्त्तनम्[६] ।
गात्रशूलस्रुचाना[घ]ञ्च[७] स्वधितेश्च प्रकीर्त्तनम्[८] ॥२८॥

---

(१) वेति वसुताभ्यामिति ङ० पुस्तकान्तरेषु ।
(२) द्यावापृथिव्यातेति ङ० पुस्तकान्तरेषु ।
(३) परे इति ङ० पुस्तकान्तरेषु ।
(४) भविष्य चाह भूतवत इति ख० ङ० पुस्तकान्तरेषु ।
(५) चतुर्थां हविषस्तथेति ग०, तत्सौनस्य च मांसस्य चतुर्धा च विधा स्तथेति ङ० पुस्तकान्तरेषु ।
(६) यद्दिभस्याच कीर्त्तितमिति ख० ग०, वासाधिवाससोश्चात्र यज्ञीयस्य च कीर्त्तनमिति ङ० ।
(७) गात्रशूलस्रुचाश्चेति ख० ङ० ।
(८) क० घ० च० चिह्नितपुस्तकेषु, गात्रशूलस्रुचाञ्चेतिश्लोकार्द्धं न पठितम् ।

---

(क) ऋ० १, २०, २ । (ख) ऋ० १, १६२, ४ । (ग) ऋ० १, १६२, १८ । (घ) ऋ० ५, ६२, ७ ।

भागस्य[1] कीर्त्तनं चात्र इन्द्रापूष्णोः सह स्तुतिः[2]।
सूक्तं यदस्य[3] वामीयं वैश्वदेवं तदुच्यते ॥२९॥
प्रवादा विविधास्तत्र देवानां चात्र कीर्त्तनं।
अग्निस्तु वामः पलितो[क] वायुर्भ्राता तु मध्यमः ॥३०॥
घृतपृष्ठ[ख]स्तृतीयोऽत्र[4] सप्त वै रश्मयस्तु ताः।
परास्तु कथयन्नग्निं[5] यथा वर्षति पाति[6] च ॥३१॥
अहोरात्रदिना[7]न्मासानृतूंश्च परिवर्त्तनं[8]।
पञ्चधा त्रिविधा[9] चैव षोढा द्वादशधैव च[10] ॥३२॥
संवत्सरं चक्रवच्च पराभिः कीर्त्तयदृषिः।

---

(१) छागस्येति ग० घ०
(२) इन्द्रापूष्णोश्च कीर्त्तनमिति ख० ङ०।
(३) यदस्येति ङ०।
(४) तृतीयोऽस्य इति घ०।
(५) चाग्निरिति घ०।
(६) वातीति ख० ङ०।
(७) अहोरात्रान् दिनानिति ङ०।
(८) पर्यायं परिकीर्त्तनमिति घ०।
(९) पञ्चधा च त्रिधेति ख० ङ०।
(१०) द्वादशधापि चेति ङ०।

---

(क) ऋ० १, १६४, १। (ख) ऋ० १, १६४, १।

क्षेत्रज्ञानं[1] च धेनुञ्च गौरीं वाचं सरस्वतीं ॥२३॥
धर्म्मं पूर्व्वयुगीयञ्च[2] साध्यान् देवगणांस्तथा।
विविधानि च कर्म्माणि त्वग्निवायुविवस्वताम् ॥२४॥
विभूतिमग्नेर्वायोश्च जगती स्थान[3]जङ्गमे।
हरणं रश्मिभिश्चैव[4] विसर्गं[5] पुनरेव च ॥२५॥
कर्म्मानुकीर्तनञ्चाथ[6] पर्जन्याग्निविवस्वतां।
मातापुत्रौ तु वाक्प्राणौ माता वागितरः सुतः ॥२६॥
सरस्वन्तमिति प्राणा[7] वाचं प्राहुः सरस्वतीं।
शरीरमिन्द्रियैर्युक्तं क्षेत्रमित्यभिधीयते ॥२७॥
वेद तत्प्राय[8] एवैकस्तस्मात् क्षेत्रज्ञ उच्यते।
मेघः[9] शक[क] स्तस्य धूमः[10] सलिलं वाय एव वा ॥२८॥

---

(१) क्षेत्रज्ञानमिति ग०, क्षेत्रं ज्ञानमिति ङ०।
(२) पूर्व्वयुगनाद्येति ख० ङ०, धर्म्मपूर्व्वयुगौ यद्येति ग०,
(३) जगति स्थास्विति ख० ङ०।
(४) वारः इति ख०, वाद्यामिति ङ०।
(५) विश्वर्गमिति ख०।
(६) चाम्येति ख० ङ० पुस्तकान्तरञ्च।
(७) प्राणाः इति क० ग० घ० च०।
(८) वेद्येतत्प्राय इति ङ०।
(९) मेघे इति ख०।
(१०) धूमे इति ख०।

---

(क) ऋ० ८, ८०, ३।

सोम उक्ता[क]भवन्त्यस्य पावकाश्च त्रयोऽधिपाः ।
गौरीरं तं वैश्वदेवमुपरि स्यात्पृथक् स्तुतिः ॥३९॥
इन्द्रं मित्रमिमौ सौर्य्यौ गौरी चान्या सरस्वते[१] ।
मारुतेन्द्रस्तु संवादः कयेति[२] परमः स्मृतः[३] ॥४०॥
मरुतामयुज[४]स्त्वैन्द्र्यो युग्माः सर्व्वाः[५] महान्यया ।
एकादशी प्रथमा च मारुतस्तृच उत्तमः[६] ॥४१॥
त्र्यचस्येव तु तत्रोक्तं कर्तृत्वमितरस्य तु ।
इतिहासं पुरावृत्तमृषिभिः परिकथ्यते[७] ॥४२॥
समागच्छन्मरुद्भिस्तु[८] चरन् व्योम्नि शतक्रतुः ।

---

(१) क० ख० घ० च० पुस्तकेषु, मेघः प्रकृतस्य धूम इत्यादि गौरी चान्या सरस्वते इत्यन्तपाठो न विद्यते, तेषु च तत्र स्थले,—

सूक्तमस्यपरं त्वेतत्प्राणमेव प्रशंसति ।
प्रवादमङ्गत्वाच्च ततः सलिलमुच्यते ॥

इति पाठो वर्त्तते ।

(२) कयेतीति ख० ।

(३) ततः इति ख० छ० ।

(४) मरुतः इति छ० ।

(५) सर्व्वेति छ० ।

(६) उत्तरः इति ग०, मारुतस्तिस्र उत्तरा इति छ० पुस्तकान्तरस्य ।

(७) त्र्यचस्यैव तु तत्रोक्तमित्यादि ऋषिभिः परिकथ्यते इत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु नेक्ष्यते ।

(८) चेति ख० छ० ।

---

(क) ऋ० १, १३६, २ ।

श्रुत्वा तुष्टाव तानिन्द्रस्तेनेन्द्र(१)मृषयोऽब्रुवन् ॥४२॥
तेषामगस्त्य सवाद तपसा वेद(२)तत्त्वत ।
स तानभिजगामाशु निरूप्यैन्द्र हविस्तदा ॥४४॥
मरुतश्चाभितुष्टाव सूक्तैस्तदिति च(३) त्रिभि(४) ।
महश्चिदिति चैवेन्द्र महश्चमिति चैतया(५) ॥४५॥
निरुप्त तद्धविश्चेन्द्र मरुद्भ्यो दातुमिच्छति(६) ।
विज्ञायावेक्ष्य तद्बुद्ध्य त्विन्द्रो(७) नेति तमब्रवीत्(८) ॥४६॥
न श्वो नाद्यतन ह्यस्ति वेद कस्तद्यदद्भुत ।
कस्यचित्त्वथ सञ्चारे(९) चित्तमेव विनश्यति ॥४७॥
किन्न इत्यब्रवीदिन्द्रमगस्त्यो भ्रातरस्तव ।
मरुद्भि सम्प्रकल्पस्व(१०)ब्रवीमा च(११) शतक्रतो । ४८॥

---

(१) ते चैन्द्रमिति ख० ग० ङ० पुस्तकान्तरञ्च ।
(२) तपसाशोधीति ख० ङ० पुस्तकान्तरञ्च ।
(३) तश्चिति त्विति क० घ० च० ।
(४) वन्धिति पञ्चभिरिति ग० ।
(५) महश्चिदित्यनेनैन्द्र सचस्व त महाव्यमिति ख० ङ० पुस्तकान्तरञ्च ।
(६) इच्छयेति ख०, इच्छतः इति ङ० पुस्तकान्तरञ्च ।
(७) तद्भावमिन्द्र इति ख० ङ० पुस्तकान्तरञ्च ।
(८) ततोऽब्रवीदिति ख० ङ० पुस्तकान्तरञ्च ।
(९) त्वर्थसञ्चारे इति ख० ङ० पुस्तकान्तरञ्च ।
(१०) सम्यक्कल्पस्वेति ख० ङ० ।
(११) मा नः इति ख० ङ० पुस्तकान्तरञ्च ।

किं नो भ्रातरिति त्वथामिन्द्रो मान्यमुपाद्ववत् ।
अगस्त्यस्त्वरमित्यस्या युध्म[1]मिन्द्र प्रशामयत्[2] ॥४८॥
प्रादात्सवनन[3] कृत्वा तेभ्य एव च तद्धविः ।
पूर्व्वया मान्वयन्निन्द्रो ह्यगस्त्य स्नेहकाम्यया ॥५०॥
एव सवनन कृत्वा प्रादात्तेभ्य स तद्धवि[4] ।
सुते[5] चकार सोमे च[6] तानिन्द्र. सोमपीथिन[क] ॥५१॥
तस्माद्दिवाचिपातेन[7] ऐन्द्रेषु[8] मरुतस्तु तान्[9] ।
प्रीतात्मा पुनरेवर्षिस्तास्तुष्टाव पुन पृथक्[10] ॥५२॥
मरुतः प्रेति सूक्ताभ्या[11] मिन्द्र षड्भि. परैस्तु स[12] ।

(१) क्रुद्धमिति ख० ङ० पुस्तकान्तरच्च ।
(२) प्रसादयदिति ख० ङ० प्रसाधयदिति पुस्तकान्तरम् ।
(३) सङ्गमनमिति क० ग० घ० च० ।
(४) पूर्व्वया मान्वयन्निन्द्र इत्यादि स तद्धविरित्यन्तपाठ, क० घ० च० चिह्निवपुस्तकेषु न दृश्यते ।
(५) सूते इति ग० ।
(६) सोमेऽध्येति ख० ङ० पुस्तकान्तरच्च ।
(७) निपातेष्विति ङ० पुस्तकान्तरच्च ।
(८) नन्द्रेष्विति ख० ।
(९) मरुत स्तुता इति ङ० पुस्तकान्तरच्च ।
(१०) पृथक् पृथगिति ख० ङ० पुस्तकान्तरच्च ।
(११) प्रतिसूक्ताभ्यामिति ख० ङ० पुस्तकान्तरच्च ।
(१२) गायन् षड्भि प्राधीपतिरिति ख० ङ० पुस्तकान्तरच्च ।

(क) ऋ० १०, १५, ८ ।

ऋतुस्नाता[१] ऋषेर्भार्या लोपामुद्रा यशस्विनी ॥५३॥
उपजल्पितुमारेभे रहः संयोगकाम्यया ।
ताभ्यां सा त्वब्रवीदृग्भ्यां पूर्वीरिति चिकीर्षितं ॥५४॥
रिरंसुस्तामथागस्त्य उत्तराभ्यामतोषयत् ।
विदित्वा तपसा सर्वं तयोर्भावं रिरंसतोः ॥५५॥
उक्तेन[२] कृतवानस्मिन्[३] ब्रह्मचार्य्युत्तमे जगौ ।
प्रग्रस्य[४] तं परिष्वज्य गुरू मूर्ध्न्यवजिघ्रतः ॥५६॥
स्मितैनमाहतुस्त्वोभावनागा असि[५] पुत्रक ।
युवो[क]रजांसीति तत सूक्ते पञ्चभिरश्विनौ ॥५७॥
अगस्त्य एव तुष्टाव सूक्तेन कतरे तुण[६] ।
द्यावापृथिव्यौ सूक्तेन आनो विश्वान् दिवौकस ॥५८॥
पितु[ख]मत्र समिद्धाप्रो अग्निमग्ने नयेति च[७] ।
बृहस्पतेरनर्वाण[ग] ककतोपनिषत्पर[८] ॥५९॥
अपां त्वपाला सूर्यस्य केचिदेतां स्तुतिं विदुः ।

---

(१) ऋतौ स्नातामिति क० ग० घ० ।
(२) न त्वेनः इति ख० ग०, नत्वेतदि ङ० पुस्तकान्तरञ्च ।
(३) चस्मीति ख० ग० ङ० ।
(४) प्रग्रस्येति ग० ङ० ।
(५) चोभौ ह्यनागोऽसीतीति क० ग० ङ० घ० ।
(६) कतरेति परेयं त्विति क० ग० घ०, सूक्तेन कतरेति त्वि ङ० ।
(७) समिद्धो ह्याप्रियोऽग्ने च नयामये इति ख० ङ० पुस्तकान्तरञ्च ।
(८) परति ख० ङ० पुस्तकान्तरञ्च ।

---

(क) ऋ० १, ३४, १। (ख) ऋ० १ ६१, ७। (ग) ऋ० १, ३०, १।

ददर्श तद्‌गस्त्यो वा[१] विपश्चं विपश्चंकया ॥६०॥
अदृष्टाख्यो विश्वरूपः[२] सूक्तस्यांशोऽत्र तु त्र्यृचः[३] ।
अस्तौ[४]द्गृत्समदोऽग्निं त्वं[५] जातवेदस[६]माप्रियः ॥६१॥
यज्ञेनाथ समिद्धोऽग्निरत्तोऽग्निं[७] सप्तभिर्ऋग्भिः[क] ।
संयुज्य[८] तपसात्मानमैन्द्रं बिभ्रन्महद्वपुः ॥६२॥
अदृश्यत मुहूर्त्तेन दिवि च व्योम्नि चेह च ।
तमिन्द्रमिति मत्वा तु[९] दैत्यौ भीमपराक्रमौ ॥६३॥
धुनिश्च चुमुरिश्चैव[१०] सायुधावभिपेततुः ।
विदित्वा स तयोर्भावमृषिः[११] पापचिकीर्षतोः ॥६४॥
यो जात इति सूक्तेन कर्माण्यैन्द्राण्यकीर्तयत् ।

---

(१) त्विति ख० ङ० पुस्तकान्तरेषु ।
(२) अदृष्टाख्यो नष्टरूपः इति ख० ङ० पुस्तकान्तरेषु ।
(३) त्र्यृचः इति ग० ।
(४) स्तौतीति ङ० पुस्तकान्तरेषु ।
(५) अग्नित्वमिति ग० ङ० ।
(६) जातवेदस्यमिति ख० ग० ।
(७) भातोऽग्निमिति क० ग० घ०, अग्निरिति ङ० ।
(८) संयोज्येति ख० ङ० पुस्तकान्तरेषु ।
(९) तौ इति ङ० ।
(१०) चोभाविति ख० ङ० पुस्तकान्तरेषु ।
(११) ऋषिरिति क० ग० घ० ।

---

(क) ऋ० २, १०, ७ ।

उक्तेषु(१) कर्मस्विन्द्रेषु भीतस्तावाशु विवेश ह(२) ॥६५॥
इदमन्तरमित्युक्त्वा ताविन्द्रस्तु न्यवर्हयत् ।
निहत्य तौ गृत्समदमृषिं(३) शक्रोऽभ्यभाषत ॥६६॥
यथेष्टं मास(४)खे पश्य प्रियस्त्वं(५) ह्यागतोऽसि(६) मे ।
वरं गृहाण मत्तस्त्वमद्य(७) चास्तु ते तपः ॥६७॥
प्रज्ञ(८)स्तु प्रत्युवाचर्षिरस्माकं वदतां वर(९) ।
तनूनामस्तु चारिष्टिर्वाक् चास्तु हृदयङ्गमा ॥६८॥
सुवीरा(क)रयिमन्त(ख)श्च वयन्त्वामिन्द्र धीमहि(१०) ।
इन्द्र(११)त्वाञ्च विजानीमो वयं जन्मनि(१२) जन्मनि ॥६९॥

(१) कीर्त्तिष्विति क० घ० च० ।
(२) भीतौ सथुपतुस्तदेति ख० ङ० पुस्तकान्तरञ्च ।
(३) इदमिति ख० पुस्तकान्तरञ्च ।
(४) मांसमिति पाठः सङ्गतः ।
(५) मास खे पश्य प्रियस्त्वमिति क० घ० च० । अथ, मांस खे पश्यं प्रियस्त्वमिति पाठो विशुद्धः ।
(६) प्रियस्त्वं चागतोऽसीति ख० ।
(७) मत्तश्चाद्यैवमिति क० घ० च० ।
(८) प्रज्ञा इति क० घ० च० ।
(९) वरेति क० ग० घ० च० ।
(१०) इन्द्र वामहे इति ख०, इन्द्रमीमहे इति ख० ।
(११) इन्द्रमिति ङ० ।
(१२) जन्मनीति क० ग० घ० च० ।

(क) ऋ० ६, १९, ५ । (ख) ऋ० १०, ७४, १ ।

त्वद्गत(१)श्चैष मे भावो मापगास्मद्रथीतरः(२) ।
निरुक्तं तदिदं चार्षमिन्द्रश्चैताभ्यृचानया ॥७०॥
वव्रे वरमिदं सर्वं तदाकर्ण्य शचीपतिः(३) ।
तथेत्युक्त्वा तुराषाट् त्वां(४) पाणौ जग्राह दक्षिणे ॥७१॥
स्थापयामास सलिलेन पाणिना पाणिमस्पृशत् ।
सहितौ जग्मतुश्चैवं महेन्द्रसदनं(५) प्रति ॥७२॥
तत्रैनमार्हयत्प्रीत्या स्वयमेव पुरन्दरः ।
कर्मणा विधिदृष्टेन तम्रर्षिश्चाभ्यपूजयत्(६) ॥७३॥
सखिलाय पुनश्चैन(७)मुवाच हरिवाहनः ।
ऋणान्मादयसे यस्मात्त्वमस्मानृषिसत्तम ॥७४॥
तस्माद्गृत्समदो नाम शौनहोत्रो(८) भविष्यसि ।
ततो द्वादशभिः सूक्तैस्तुष्टावेन्द्रं श्रुधी(९)(क)त्यृषिः ॥७५॥

(१) त्वा तत इति क॰ घ॰ च॰ ।
(२) मापगाश्च रथीतरः इति ङ॰ पुस्तकान्तरञ्च ।
(३) निरुक्तं तदिदं चार्षमित्यादि तदाकर्ण्य शचीपतिरित्यन्तपाठः, क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु, नोपलभ्यते ।
(४) त्वामित्यत्र तमितिपाठः शुद्धः। रथाङ्गन्त्विति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(५) महेन्द्रभवनमिति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(६) चाभ्यपूजयदिति क॰ । तन्त्रर्षिं चाभ्यपूजयदिति ख॰ ग॰ घ॰ च॰ ।
(७) एवमिति पुस्तकान्तरम् ।
(८) शौनकोऽत्र इति ख॰ ।
(९) इन्द्रश्रुधीत्यृषिरिति क॰ पुस्तकान्तरञ्च ।

(क) ऋ॰ १, २५, १९ ।

ददर्श संस्तुवन्नेव तत्र स ब्रह्मणस्पतिम्।
बृहस्पतिं तु तुष्टाव दृष्टलिङ्गाभिरेव च(१) ॥७६॥
स तमप्यभितुष्टाव(२) चतुर्भिरत(३) उत्तरैः।
गणानां विश्वमित्यस्यां(४) सहेन्द्राब्रह्मणस्पती ॥७७॥
बृहस्पतिं प्रसङ्गाद्वा(५) ब्रह्मणस्पतिमेव च(६)।
तुष्टाव कर्म्मणैकेन प्रभावस्यान्तरन्तयोः(७) ॥७८॥
मित्रावरुणदक्षांशतुविजात(क)भगार्य्यम्णाम्(८)।
आदित्यानामिमाः (९)सूक्तमिदं वारुणमुच्यते(१०) ॥७९॥

---

(१) बृहस्पतिन्तु तुष्टाव दृष्टि लिङ्गस्तवैः सहेति ख०, दृष्टलिङ्गस्तवैः सहेति ङ०।
(२) अभ्यभितुष्टावेति क० ख० ग० पुस्तकान्तरञ्च।
(३) चतुर्भिरिति उत्तरैरिति ग०, चतुर्भिरित उत्तरैरिति ङ०, चतुर्भिरेव उत्तरैरिति पुस्तकान्तरम्।
(४) अस्या इति ङ०, विश्वामित्रस्येति ख०।
(५) प्रसक्तत्वादिति ख० ङ०।
(६) ब्रह्मणस्पतिमेव वेति ङ०।
(७) रयोरिति ग०। श्लोकार्द्धमेतत् ख० ङ० चिह्नितपुस्तकयोर्नोपलभ्यते।
(८) तुविजातभगार्यमामिति ख०।
(९) इमाप्सुक्तमिति ख०। इमाः इत्यत्र इदमिति पाठो विशुद्धः।
(१०) वरुणमिति ग०।

---

(क) ऋ० १, १३१, ७।

(१)घृतव्रता वैश्वदेवन्त्वमैन्द्रं परन्तु यत्(२)।
प्रहि क्रतुमिति त्वामिन्द्रासोमौ सह स्तुतौ ॥८०॥
सरस्वति त्वमित्यस्मिन्नर्द्धर्चे मध्यमा तु वाक्(३)।
बृहस्पतिन्तु यो नस्तु(४) उत्तमा मरुतस्तुतिः(५) ॥८१॥
अस्माकं वैश्वदेवन्तु सूक्तादावुत्तमस्य तु(६)।
द्यावापृथिव्योर्द्वे त्वाद्यौ(७) तथैवैन्द्र्यौ(८) परे ततः ॥८२॥
द्वे द्वे राकासिनीवाल्योः षड्लैङ्ग्योऽग्न्यास्तथान्तया(९)।
(१०)रौद्रं मारुतन्तु पर(११)मा ते धारावरा इति ॥८३॥

---

(१) वारुणीयो म इत्याद्या द्व स्वप्नादप्रणाशिनी। श्लोकार्द्धमेतद् ग० चिह्नितपुस्तके घृतव्रतेति श्लोकात् पूर्व्वमधिकं पठितं।
(२) परं यत इति ख०, पर तत इति ङ०।
(३) माध्यमानुवागिति ख०।
(४) बृहस्पते स्तुतिर्यो मा इति ख०, यो न स्त इति ग०।
(५) बृहस्पते स्तुतिर्यो उ त्वम्बकश्चमरुता स्तुति इति ङ०।
(६) अस्माक वैश्वदेव स्यात् सूक्तादावस्य चास्य ऋगिति ग०, स्यादद्या ऋच् चान्तिमास्य त्विति ङ० पुस्तकान्तरञ्च।
(७) ऋग्द्यावापृथिवीयृचेति क० घ० च०, द्यावापृथिव्योस्त्वाद्यौ वै इति ख०। वै इत्यत्र वा इति ग०।
(८) वाथ चैन्द्र्या इति ग०, चैन्द्रौ वैर्वौ इति ङ० पुस्तकान्तरञ्च।
(९) तथान्त्ययेति ग०, षड्भुगवाद्यन्तया स्तुता इति क० घ० च०।
(१०) ख० ङ० चिह्नितपुस्तकयोः पुस्तकान्तरे च रौद्रमित्यस्मात् पूर्व्वं, तत्पूर्व्वे द्वे ऋचौ कुह्वा कुहूमहमिति स्तुते। तदुत्तरे द्वे अनुमतेरनुमो न्विति ते स्तुते। धातुस्तवस्तथादौ धाता ददाति नो रयिम्(क)। इत्यधिकं पठितं।
(११) रौद्रं स्यात् परमारुतमिति पुस्तकान्तरम्।

---

(क) ऋ० १, १, ३।

ऋषेर्जिगमिषोराशां ववाशा(क)त्याय[1] दक्षिणाम् ।
स तमार्येव सम्प्रेक्ष्य चक्षुषा पक्षिरूपिणम् ।
पराभ्यामभितुष्टाव सूक्ताभ्यान्तु कनिक्रदत्(ख) ॥८८॥

प्रगाथ गायंस्तपसाऽभ्यगच्छ[2]-
द्ब्रह्मर्षितामेकशतश्च पुत्रान् ।
स गाधिपुत्रस्तु जगाद सूक्तं
सोमस्य मेत्याग्नेयं यत्परञ्च[3] ॥८९॥

वैश्वानरीयेति[4] समित्समिदा
प्रोदे आग्नेये[5] उत्तरे त्वत्र[6] सूक्ते ।
द्यावापृथिव्यौ तु निपातभाजा[7]
वापोऽथ देवाः पितरश्च मित्रः[8] ॥९०॥

आग्नेयेषु दृश्यन्ते स्तुतास्तु[9]-

(१) ववासे प्रतीति ख० ङ० पुस्तकान्तरञ्च ।
(२) अभ्यगच्छदिति ङ० पुस्तकान्तरञ्च ।
(३) नेत्यग्नये तत्परे चेति ख० ङ० पुस्तकान्तरञ्च ।
(४) वैश्वानरीयेऽथेति ख० ङ० पुस्तकान्तरञ्च ।
(५) प्रियो द्वे चेति ख० ङ० पुस्तकान्तरञ्च ।
(६) त्वस्येति ख० ङ० पुस्तकान्तरञ्च । उत्तरेत्यचेति ग० ।
(७) द्यावा पृथिव्या उभयो निपाता इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(८) आपोऽथ देवा पितरोऽथ मित्र इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(९) क० घ० च० चिह्नितपुस्तकेषु स्तुतास्तु इत्यत्र तु इति पाठो न दृश्यते ।

(क) ऋ० २, २, २ । (ख) ऋ० ६, १२८, ३ ।

वैश्वानरो वरुणो जातवेदाः।
स्तूयन्तैका यत्र यत्रास्तुतिर्वा(१)
नैपात्यांस्ता(२)श्चोपमार्थांश्च(३) विद्यात् ॥८१॥
राजर्षयो गृत्समदो वसिष्ठ
भरद्वाजः कुशिको गौतमश्च।
विश्वेऽश्विनावङ्गिरसोऽत्र योऽदिति-
र्भौजाः कण्वो(४) भृगवो रोदसी दिशः ॥८२॥
सावित्रसौम्याश्विन(५)मारुतेषु
ऐन्द्राग्नेये रौद्रसौर्यापसेषु(६)।
आद्यावन्ते सूक्तमध्ये स्तुताश्च(७)
न व्याप्नुन्ति देवताः सूक्तभाजः(८) ॥८३॥
अग्नेः सप्तदशोऽध्याय ऊर्ध्वं जनुष जनये(क)।

---

(१) स्तुत्यौ यत्र तत्रान्यस्तुतिर्वेति ख० ग० पुस्तकान्तरञ्च।
(२) निपातार्थाः इति क० ग० घ० च०।
(३) उपमार्थाश्चेति पाठः साधुः।
(४) कण्वा इति ख० ग० पुस्तकान्तरञ्च।
(५) सौम्याश्विनेति ख० ग० पुस्तकान्तरञ्च।
(६) सौम्यौमसोऽग्निति ख० ग० पुस्तकान्तरञ्च, चैविसेऽग्निति च०।
(७) स्तुताश्चा इति ग० पुस्तकान्तरञ्च।
(८) प्रश्नो देवता सूक्तभागिनोमिति पुस्तकान्तरम्, सूक्तभाजा इति ङ०, सूक्तभागिनामिति ग०।

---

(क) ऋ० १, ३, १।

एते काण्व्यावृचौ यौप्यौ घ्नन्ति लेति पञ्च च[१] ॥८४॥
प्रेषा वङ्क्यो यूपेभ्यो[२] वैश्वदेवौ तृगष्टमौ[३]।
श्रंस्या[क]न्या प्रश्विनी योक्ता[४] षष्ठमैन्द्राग्न[५]मुच्यते ॥८५॥
वैश्वदेव्यग्निमुपर्धं[६] दधिक्राव्णेति[७] चैतया।
आग्नेन्द्री त्वम इन्द्रेति परा[८] वैश्वानरस्तृचः ॥८६॥
प्रयन्तु मारुता[९]श्चान्या शतधारन्नुरुस्तवः।
प्र वो वाजा ऋतू[१०] स्तौति ऋत्विजः स्तौति[११]मन्यतः॥८७॥
पुरीष्यास[१२] [ख]इति त्वसान्धिष्ण्यानग्नीन् प्रशंसति।

---

(१) एते काण्व्यावृचौ घोमौ यौप्यौ घ्नन्ति पञ्च चेति ख०।
(२) प्रैषेभ्यो वङ्क्यूपेभ्य इति ग०।
(३) वैश्वदेवौ ऋगष्टमीति क०, वैश्वदेवोत्यृगष्टमीति पुस्तकान्तरम्।
(४) स्यान्ता प्रशस्यना योक्तेति घ०।
(५) स्यान्ताः प्रशस्यनाः योक्तेन्द्राग्नो ऐन्द्राग्नमिति ङ० पुस्तकान्तरञ्च।
(६) अग्निमुपसं वैश्वदेवीति क० ख० ग० घ० च०।
(७) दधिक्रामितीति क० ग० घ० च०।
(८) अग्नीन्द्रौ त्वम इन्द्रयक्तूं परेति ङ० पुस्तकान्तरञ्च।
(९) प्रयन्तमारुतः इति ख० ङ० पुस्तकान्तरञ्च।
(१०) ऋतूनितिपाठः समीचीनः।
(११) स्तौति ऋत्विजश्चेति ख० ङ० पुस्तकान्तरञ्च।
(१२) पुरीष्यास इति ग०।

---

(क) ऋ० १, १८१, ७। (ख) ऋ० ३, २२, ४।

ज्ञेया[१]श्चैव तु श्रोतारस्ते दैव्याश्चैव तत्र तु[२] ॥९८॥
नयोर्विंशतिरैन्द्राग्नौ इच्छन्तीति पराक्षतः।
सूक्ते प्रेति तु नद्यश्च विश्वामित्रं समूदिरे[३] ॥९९॥
[४]पुरोहितः सन्निव्यार्थे सुदासः सोऽहरद्धनम्।
विपाट्छुतुद्र्योः सम्भेदं समित्यैते उवाच ह ॥१००॥
सनादाश्च दृश्यन्ते दिवद्दत्तवदेकवत्।
अच्छेत्यर्द्धर्चे पञ्चो वा नदीष्वप्येकवन्ति ते ॥१०१॥
आद्ये द्वृचे दिवस्यार्द्धं विश्वामित्रवचःश्रुतेः।
एनाभिर्ऋग्भिर्वा नद्य ऋषिं बह्वदूचिरे ॥१०२॥
षष्ठ्यष्टम्यौ[५]श्चतुर्थ्याश्च दशम्याश्चेतरा ऋषेः।
सप्तम्यामृचि षष्ठ्याश्च यौ देवौ[६] परिकीर्तितौ ॥१०३॥
निपातिनौ तु तौ ज्ञेयौ त्वैन्द्रापार्वत्यृगुत्तमे[७]।
करोति पुत्रिकां नारी[८] यथा दुहितरन्तथा ॥१०४॥

---

(१) यूपा इति ख०।
(२) तत्र चेति ख० ङ०।
(३) विश्वामित्रः समूहिरे इति ख० ग० पुस्तकान्तरे, स संवदन्निति क० घ० च०।
(४) पुरोहित इत्यादि श्लोकत्रयं क० घ० ङ० चिह्नितपुस्तकेषु नोपलभ्यते।
(५) षष्ठ्यष्टम्योरिति पाठः साधुः।
(६) यौदकौ इति ग०।
(७) पार्वत्युगृतमेति ङ० पुस्तकान्तरे च।
(८) मामेति ख० ङ० पुस्तकान्तरे च।

तस्यां सिद्ध्यति रेतो वा[1] तच्छ्रावदिति कीर्तितम् ।
रिक्थस्य दुहितुर्दानं नेत्यृचि प्रतिषिध्यते[2] ॥१०५॥
तस्याश्चैव[3] यवीयांसं भ्रातरं ज्येष्ठवत्सुतं ।
सुदासश्च महायज्ञे दक्षिणा गाधिसूनवे[4] ॥१०६॥
निगृहीतं बलाच्चेतः[5] सोऽवसीदद्विचेतनः ।
तस्मै [6]ब्राह्मीन्तु सौरीं वा नाम्ना वाचं ससर्परीं ॥१०७॥
सूर्य्यवयादिहागत्य ददुस्ते[7] जमदग्नयः ।
कुशिकानां ततः सा वागमतिन्तामपाहनत् ॥१०८॥
उपेत्य चाख्यां[8] कुशिकान् विश्वामित्रो बुबोध यत् ।
लब्ध्वा वाचं च हृष्टात्मा[9] तानृषीन् प्रत्यपूजयत्[10] ॥१०९॥
ससर्परीरिति द्वाभ्यामृग्भ्यां वाच स्तुवन् स्वयम् ।
स्थिरावित्यनयो[क]ऽन्नान्यनडुह[11]श्च गृहान् व्रजन् ॥११०॥

---

(१) रेतो धा इति ख॰ पुस्तकान्तरञ्च ।
(२) प्रतिषेधतीति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(३) तस्याश्चाहेति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(४) प्रक्षिप्ता गाधिसूनवे इति क॰ ग॰ घ॰ च॰ ।
(५) गृहीत्वा बलाच्चेतः इति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(६) तस्येति क॰ घ॰ ।
(७) ता ददुरिति ख॰ ङ॰ पुस्तकान्तरञ्च । आगत्येत्यत्र आहृत्येति क॰ ग॰ घ॰ च॰ ।
(८) उपेति चाख्या कुशिकानिति क॰ घ॰, उपेत्य वाचं कुशिकानिति ङ॰ ।
(९) प्रतिष्ठात्मेति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(१०) अभ्यचेतयदिति ङ॰ पुस्तकान्तरञ्च ।
(११) इत्यनयाश्चान्यनडुहमिति क॰ घ॰ । अनडुहमित्यत्र अनडुहः इति ग॰ ।

---

(क) ऋ॰ ४, १०, १० ।

[१]अनसोऽङ्गानि चोत्थाप्य अनड्वाहौ गृहात्मजौ।
ततश्च स्वशरीरस्थ गृहान् स स्वयमाप ह ॥११११॥
रथश्च स्वशरीरेण गृहान् गच्छन् परादृदे।
पराश्वतस्रो यास्त्वत्र वसिष्ठद्वेषिणीर्विदु.[२] ॥११२॥
विश्वामित्रेण या[३] प्रोक्ता अभिशापा इति स्मृताः।
द्विषद्द्वेषास्तु ताः प्रोक्ता विद्यास्वेवाभिचारिका.[४] ॥११३॥
वसिष्ठास्ता[५]न शृण्वन्ति तदाचार्य्यकसम्मतम्।
कीर्त्तनाच्छ्रवणाद्वापि महान् दोषः प्रजायते[६] ॥११४॥
शतधा भिद्यते मूर्द्धा कीर्त्तितेन श्रुतेन वा।
तेषां बालाः प्रमीयन्ते तस्मात्तास्तु न कीर्त्तयेत् ॥११५॥
विश्वांश्च देवां[७]स्तुष्टाव चतुर्भिरिममित्यृषिः।
अस्तौदिश्वात्मना सर्व्वान् मन्यमानः परं पदम् ॥११६॥

---

(१) अनस इत्यादिसार्द्धश्लोक क० ग० घ० चिह्नितपुस्तकेषु नेक्ष्यते। तेषु अस्मिन् स्थले, तन्वश्च स्वा शरीरस्थ गृहानाच्छन् परीददे इति पाठोऽस्ति।

(२) वसिष्ठद्वेषिण्य स्मृता इति क० ख० ग० घ०।

(३) त्विति क० ख० ग० घ० च०।

(४) विद्वेषिण्य स्मृता विद्यादभिचारेषु शस्यते। इति क० ग० घ० च०।

(५) त्विति ख० पुस्तकान्तरञ्च, ते इति घ०।

(६) श्लोकार्द्धमेतत् क० घ० चिह्नितपुस्तकयोर्न दृश्यते।

(७) विश्वान् देवांश्चेति ङ० पुस्तकान्तरञ्च।

(१)देवानामसुरत्वं तदेकं महदितीरयन्।
अश्विनौ मित्र ऋभवो(२) धेनुर्मित्र इहेह वः ॥११७॥
(३)वैश्वदेवीति विज्ञेया मैत्री मित्राय पञ्च तु।
ऐन्द्रार्भवस्तृचस्तत्रार्भवे सूक्तः स उत्तमः(४) ॥११८॥
(५)पूर्व्वे द्व्यृचे निपातोऽत्र उषो वाजेन पञ्चमात्।
उपस्यादुत्तरे षड्भिः स्तुता ऋग्देवता द्व्यृचे(६) ॥११९॥
ऐन्द्रावरुणः प्रथमो बार्हस्पत्यस्ततः परः(७)।
पौष्णसावित्रसौम्याद्य मैत्रावरुण उत्तमः(८) ॥१२०॥
तुष्टाव जमदग्निश्च(९) तेन देवा हता दधौ।
देवर्षिपितृपूजार्थं य अन्नाद्यपचच्चुनः(१०) ॥१२१॥

---

(१) ऋक्तौदिस्वात्मना सर्व्वानित्यादि महदितीरयन्नित्यन्तपाठः क० ग० घ० चिह्नितपुस्तकेषु नोपलभ्यते।

(२) ऋतवः इति क० घ० च०।

(३) वैश्वदेवीति श्लोकार्द्धं ख० ङ० चिह्नितपुस्तकयोर्न विद्यते।

(४) उत्तमे इति ख० ङ० पुस्तकान्तरयोः।

(५) पूर्व्वे द्व्यृचे इति श्लोकार्द्धं क० ख० घ० चिह्नितपुस्तकेषु नेष्यते।

(६) पौषसादुत्तरास्वन्त्ये षट् पृथग्देवतास्तृचा इति क० ख० ग० घ० च०।

(७) तथापरः इति ग०। तदुत्तरः इति ङ०।

(८) षस्यामन्त्यस्तु यस्तृच इति ङ० पुस्तकान्तरयोः।

(९) जमदग्निस्तु इति ख० ङ० पुस्तकान्तरयोः।

(१०) पपापान्नाद्यिपच्चुन इति क० ग० घ० च०।

यस्य वै श्येनरूपेण मध्वर(१)हृत्वहा मधु।
सोऽग्निन्तु पञ्चदशभिरिन्द्रं षोडशभिः परैः ॥१२२॥
ऋषिस्त्वामिति तुष्टाव सूक्तैरेतैस्तु(२) गौतमः।
स भ्रातरमिति त्वासु(३) तिसृष्वग्निर्निपातभाक् ॥१२३॥
वरुणेनाभिसंस्तौति त्वाङ्ग(४)रन्ये निपातितम्।
लिङ्गोक्तदेवते सूक्ते एके(५) मत्यग्निरेव तु(६) ॥१२४॥
ऋषिर्बोधदिति द्वाभ्यां स्तौति सोमकमेव तु(७)।
तस्यैव चायुरर्थाय(८) पराभ्यामश्विनौ स्तुतौ ॥१२५॥
अयमयानुजनिर्येऽहं(९) ब्रुवाणं गर्भ एव(१०) तम्(११)।
अभ्यगात्त्वदिति(१२) पुत्रमिन्द्रमात्मस्थितेषिणी ॥१२६॥

---

(१) यस्य च श्येनरूपेण चाहरदिति ख॰ ङ॰ पुस्तकान्तरञ्च।
(२) रवि त्विति ग॰ घ॰, रवि चेति ङ॰ पुस्तकान्तरञ्च।
(३) त्वास्त्विति ङ॰।
(४) अभिसंस्तौत्या प्राङ्गरिति क॰ ग॰ घ॰ च॰।
(५) लिङ्गोक्तदैवत सूक्तमेते इति क॰ ख॰।
(६) लिङ्गोक्तिदैवते सूक्ते एके प्रत्यग्निरित्युभे, इति ङ॰।
(७) सोमकभूपतिमिति ङ॰ पुस्तकान्तरञ्च।
(८) चायुषोऽर्थायेति ख॰ ङ॰ पुस्तकान्तरञ्च।
(९) अनिश्यामेति क॰ ख॰ च॰, अनिश्याम इति ग॰।
(१०) गर्भमेवेति क॰ ग॰ घ॰ च॰।
(११) त्विति क॰ ख॰ ग॰ घ॰ च॰।
(१२) अभ्यगाददितिरिति ङ॰ पुस्तकान्तरञ्च।

अयमित्यथ वै सूक्ते[1] त्र्यृचे स्तुतिर्ऋतस्य हि[2]।
प्रसुपविभ्यो नवभिर्ऋग्भिः श्येनस्य[क] संस्तवः ॥१२१॥
पराभिस्त्वेति पञ्चर्चे सोमेनेन्द्रः स्तुतः[3] सह।
सोमप्रधाना[4]नेतान्तु क्रौष्टुकि[5]र्मन्यते स्तुतिं ॥१२२॥
दिवश्चिदिति चानेन तृचेनेन्द्रेण संस्तुतः[6]।
उषमं मध्यमां मेने लाचार्य्य[7] शाकटायनः ॥१२३॥
वाममित्यृक्स्तुतास्तात्र[8] भगः पूर्वेति चार्य्यमा।
कल्हतौ[ग]ति पूषोक्तोऽद्न्तकः स इति श्रुतेः ॥१२४॥
अभ्याकमुत्तमं सूर्य्यं स्तौतीत्याश्वलायन[9]।

(१) अद्दमित्यात्मसंस्तव इति ख॰ ङ॰, अहमित्यात्मसंस्ताव इति ग॰।
(२) त्र्यृचे स्तुतिर्विमस्य चोति ख॰, त्र्यृचे स्तुतिर्दिवास्य चोति ङ॰ पुस्तकान्तरय।
(३) पराभिस्त्वेव पञ्चर्चे सोमेन्द्र सस्तुत इति क॰ घ॰, सोमेन्द्रौ च स्तुत इति ग॰।
(४) सोमप्रधानमिति क॰ ख॰ ग॰ घ॰ ङ॰।
(५) क्रोष्टुक इति क॰ घ॰ ङ॰।
(६) चैतेन ते तृचे नेन्द्रसंस्तुतेति क॰ घ॰ ङ॰, इन्द्रसंस्तुतामिति ग॰।
(७) मेने चाचार्य्य इति ग॰ ङ॰ पुस्तकान्तरय।
(८) वाममि त्र्यृचि संस्तुतेति ग॰ ङ॰ पुस्तकान्तरय।
(९) कल्कलोकादि स्तौतीत्याश्वलायनः इत्यन्तपाठः क॰ ग॰ घ॰ ङ॰ चिह्नितपुस्तकेषु न दृश्यते।

(क) ऋ॰ १, ११८, ११। (ग) ऋ॰ ७, १९, २३।

इन्द्रस्य हरयो ह्यश्वा अग्नेरश्वस्तु[1] रोहितः ॥१२५॥
सूर्य्यस्य हरितश्चैव[2] वायोर्नियुत एव च।
रासभा रोहितो[3]ऽश्विभ्यामजाः[4]पूष्णश्च[5]वाजिनः॥१२६॥
पृषतो[6]ऽश्वास्तु मरुतां गावोऽरुण्यस्तथोषसः[7]।
सवितुर्वाजिनः श्यावा[8] विश्वरूपा बृहस्पतेः ॥१२७॥
सहैते देवताभिस्तु[9] स्तूयन्ते स्वल्पशो[10] ऽन्यथा।
आयुधं वाहनं चापि स्तुतौ यस्येह दृश्यते ॥१२८॥
तमेव तु स्तुतं विद्यात्तस्यात्मा बहुधा हि सः।
कनीनका[क]सूक्तशेषो हर्य्योः स्तुति[11] रिहोच्यते।
चत्वार्य्यतश्च विज्ञेयान्यसम्बद्धानि[12] विद्रधे[ख] ॥१२९॥

इति बृहद्देवतायां चतुर्थोऽध्यायः।

---

(१) अश्वास्त्विति क० ख० घ० ङ० च०।
(२) मोक्ता इति ख० ङ० पुस्तकान्तरञ्च।
(३) रासभो मोहितः इति ख०ङ०पुस्तकान्तरञ्च, रासभौ सहितः इति ग०।
(४) माशा इति क० घ० च०।
(५) पूष्णस्त्विति ख० ङ० पुस्तकान्तरञ्च।
(६) एषत्य' इति ङ० पुस्तकान्तरञ्च।
(७) तथोषसामिति ख० ङ० पुस्तकान्तरञ्च।
(८) श्यामा इति क० घ० च०।
(९) चेति ख० ङ० पुस्तकान्तरञ्च।
(१०) स्तूयन्तेऽप्यतेऽन्यथेति क० घ० च०, स्तूयन्तेऽप्यन्यशोऽन्यथेति ग०।
(११) धर्मसक्तिरिति क० घ० च०, सूक्तशेषोऽप्यर्धशक्तिरिति ग०।
(१२) चत्वारि परमाश्रियान्यासम्बद्धानीति ख० ङ० पुस्तकान्तरञ्च।

---

(क) ऋ० १, ७, २। (ख) ऋ० ४, ३२, २३।

## अथ पञ्चमोऽध्यायः ।

प्रेति पञ्चार्धर्चं चौष्णि[१] दधिक्राणि पराण्यतः ।
ऋग्द्यावापृथिव्यौ स्तौति दधिक्राव्णां[क]मुखे तु या[२] ॥१॥
परोक्षैरमुतो वाग्भिर्नामभिस्तु स्तुतास्त्रयः ।
अग्निर्वायुश्च सूर्यश्च हंसः शुचिषदित्यृचा[३] ॥२॥
नियुक्ता सूर्यदेवत्या हंस इत्यैतरेयके[४] ।
द्वे त्वैन्द्रावरुणे सूक्ते[५] तत्र[६] चौष्याश्विनाश्विकः[७] ।
अर्धं वायो विद्धो[ग] तेषु [८]वायव्याः सप्त कीर्त्तिताः ॥३॥

---

(१) पञ्चार्धर्चमौष्णीति ङ॰ ।
(२) दधिक्राव्णा स्तुतौ हि वामिति ख॰, दधिक्राव्णो मुखे तु येति ग॰, दधिक्राव्णामुतो (ख) हि वामिति ङ॰ ।
(३) इत्यृचेति क॰ ग॰ घ॰ च॰ ।
(४) श्लोकार्द्धमेतत् क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न विद्यते ।
(५) द्वे इन्द्रावरुणे इन्द्रादिति ङ॰ ।
(६) तत इति ग॰ ङ॰ पुस्तकान्तरेषु ।
(७) आश्विनाश्विक इति क॰ ख॰ ग॰ घ॰ च॰ ।
(८) विद्धौ सा त्या इति घ॰ पुस्तकान्तरेषु ।

---

(क) ऋ॰ ४, ३८, ९ । (ख) ऋ॰ ६, २३, १५ ।
(ग) ऋ॰ ४, ४८, १ ।

नव चैवेन्द्रवायव्या ऐन्द्रा[1]स्तिस्रः शतेन षट्[2] ।
इदं कथितदेवत्यं यत्तु स्तम्भोत्तमो वृषः[3] ॥४॥
भुतिरिन्द्राबृहस्पत्योरष्टावेता ऋचः स्मृताः ।
बार्हस्पत्यन्तु तत्सूक्तमिदमित्यौपमे परे ।
पुरो धातुः कर्मसंज्ञा च इन्द्रानोच्यते[4] ऋचे[5] ॥५॥
तत्सावित्रौ दे तु कौ वैश्वदेवं[6]
मही द्यावा पृथिवीयं तत्परञ्च[7] ।
क्षेत्रस्येति तिस्रः क्षेत्रपत्याः[8]
शुनं[क] वाहाः शुनदेवी तृगुत्तमा[9] ॥६॥

---

(१) इन्द्रः इति क॰ ग॰ घ॰ च॰ ।
(२) शतेन षडिति छ॰ ।
(३) इदमित्यौपमे परे इति क॰ घ॰ च॰, यत्तं स्तम्भीतिमो वृषः इति ग॰ ।
(४) च इन्द्राणोच्यते इति पुस्तकान्तरम् ।
(५) भुतिरिन्द्राबृहस्पत्योरिति श्लोकः क॰ घ॰ च॰ चिह्नितपुस्तकेषु नेष्यते ।
(६) तत्सावित्रौ वैश्वदेवमिति छ॰ ।
(७) परन्तु यदिति क॰ ग॰ घ॰ च॰ ।
(८) क्षेत्रस्य क्षेत्रपत्यमन्तूयन्निति क॰ घ॰, क्षेत्रस्येति क्षेत्रपत्यन्तु वर्धिष्यति ग॰ ।
(९) शुनदेवन्तृगुत्तरेति ग॰ घ॰ पुस्तकान्तरञ्च ।

---

(क) ऋ॰ १, ११०, ५८ ।

वायुः शुनः सूर्य्य एवात्र[१] सीरः[२]
शुनासीरौ[क] वायुसूर्य्यौ[३] वदन्ति।
शुनासीरं यास्क इन्द्रन्तु मेने
सूर्य्येन्द्रौ तौ मन्यते शाकपूणिः ॥७॥
शुनासीरौ पञ्चम्यां तु स्तुतौ तौ
सीतायै षष्ठी त्वथ सप्तमी च[४]।
शुनं नः फालाः[ख] कृषिं स्तौति पादः[५]
शुनं कीनाशाः[ग] कृषिजीवान् मनुष्यान्[६] ॥८॥
शुनं पादे पर्ज्जन्यं तृतीये[७]
चैनामृषिः कृषिकामोऽ[८]जगाद।

(१) एवात्रेत्यत्र तेवेति ख० ङ० पुस्तकान्तरञ्च।
(२) सीर्य्यं इति क० घ० च०।
(३) वायुसूर्य्यमिति क० घ० च०।
(४) द्वे तु सीतायै षष्ठी सप्तमी चेति क० ग० घ० च०।
(५) पादे इति ङ०।
(६) कृषिजीमनुष्यानिति क० घ० च०।
(७) स्तुतः पादेऽत्र पर्ज्जन्यस्तृतीये इति क० ग० घ० च०।
(८) अन्यान् तृषिर्धर्म्मकाम इति क० घ० च०, अन्यनृषिर्धनका[म]
इति ग०।

(क) ऋ० ४, ५७, ५। (ख) ऋ० ४, ५७, ८। (ग) ऋ० ४, ५७, ८।

ऋषिं वा(१) स्तौति सर्व्वं हि सूक्तं
समुद्रादित्यग्नेर्मध्यमस्य ॥९॥
आदित्यं वा ब्राह्मणोक्तं प्रदिष्टं
ह्याग्नेयं(२) यद्वाज्यसूक्तं(३) हि दृष्टं(४)।
अपां स्तुतिं वा यदि वा घृतस्तुतिं
गवां स्तुतिं वा सूक्त(५)मेतद्वदन्ति ॥१०॥
स्वर्भानुदृष्ट सूर्य्यस्य अपघ्नत्य(६)तमोऽत्रयः।
सप्तविंशतिभिः सूक्तैरबोधीत्यग्निमस्तुवन् ॥११॥
त्रैवृष्ण(क)स्त्रसदस्युश्च(ख) अश्वमेध इति त्रयः।
स्तूयमानाः परीक्ष्याः स्युरग्निष्विते(७)क्वचित् क्वचित्(८)॥१२॥
ऐक्ष्वाक(९) स्त्र्यरुणो राजा त्रैवृष्णो रथमास्थितः।

---

(१) ऋषिवदिति क० ग० घ०।
(२) आग्नेयमिति ख० ङ० पुस्तकान्तरञ्च।
(३) वाय्वाज्यसूक्तमिति क० ग० घ०, वा प्राज्यसूक्तमिति ग०।
(४) प्रदिष्टमिति ख० ङ० पुस्तकान्तरञ्च।
(५) गवामेके शौर्य्यमिति क० ग० घ० च०।
(६) स्वर्भानुदिष्टसूर्य्यस्यापघ्नन् ये इति ग० ङ० पुस्तकान्तरञ्च।
(७) चाग्निष्विते इति घ०।
*(८) त्रैवृष्णस्त्रसदस्युश्चेति श्लोकः ख० ङ० चिह्नितपुस्तकद्वये न विद्यते।*
(९) ऐक्ष्वाकुरिति क० ग० घ० च०।

---

(क) ऋ० ५, २७, १। (ख) ऋ० ४, ३८, १।

सञ्जग्राहाश्वरश्मींश्च(१) वृशो जानः(२) पुरोहितः ॥१३॥

स ब्राह्मणकुमारस्य रथो गच्छञ्छिरोऽच्छिनत् ।

एनःस्वित्यब्रवीच्चैव स राजेनं(३) पुरोहितं ॥१४॥

सोऽथर्वाङ्गिरसान्मन्त्रान्(४) दृष्ट्वा सञ्जीव्य तं शिशुं(५) ।

क्रोधात्सन्त्यज्य राजानमन्यं देशं समाश्रितः ॥१५॥

हरोऽप्याग्नेर्ननाशास्य(६) तस्यापक्रमणादृषेः(७) ।

अग्नौ प्रास्तानि हव्यानि(८) न ह्यपच्यत(९) कानिचित् ॥१६॥

ततः प्रव्यथितो राजा अभिगम्य प्रसाद्य च(१०) ।

आनीत्वा सदृशं जानं(११) पुनरेव पुरोदधे ॥१७॥

स प्रसक्तो वृशोऽन्वैच्छद्धरमग्नेर्नृपक्षये ।

---

(१) यस्य रश्मींश्चेति क० ग० घ० ।

(२) वृशोजानः इति ख० ।

(३) राजा वमिति ख० ङ० पुस्तकान्तरञ्च ।

(४) सोऽथ वार्षाणि सामानीति क० ग० घ०, सोऽथर्वा गिरिशान् मन्त्रानिति ख० ।

(५) सुतमिति ङ० ।

(६) अस्येति ख० ग० ङ० पुस्तकान्तरञ्च ।

(७) तस्यापक्रमणाद्दूषेरिति क० ग० घ० च०, गुरोरिति ङ० पुस्तकान्तरञ्च ।

(८) प्रासानि पच्यानीति क० ग० घ०, प्रास्तानि प्रपद्यानीति ख०, प्रास्तानि चान्यानीति ङ० ।

(९) ह्यपच्यन्तेति पाठः साधुः । न ह्यपचतेति क० ग० घ०, प्रपच्यन्ते इति ग०, न भीमं केचेति ङ० ।

(१०) तमिति ग० ङ० पुस्तकान्तरञ्च ।

(११) आनीय सदृशं दार्भं इत्येव पाठो भवितुमर्हति ।

अविन्दत पिशाचीं च(१) जायां तस्य च भूपतेः ॥१८॥
निषण्णः स तया सार्द्धं मासं द्यां कशिपावपि(२) ।
तामुपामन्त्रयाञ्चक्रे कमेतं त्वमिति त्वृषा(३) ॥१९॥
घरः(४) कुमाररूपेण तूष्णी(५)मभ्यभाषत ।
विद्योतिषेति चोक्तायां सहसाग्निरुदज्वलत् ॥२०॥
(६)पिशाचीमदहत्तां स यत्र चोपविवेश सा ।
एष एव परामृष्टो भासवो ब्राह्मणो(७)ऽग्रचः ॥२१॥
निदानसंज्ञके ग्रन्थे छन्दोगानामिति श्रुतिः(८) ।
भवेदेव परामर्शः सूक्तस्यास्य व्यपेक्षया(९) ॥२२॥
भवन्ति याम्या मन्त्रा(१०) हि विधिशब्देन(११) चोदिताः ।

---

(१) तामिति ग० ङ० पुस्तकान्तरञ्च ।
(२) कशिपावपीति क० घ० च० ।
(३) पुंस्त्वृषेति ङ० ।
(४) नरः इति क० घ० च० ।
(५) पुंस्कामिति ख० ।
(६) ग० ङ० चिह्नितपुस्तकयोः पुस्तकान्तरे च, पिशाचीमदहत्तां स इति श्लोकात् प्राक्, यदमानः समायान्तं प्रकाशश्च प्रकाशयविच-चित्रं श्लोकार्द्धं पठितम् ।
(७) भासाभिव्याहृतः इति ख०, भास्वविव्याहृतः इति ङ० ।
(८) एतच्छ्लोकार्द्धं क० ग० घ० च० चिह्नितपुस्तकेषु न दृश्यते ।
(९) विवक्षयेति ग० ङ० पुस्तकान्तरञ्च ।
(१०) याम्यास्तेषामिति क० ग० घ० च० ।
(११) विधिपूर्वेणेति क० ग० घ० च० ।

दृश्यन्ते ब्राह्मणे मन्त्रा एकदेशे प्रदर्शिताः ॥२३॥
जामदग्न्यो यथाप्रिय(१) स्तौतीया(२)श्चैतरेयके ।
आप्रियः सुषमिद्धाय(३) पञ्चमं सूक्तमत्र तु(४) ॥२४॥
एतद्(५)वैश्वदेवी वा अन्या चैन्द्राग्न्युपोत्तमे ।
ऐन्द्राणि द्वादश चौणीत्युग्रला(६)यत्र(७) संस्तुतः ॥२५॥
उग्रनेति तु पादेन सहयद्दामनेन च(८) ।
इन्द्राकुत्सेति चैतस्या कुत्सेनेन्द्र स्तुतः सह ॥२६॥
यत्वा सूर्य्येति चाचीणां पञ्चर्चे(९) कर्म कीर्त्यते ।
(१०)त्रैवृष्णस्त्र्यरुणो राजा अश्वमेध घणं च य ॥२७॥
स्तूयमानाः प्रतीच्याः स्युरन्विष्येते क्वचित् क्वचित् ।
अनस्वन्तेति सूक्तेऽस्मिन्नाग्नेयेऽर्चिर्षि. स्वयम् ॥२८॥
दानतुष्ट प्रशंसैताश्वाजर्षीनिति केचन ।

---

(१) जामदग्न्यस्तथैवाज्य इति क० घ० च०, यथाप्रैष इति ग० ।
(२) स्तोकीयाः इति ख० ग० ङ० पुस्तकान्तरस्थ ।
(३) आपृम सुषमिद्धायेति क० ग० घ० च० ।
(४) चर्चिस्विति ख० ङ० पुस्तकान्तरस्थ ।
(५) एदस्मगिति क० ग० घ० च०, रोदस्मगिति ख० ।
(६) द्वादशान्यादीन्युग्रला इति ङ० पुस्तकान्तरस्थ ।
(७) त्वत्रेति क० ख० ग० घ० च० ।
(८) उग्रनेति च पादोऽयं सहयद्दा परस्य च इति ख०, परस्य यः इत्यत्र परस्याथ इति ङ० पुस्तकान्तरस्थ ।
(९) पञ्चर्चः इति क० घ० च० ।
(१०) त्रैवृष्णस्त्र्यरुणो राजेत्यादि श्लोकार्द्धमिदं क० ग० घ० च० चिह्नित पुस्तकेषु न विद्यते ।

आमीरथेपणाद्वैभ्यो अग्निं प्रति च दृश्यते ॥१९॥
अयुतञ्च गवां त्रीणि शतान्यथ च विंशतिः ।
सौवर्णशकटं गोभ्यां त्र्यरुणोऽदान्नृपोऽध्वये ॥२०॥
अश्वमेधशतं चोग्रांस्तमदस्युर्धनं बहु ।
राज्ञः प्रति च तत्सूक्तं बभाष इति केचन ॥२१॥
आत्मा श्रितात्मने[1] दद्यादप्यद्रीनृपतेर्नृपः ।
अत्रेः सुतस्त्वपि बभ्रुमार्त्विज्याय च्यूणश्च यः ॥२२॥
मदस्तद्वीचिणे सोमे वव्रे तं सोऽप्ययाजयत् ।
ददौ तदौशनो राजा सहस्राणि शतानि च ॥२३॥
तस्मै चत्वारि चत्वारि महावीरश्च काञ्चनम् ।
प्रवर्ग्येषु महावीराः सौवर्णास्तस्य चाभवन् ॥२४॥
प्रतिरिष्य ऋषिर्गच्छन् मध्यमेनाग्निना पथि ।
पृष्ट इन्द्रेण चाचख्यौ भद्रं चतसृभिश्च तत् ॥२५॥
सोमुत्वान् वैश्वदेवानि एकादश[2] पराण्यत[3] ।
मारुतानि दश प्रेति इन्द्राभीत्यृचि तु स्तुता[4] ॥२६॥
द्वितीययाश्वया स्तुतः सविता शौनकोऽब्रवीत्[5] ।
उपेति बार्हस्पत्यमृचो यो मारुत्युगुत्तरा ॥२७॥

---

(१) आत्मा श्रितात्मने इति पाठः शङ्कतः ।
(२) सोमुत्वांश्च वैश्वदेवान्येकादशेति क० ।
(३) स्थितं ड० पुस्तकान्तरेषु ।
(४) प्रेतीन्द्राभीत्यृचि तु संस्तुतेति ग०, इत्यादि न यावत् स्तुतेति ख० ड० पुस्तकान्तरेषु ।
(५) श्लोकार्द्धमेतत् ख० ग० घ० च० चिह्नितपुस्तकेषु न दृश्यते ।

तमुष्टुही तु रौद्री स्यात्[१] प्रष्टुतिरिति लृचि।
दृहस्पतिः शाकपूणिः पर्जन्याग्नी तु गालवः ॥३८॥
यास्कस्तु पूषणं मेने स्तुतमिन्द्रन्तु शौनकः ।
वैश्वानरं भागुरिस्तु मारुत्यौषममाश्विनं[२] ॥३९॥
वायव्याध्वर्यवः सौमी दृशेत्यैन्द्री परा तु या[३]।
[४]अग्निं धर्मं पराञ्जन्ति[५] अश्विनौ स्तौत्यृगर्द्ध च ॥४०॥
प्रेति वां पूषणं या चेत्यर्द्धर्चेऽग्निरिहोच्यते ।
प्रथमेऽथ द्वितीये च स्तुता एति दिवौकसः ॥४१॥
आवाचं मध्यमां स्तौति ततोऽन्या तु बृहस्पतिं।
[६]ज्याया समिति चादित्यं स वो वायुरिहोच्यते ॥४२॥
तं प्रत्नथे[क]ति सौमी वा दैव्यैन्द्री वा प्रजापतेः ।
परोक्षवैश्वदेवं तदाह कौषीतकिः स्वयम् ॥४३॥
तेषु क्लीयमित्युक्तं देवान् ऊव[ख] इदं परम् ।

---

(१) त्विति क० ग० घ० च० ।
(२) माश्विनीति क० ग० घ० च० ।
(३) इत्येन्द्रासैसावितौति ङ० पुस्तकान्तरञ्च ।
(४) अग्निं धर्ममित्यादिसार्द्धश्लोक क० ग० घ० च० चिह्नितपुस्तकेषु न पठितः ।
(५) पराजन्तौति पुस्तकान्तरम् ।
(६) ज्याया समिति चादित्यमित्यादि देवान् ऊव इदं परमित्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु नेक्ष्यते ।

---

(क) ऋ० १, ८९, १ । (ख) ऋ० १, १०, ७ ।

देवानां पत्नीरिति तु (१)देवपत्न्यो ह्यृचे स्तुताः ॥४४॥

अयं चतुर्णामिति चेन्द्रवायू
त्रिभिः स्तुतौ वायवुक्थे(क)ति वायुम् ।
रथं ह्यृचा रोदसी स्तूयतेऽत्र
यस्याः स्तुता मरुतो रुद्रपत्न्याः(२) ॥४५॥

आरुद्रा स इति त्वस्यां रुद्राणां संस्तुतो गणः ।
मरुतास्तु गणस्त्वेते नाम्ना(३)रुद्रा इति स्तुताः(४) ॥४६॥
अग्नावग्निरिमौ(५) सोमौ लग्नौ(६)पार्थिवमध्यमौ(७) ।
यदुक्तमे ह्यृचेऽर्द्धर्चे इत्ये(ख)ऽग्निं संस्तुतौ ह्यृचे ॥४७॥
मध्यमा वाक् स्त्रियः सर्व्वाः पुमान् माद्ध्य मध्यमः ।
गणाय सर्व्वे मरुतो गुणभेदात् पृथक् पृथक्(८) ॥४८॥

(१) चेति ख॰ ङ॰ पुस्तकान्तरच ।
(२) क॰ घ॰ च॰ चिह्नितपुस्तकेषु, अयं चतुर्णामितीति श्लोकस्थाने, अयं चतुर्णामिति च इन्द्रवायुस्त्रिभिः स्तुतौ । वायुर्द्वितीयपादान्त्यैका रथान्विति तु रोदसी । इति पाठो वर्त्तते ।
(३) गणस्तेतन्नामेति क॰ ग॰ घ॰ च॰ ।
(४) स्तुताः इति क॰ ग॰ घ॰ च॰ ।
(५) अयमिति ङ॰ पुस्तकान्तरच ।
(६) सोमावधो इति ङ॰ पुस्तकान्तरच ।
(७) पार्थिवमध्यमाविति ख॰ ।
(८) क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु, यदुक्तमे ह्यचेऽर्द्धर्चे इत्यादिश्लोकार्द्ध-श्लोकद्वये अपि मरुद्भिरिन्द्रस्त्वा मरुद्भिः साथ संस्तुताविति श्लोकार्द्धं वर्त्तते ।

(क) ऋ॰ ७, ९०, ३ । (ख) ऋ॰ १, १८८, ८ ।

राजर्षिरभवद्दार्भ्यो रथवीति[क]रिति श्रुतः[१]।
स यक्ष्यमाणो राजर्षिरभिगम्य प्रसाद्य च ॥४९॥
आत्मानं कार्य्यमर्थं[२]च ख्यापयन् प्राञ्जलिः स्थितः।
अवृणीतर्षिमात्रेयमार्चिज्यायार्चनानसम्[ख] ॥५०॥
स सपुत्रोऽभ्यगच्छत्तं राजानं यज्ञसिद्धये।
श्यावाश्व[ग]श्चार्चिपुत्रस्य पुत्रः खल्वर्चनानसः ॥५१॥
साङ्गोपाङ्गान् सर्व्ववेदान् यः पित्राध्यापितो मुदा।
अर्चनानाः सपुत्रोऽथ गत्वा नृपमयाजयत्[३]।
यज्ञे च विततेऽपश्यद्राजपुत्रीं यशस्विनीम् ॥५२॥
स्नुषा मे राजपुत्री स्यादिति तस्य मनोऽभवत्।
श्यावाश्वस्य च तस्यां वै सक्तमासीत्तदा मनः[४] ॥५३॥
संयुज्यस्व मया राजन्निति याज्यञ्च सोऽब्रवीत्।
श्यावाश्वाय सुतां दित्सुर्महिषीं स्वां नृपोऽब्रवीत् ॥५४॥
किं ते बुद्धीमहं कन्यां श्यावाश्वाय ददामि हि।
ऋषिपुत्रो दुर्बलो हि जामाता नावयोरिति ॥५५॥
राजानमब्रवीत् सापि नृपर्षिकुलजा ह्यहम्।

---

(१) श्रुतिरिति ङ० पुस्तकान्तरञ्च।
(२) कार्य्यवन्तमिति ङ० पुस्तकान्तरञ्च।
(३) श्यावाश्वश्चार्चिपुत्रश्चेति सार्द्धैकश्लोकः क० घ० च० चिह्नितपुस्तकेषु नोपलभ्यते।
(४) एतच्छ्लोकार्द्धं क० ख० च० चिह्नितपुस्तकेषु न दृश्यते।

---

(क) ऋ० ५, ६१, १९। (ख) ऋ० ५, ६४, ७। (ग) ऋ० ५, ६१, ५।

नानृषिर्नो हि जामाता नैष मन्त्रान् हि दृष्टवान् ॥५६॥
ऋषये दीयतां कन्या चेदृशी वा भवेत्तथा ।
ऋषिं मन्त्रदृशं वेदपितरं मन्यते यतः[१] ॥५७॥
प्रत्याचष्टे स[२] तं राजा सह सम्मन्त्र्य भार्य्यया ।
अनृषिर्नो न[३] जामाता कश्चिद्भवितुमर्हति ॥५८॥
प्रत्याख्यात ऋषिस्तेन वृत्ते यज्ञे न्यवर्त्तत ।
श्यावाश्वस्य तु कन्यायां मनो नैव न्यवर्त्तत[४] ॥५९॥
ततः स्तुतौ[५] निवर्त्याश्च तावेतावभिजग्मतुः[६] ।
शशीयसी[क][७] तरन्त[ख]श्च पुरुमीळ्ह[ग][८]श्च पार्थिवम्[९] ॥६०॥
तरन्तपुरुमीळ्हौ[१०] तु राजानौ वै ददृशुषौ[११] ।
ताभ्यां तौ चक्रतुः पूजामृषिभ्यां नृपती[१२] स्वयम् ॥६१॥

(१) श्यावाश्वाय सुतां दित्सुरित्यादिसार्द्धश्लोकत्रयं क॰ ग॰ घ॰ च॰-चिह्नितपुस्तकेषु नेष्यते ।
(२) प्रत्योवाचेति ख॰ ङ॰ पुस्तकान्तरयोः ।
(३) नैवेति ग॰ ।
(४) न च निवर्त्तते इति ख॰ ङ॰ पुस्तकान्तरयोः ।
(५) सतनौ इति क॰ ग॰ घ॰ च॰ ।
(६) ततः स्तुतौ निवर्त्तेत उभावेवाभिजग्मतुरिति ख॰ ङ॰ पुस्तकान्तरयोः ।
(७) शशीयसीति ङ॰ पुस्तकान्तरयोः ।
(८) पुरुमीढमिति ङ॰ ।
(९) एतच्छ्लोकार्द्धं क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न पठितम् ।
(१०) तरन्तपुरुमीढाविति ङ॰ पुस्तकान्तरयोः ।
(११) ददृशिवाविति क॰ घ॰ च॰ ।
(१२) तु पतिरिति क॰ घ॰ च॰ ।

(क) ऋ॰ ५, ६१, ६ । (ख) ऋ॰ १, १०५, ११ । (ग) ऋ॰ ८, ७१, १४ ।

५७ महिष्याय दर्शयामास च(१) नृप ।
तरन्तानुमतेनैव(२) प्रादाद्बहुविधं वसु ॥६२॥
अजाविकं गवाश्वञ्च श्यावाश्वाय शशीयसी(३) ।
अपि(४) याज्यार्च्चितौ गत्वा पितापुत्रौ स्वमाश्रमम् ॥६३॥
अभ्यवादयतामत्रि(५) महर्षिं दीप्ततेजसम् ।
श्यावाश्वस्य मनस्यासीन्मन्त्रस्यादर्शनादहम् ॥६४॥
न लब्धवानिमां कन्यां हन्त सर्व्वाङ्गशोभनाम् ।
अप्यहं मन्त्रदर्शी स्यां भवेद्धर्षो महान् मम ॥६५॥
इत्यरण्ये चिन्तयतः प्रादुरासीन्मरुद्गणः(६) ।
ददर्श संस्थितान् पार्श्वे तुल्यरूपान्महात्मनः(७) ॥६६॥
समानवयसश्चैव(८) मरुतो रुक्मवक्षसः ।
तांस्तुल्यवयसो दृष्ट्वा देवान् पुरुषविग्रहान् ॥६७॥
श्यावाश्वो विस्मितोऽपृच्छत्केष्ठेति(९) मरुतस्तदा ।

(१) वै इति ख० ङ० ।
(२) तरन्तानुमता चैवेति क० ग० घ० च० ।
(३) शशीयसीति ङ० पुस्तकान्तरञ्च ।
(४) तौ चिति पाठः सङ्गतः ।
(५) अभ्यवादयतामत्रिमिति ङ० पुस्तकान्तरञ्च ।
(६) अपि याज्यार्चितौ गत्वेत्यादि प्रादुरासीन्मरुद्गणः इत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु नेक्ष्यते ।
(७) तुल्यरूपानिवात्मनः इति क० ख० ग० घ० च० ।
(८) चैवसमिति ङ० पुस्तकान्तरञ्च ।
(९) के स्थेति पाठः समीचीनः । केष्ठेतीति क०, कोष्ठेतीति ङ० ।

ततस्तु मरुतो देवानृषिम्मानानवबुध्यत(१) ॥६८॥
य ईं वहन्त इत्यृग्भिः षड्भिः(२) स्तुष्टाव तांस्तथा ।
अतिक्रमं हितमृषिर्मेने विपुलमात्मनः ॥६९॥
यस्य(३) दृष्टेव तुष्टाव यस्य(४) केष्ठेति(५) पृष्टवान् ।
स्तुताः स्तुत्यानया प्रीता गच्छन्तः पृश्निमातरः(क) ॥७०॥
अवमुच्य स्वकण्ठेभ्यो(६) रुक्मं तस्मै तदा ददुः ।
मरुत्सु तु प्रयातेषु श्यावाश्वस्तु महायशाः(७) ॥७१॥
रथवीतेर्दुहितरमगच्छन्मनसा तदा ।
स सद्य ऋषिरात्मानं विवक्षूरथवीतये(८) ॥७२॥
एतं मे स्तोममित्यृग्भ्यां(९) दौत्ये(१०) रात्रीं न्ययोजयत् ।
रथवीति तपस्यन्तं(११) समेत्यार्थिष वहुषा ॥७३॥

---

(१) गनयमनवुध्यतेति क० ग० घ० च० ।
(२) षुड्भेति क० ग० घ० च० ।
(३) याम इति क० घ० च० ।
(४) यांद्वेति क० ग० घ० च० ।
(५) केष्टेतीति क०, केष्ठेतीति ख० ।
(६) अमुच्य स्वकण्ठेभ्य इति ख०, आमुच्यते स्वकण्ठेभ्य इति ग० ।
(७) महातपा इति ख० ग० पुस्तकान्तरे च ।
(८) सद्यश्चरथवीतये इति क० ग० घ० च० ।
(९) इत्याभ्यामिति क० ग० घ० च० ।
(१०) दूत्ये इति ख० पुस्तकान्तरे च ।
(११) रथवीतिमवाप्यन्तीमिति ग० ट० ।

(क) ऋ० १, ६१, १० ।

पि गर्भाणां दृष्ट्वा तदनुमन्त्रणम् ।
भावदृत्तं तु तत्त्वास्तथारूपं हि दृश्यते ॥८५॥
जरायुगर्भशब्दाभ्यामेतद्रूपं हि दृश्यते(१) ।
मह्ये उषसे(२) सावित्र युञ्जतेच्छावद.(३) स्तुत. ॥८६॥
पर्जन्यो वलिति तस्मिन्(४) पृथिवी मध्यमा तु(५)वाक्(६) ।
श्रद्धा नो देवसवितरिय दु खप्ननाशिनी(७) ॥८७॥
वारुणन्तु प्रघघाजे पङ्क्तमैन्द्राग्नमुत्तरम्(८) ।
विष्णुं न्यङ्ग(९)म्परमेति मारुत सूक्तमुत्तरम्(१०) ॥८८॥
एतया मरुदाख्यातं यौनैन्द्रे मतिपूर्व्वकम्(११) ।

---

(१) अन्नतामपि गर्भाणामित्यादिसार्द्धैकश्लोक क॰ ग॰ घ॰ च॰ चिह्नित-पुस्तकेषु नापलभ्यत ।
(२) मह्यौषसेतीति क॰ घ॰ च॰ ।
(३) सावित्रे युञ्जतेच्छेति वै इति क॰ ग॰ घ॰ च॰ ।
(४) पर्जन्यस्तु वर्षिष्येतीति ङ॰ पुस्तकान्तरञ्च ।
(५) न्विति ग॰ ।
(६) स्तुतेति ङ॰ पुस्तकान्तरञ्च ।
(७) एतच्छ्लोकार्द्धं क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न दृश्यते ।
(८) उत्तरमित्यत्र उत्तममिति च॰, इन्द्राग्नीन्द्राग्नमुख्यते इति ख॰, मिन्द्राग्नीन्द्राग्नमुख्यते इति ङ॰ पुस्तकान्तरञ्च ।
(९) विष्णुं विष्णुमिति ङ॰ पुस्तकान्तरञ्च ।
(१०) उत्तममिति ख॰ ।
(११) एतच्छ्लोकार्द्धं क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु नोपलभ्यते ।

श्रीसूक्तमाशीर्वादस्तु[1] स्त्रीपुत्राणां पराणि तु[2]। ८९॥
तस्यादा[3]लक्ष्म्यपनुद[4] मग्निस्तव[5] निपातभाक्।
प्रजावान् जीवपुत्रो[6] वा गर्भकर्मणि संस्तुतौ ॥९०॥
नानारूपाः पयस्विन्य[7] संस्रवन्तीति संस्तुता[8]।
आशीर्वादेषु संज्ञासु कर्मसंख्यास्तु देवताः[9] ॥९१॥
निपातभाग् लिङ्गवाक्यात्[10] परीचितेह मन्त्रवित्।
मन्त्रप्रयोगमन्त्रयोः[11] प्रयोगो[12] यत्नवत्तरः ॥९२॥

---

(१) आशीर्वादो स्यादिति ख०, स्याशीर्वादास्येति ङ० पुस्तकान्तरे च।
(२) स्त्रीपुत्राणां पराणि षट् इति क० घ० च०, षट् इति ग०, स्त्रीः पुत्राणां पराणि षट् इति ङ० पुस्तकान्तरे च।
(३) तस्यादिति क० घ० च०।
(४) लक्ष्म्यपनिर्णोदः इति क० घ० च०, स्याद्यालक्ष्मी पतेर्नोदे इति ख०, अलक्ष्म्यपनिर्णोदे इति ङ० पुस्तकान्तरे च।
(५) स्तवेति ख० ङ०।
(६) प्रजावञ्जीवपुत्र· इति क० ख० ग० घ० च०, प्रजावान् जीवपुत्रा इति ङ०।
(७) पयस्विन्यः इति ख० ग०।
(८) संस्तुताविति ङ०।
(९) कर्मसंख्या तु देवतेति ख०।
(१०) लिङ्गवाक्येति ख० ग०।
(११) मन्त्रप्रयोगमन्त्राणामिति ग०।
(१२) प्रयोगे इति ग०।

विधेस्तयोः परीचा[१] स्यान्मन्त्राः स्युरभिधायकाः[२] ।
तस्मात्तेन विसंवादो मन्त्राणां तद्गतानि तु ॥८३॥
गुणाभिधायकानि स्युः सविज्ञानपदानि तु ।
मन्त्रेषु गुणभूतेषु प्रधानेषु च कर्मसु ॥८४॥
प्रधानगुणभूताः स्युर्देवता इति गम्यते ।
त्रिसांवत्सरिकं सत्रं प्रजाकामः प्रजापतिः ॥८५॥
आहरत्सहितः साध्यैर्विश्वैर्देवैः सहेति च ।
तत्र वाग्दीचणीयायामाजगामाशरीरिणी[३] ॥८६॥
तां दृष्ट्वा युगपत्तत्र कस्याथ वरुणस्य च ।
शुक्रं चस्कन्द तद्वाभ्यामग्नौ प्रास्तं[४] यदृच्छया ॥८७॥
ततोऽर्चिर्भ्यो भृगुर्जज्ञे अङ्गारेभ्योऽङ्गिरा[क][५] ऋषिः ।
प्रजापतिस्तुतौ दृष्ट्वा दृष्ट्वा वागभ्यभाषत ॥८८॥
आभ्यामृषिस्तृतीयोऽपि भवेद्वैव मे सुतः ।
प्रजापतिमथेत्युक्तः प्रत्यभाषत भारतीम् ॥८९॥
ऋषिरत्रिस्ततो जज्ञे सूर्यानलसमद्युतिः ।
योऽङ्गारेभ्य ऋषिर्जज्ञे तस्य पुत्रो बृहस्पतिः ॥९०॥

---

(१) परीक्षा इति ग॰ ।
(२) अभिधानकाः इति ख॰, अभिधायिका इति ग॰ ।
(३) अशरीरिणीति पुस्त॰ पाठः ।
(४) प्रास्यमिति ख॰, प्रास्येति ग॰ ।
(५) अङ्गारेभ्याङ्गिरा इति ख॰, अङ्गारेभ्योऽङ्गिरा इति ग॰ ।

---

(क) ऋ॰ १, ११, १ ।

बृहस्पतेर्भरद्वाजो विदधीति[१] य उच्यते[२] ।
महत्त्वामीहुरर्यैव[३] स एवाङ्गिरसो नपात्[क] ॥१०१॥
सपुत्रस्य तु तस्येदं[४] मण्डलं षष्ठमुच्यते ।
त्वं ह्यग्न इति तत्रादावाग्नेयानि त्रयोदश ॥१०२॥
सूक्तानि त्रीणि मूर्द्धानमग्निर्वैश्वानरस्य तु ।
एकान्नविंशतिश्चैव[५] पिबेन्त्यैन्द्राण्य[६]तः परम् ॥१०३॥
अग्ने सचे यदित्यस्यां द्वौ देवौ तु[७] निपातितौ ।
प्रोतये नूम[८] इत्येते वैश्वदेव्यावृचौ तु ते[९] ॥१०४॥
ऋग्द्वितीया यदस्मान्यमैन्द्रमेति[१०] गवां स्तुतिः ।
आपस्तापाम[ख] इत्यस्यां वायुरिन्द्रश्च संस्तुतौ[११] ॥१०५॥
इन्द्रः प्राधान्यतो वाच स्तुतो वायुर्निपातभाक् ।

(१) विदधीसीति ङ० ।
(२) भगवान् जीवपुत्रो वा इत्यादि विदधीति य उच्यते इत्यन्तपाठः क० घ० च० चिह्नितपुस्तकेषु नायश्यते ।
(३) सुवन्यश्चेति क० घ० च०, गुरोर्यस्येति ख० ग० ।
(४) सतपुत्रस्य तस्यैतदिति क० ग० घ० च० ।
(५) एकाधित्रिंशद्देवान्येति ख०, एकान्नत्रिंशद्देवाम्नेति ङ० । एकोनविंशतिरिति भवितुमर्हति ।
(६) पिबन्त्यैन्द्राणीति पाठः शुद्धः ।
(७) देवौ याविति क० ग० घ० च० ।
(८) नम इति क० घ० च० ।
(९) स्तुते इति ङ० ।
(१०) चेमीति ग० ।
(११) इन्द्रवायू सह स्तुताविति ङ० पुस्तकान्तरस्थ ।

(क) ऋ० ६, १०१, १ । (ख) ऋ० ६, ३०, ३ ।

अयं देवमृचं सौम्यमैन्द्रमेके प्रचक्षते[१] ॥१०६॥
शरीरं चक्षुरित्यस्यां हृचोऽधीति[२] ह्वो:[क] स्तुतिः[३] ।
पितरं स्तौति शंयु[ख]श्च हृचस्यान्ते पदे स्वयम्[४] ॥१०७॥
स्वादु[ग]ष्किलायमित्येताः पञ्चर्चः सौम्य एव वा[५] ।
इन्द्रः प्रधानतो वात्र स्तुत. सोमो निपातभाक् ॥१०८॥
इन्द्रस्यैन्द्रनिपातोऽयं स्वयन्ते हैतरेयके[६] ।
आगव्यूति[घ] स्तौति देवान् पादो भूमिमथोत्तरः ॥१०९॥
बृहस्पतिं तृतीयोऽस्तौत्[७] त्विन्द्र[८]मेवोत्तमं पदम् ।
ऋषिस्तु तौ तथेत्युक्त्वा पार्थं[ङ] पुत्रमभाषत ॥११०॥
अधर्षणीयौ शत्रूणां कुरुष्वैतौ[९] नृपाविति ।
पितरं स तथेत्युक्त्वा युद्धोपकरणं तयोः ॥१११॥
जीमूतस्येति[१०] सूक्तेन पृथक्त्वेनाभ्यमन्त्रयत् ।

---

(१) इन्द्र प्राधान्यतो वात्रेति श्लोकः क० ग० घ० च० चिह्नितपुस्तकेषु न दृश्यते ।
(२) अधीतिरिति विसर्गयुक्तपाठः शुद्धः ।
(३) य आनयदिति तस्य हृचोऽधीति ह्वस्तुतिरिति क० ग० घ० च० ।
(४) सूक्तस्यान्ते पदे स्वकमिति ख० ङ० पुस्तकान्तरयोः ।
(५) इति नु सौम्य पञ्चर्चं उत्तरः इति क० ग० च० ।
(६) इन्द्र प्रधानतो वात्रेत्यादि स्मृयन्ते हैतरेयके इत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु न विद्यते । स्तूयते इति शुद्धः पाठः ।
(७) तृतीयस्त्विति क० ङ० पुस्तकान्तरयोः ।
(८) त्विन्द्रमिति पाठः साधुः ।
(९) कुरु पुत्रेति ग० पुस्तकान्तरयोः ।
(१०) जीमूतोयेनेति क० घ० च०, जीमूतस्येनेति ग० ।

---

(क) ऋ० ६, ४५, ३३ । (ख) ऋ० १, ४३, ६ । (ग) ऋ० ६, ४४, २१ ।
(घ) ऋ० ६, ४७, २० । (ङ) ऋ० ८, ८, ७ ।

प्रथमा लग्न सूक्तस्य योद्धारं स्तौति वर्मिणम् ॥११२॥
धनुः स्तौति[1] द्वितीया तु तृतीया ज्याभिमन्त्रिणी[2]।
स्तौति चार्त्नी[क] चतुर्थी च[3]गिषुधिं स्तौति पञ्चमी ॥११३॥
अर्द्धेन[4] सारथिं षष्ठ्या रश्मयोऽर्द्धेन संस्तुताः।
*अश्वांस्तु सप्तमी स्तौति आयुधागारमष्टमी ॥११४॥*
नवमी रथगोपांस्तु दशमी रणदेवताः।
इषुमेकादशी[5] स्तौति द्वादशी कवचस्तुतिः ॥११५॥
त्रयोदशी कशां स्तौति हस्तत्राणं चतुर्दशी।
प्रथमे पञ्चदश्यास्तु पादे दिग्ध[6] इषुः स्तुतः[7] ॥११६॥
अयोमुखी द्वितीये तु अर्द्धेऽस्त्[8] वारुणं परम्[9]।
षोडश्यां[10] लग्न सूक्तस्य धनुर्मुक्त इषु. स्तुतः ॥११७॥
सप्तदश्यां तु युद्धादि:[11]कवचस्य च बन्धन[12]।

---

(१) धनुश्चेति क० घ० च०।
(२) ज्याभिमन्त्रिणीति क० घ० च०।
(३) स्तौत्यार्त्नी चतुर्थी चेति क० ग० घ० च०।
(४) अर्धेनेति क० घ० च०।
(५) इषुधिश्चैकादशीति क० घ० च०, इषुश्चैकादशीति ग०।
(६) दिग्धः इति ग०।
(७) इषुस्तुतः इति ग० ङ०।
(८) अर्द्धर्चमिति ख०।
(९) परे इति ख०।
(१०) षोडश्येति क० ग० घ० च०।
(११) युद्धदेशेति क० घ० च०, योद्धादेरिति ख०।
(१२) बन्धन. इ[ति] क[०] ग[०] घ० च०।

---

(क) ऋ० ६, ७५, ४।

स्तुतिरष्टादशी ज्ञेया युयुत्सोर्दैवृगुत्तमा(१) ॥११८॥
आशास्ते चोत्तमे पादे ह्यृषि(२)रात्मन आशिष ।
सूक्तेनानेन तु स्तुत्वा सङ्ग्रामाङ्गान्यृषिस्तयो ॥११९॥
ततः(३) प्रस्थापयामास पुनर्वारशिखान्(४) प्रति ।
एतद्द्यन्ते चतसृभी राज्ञो साहाय्यकाङ्क्षया ॥१२०॥
भरद्वाजोऽभितुष्टाव प्रीतस्तेन पुरन्दरः ।
अभ्यावर्त्तिनमासाद्य हर्य्युपीयानदीतटे ॥१२१॥
सञ्चितस्थायमानेन(क) जघानैतान् शचीपतिः(५) ।
एवं(६) वारशिखा(७)ञ्जित्वा तावभ्यावर्त्ति(८)सार्ञ्जयौ(ख) ॥१२२॥
भरद्वाजाय गुरवे ददतुर्विविधं वसु ।
भरद्वाजस्य गर्गस्य दृष्टाविन्द्रेण वै पथि ॥१२३॥
द्वौ च(९) प्रस्तोक(ग) इत्याभिर्दानं तस्मै(१०) प्रशसतु ।

---

(१) स्तुतिरुत्तमेति क० ग० घ० च० ।
(२) ऋषिरिति ङ० ।
(३) तयोरिति क० घ० च० ।
(४) वारिशिखानिति ग० ।
(५) एतद्द्यन्ते चतसृभिरित्यादि जघानैतान् शचीपतिरित्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु न दृश्यते ।
(६) वौ त्विति क० ग० घ० च० ।
(७) वारिशिखानिति ग० ।
(८) ततोऽभ्यावर्त्तीति क० ग० घ० च० ।
(९) दयानिति क० ग० घ० च० ।
(१०) तद्दे इति क० ग० घ० च० ।

---

(क) ऋ० ६, २७, ८ । (ख) ऋ० ६, ४७, २५ । (ग) ऋ० ६, ४७, २२ ।

(१)प्रसङ्गादिह(२) याः सूक्ते देवताः परिकीर्त्तिताः ॥१२४॥
ता एव सूक्तभाजस्तु मेने राथीतरीसुतः(३) ।
प्राजापत्यो मरीचिर्हि मारीचः कश्यपोऽभवत्(४) ॥१२५॥
तस्य देव्योऽभवञ्जाया(५) दाक्षायण्यस्त्रयोदश ।
अदितिर्दितिर्दनुः काला दनायुः सिंहिका मुनिः(६) ॥१२६॥
क्रोधावशा वरिष्ठा च सुरभिर्विनता तथा ।
कद्रुश्चैवेति दुहितॄः कश्यपाय ददौ स च(७) ॥१२७॥
तासु देवासुराश्चैव गन्धर्वोरगराक्षसाः ।
वयांसि च पिशाचाश्च जज्ञिरेऽन्याश्च जातयः ॥१२८॥
तत्रैका त्वदितिर्देवी द्वादशाजनयत्(८) सुतान् ।
भगश्चैवार्य्यमांश(क)श्च मित्रो वरुण एव च ॥१२९॥

---

(१) ख॰ ङ॰ चिह्नितपुस्तकयोः पुस्तकान्तरे च, प्रसङ्गादिह याः सूक्ते इति श्लोकार्द्धात् प्राक्,—

ऋषिरस्यमितुष्टाव दाशं तत्र स तस्य तु ।
ऋचैकया हर्यां पमे दत्तं सङ्कीर्त्तयन् स्वयम् ॥

इत्यधिकं पठितम् ।

(२) प्रसङ्गा त्विहेति क॰ ग॰ घ॰ च॰ ।
(३) राथीतरसुताविति क॰ घ॰ च॰ ।
(४) मुनिरिति क॰ ग॰ घ॰ च॰ ।
(५) जाता इति क॰ घ॰ च॰ ।
(६) विशाविति ख॰ ।
(७) अदितिरित्यादिसार्द्धैकश्लोकः क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न विद्यते ।
(८) द्वादशोऽजनयदिति क॰ ग॰ घ॰ च॰ ।

---

(क) ऋ॰ २, १, ४ ।

धाता चैव विधाता च विवस्वांश्च महाद्युतिः।
त्वष्टा पूषा तथैवेन्द्रो द्वादशो विष्णुरुच्यते[१] ॥१२०॥
दृष्ट्वा तस्यास्तु तज्जज्ञे[२] मित्रश्च वरुणश्च ह[३]।
तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्वशीम् ॥१२१॥
रेतश्चस्कन्द कुम्भे तु[४] न्यपत[५]द्वासतीवरे।
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ॥१२२॥
अगस्त्यश्च वसिष्ठश्च तत्रर्षी संबभूवतुः।
बहुधा पतिते शुक्रे कलसेऽथ जले स्थले ॥१२३॥
स्थले वसिष्ठस्तु मुनिः सम्भूत ऋषिसत्तम।
कुम्भे त्वगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः[६] ॥१२४॥
उदियाय ततोऽगस्त्यः शम्या[क]मात्रो महायशाः[७]।
मानेन सम्मितो यस्मात् तस्मान्मान्य इहोच्यते ॥१२५॥
यदा कुम्भादृषिर्जातः कुम्भेनापि हि[८] मीयते।

(१) भगश्चैवार्यमांशश्चेत्यादिसार्द्धश्लोकः ग० घ० च० चिह्नितपुस्तकेषु नोपलभ्यते।
(२) जज्ञाते इति घ० ।
(३) मित्रश्च वरुणश्चेति क० ख० ग० घ०, कश्चेति ग० ग० ।
(४) तत्कुम्भे इति ग० घ० पुस्तकद्वये।
(५) न्यपतदिति ग० घ० पुस्तकद्वये।
(६) बहुधा पतिते शुक्रे इत्यादिकं श्लोकार्द्धं क० ग० घ० च० चिह्नितपुस्तकेषु न पठितम्।
(७) महातपा इति ग० घ० पुस्तकद्वये।
(८) कुम्भे मात्रेरिति क० ग० घ० ।

(क) ऋ० १, ८४, [illegible] ।

शुभ इत्यभिधानन्तु परिमाणस्य लक्षणम्[1] ॥१२६॥
ततोऽस्य ग्टह्यमाणस्य वसिष्ठः पुष्करे स्थितः।
सर्व्वतः[2] पुष्करं तत्र विश्वेदेवा अधारयन्॥१२७॥
उत्थाय सलिलात्तस्मादथ तेपे महत्तपः।
नामास्य गुणतो जज्ञे वसतेः श्रैष्ठ्यकर्मणः[3] ॥१२८॥
अदृश्यस्त्वपिभिर्हीन्द्रं[4] सोऽपश्यत्तपसा पुरा।
सोमभागानयो[5] तस्मै प्रोवाच हरिवाहनः॥१२९॥
ऋषयो वा इन्द्रमिति ब्राह्मणान्तद्धि दृश्यते[6]।
वसिष्ठस्य वसिष्ठाय[7] ब्राह्मणा वै ततोऽभवन्॥१४०॥
सर्व्वकर्म्मसु यज्ञेषु दीक्षणीयास्ततोऽभवन्[8]।
तस्मादद्यापि[9] वासिष्ठाः सदस्याश्चिह कर्म्मणि[10] ॥१४१॥

---

(१) लक्ष्यते इति क॰ घ॰ च॰।
(२) सर्व्वेनेति क॰ ग॰ घ॰ च॰।
(३) श्रेष्ठकर्म्मणः इति पाठः साधुः। श्रैष्ठकर्म्मणेति ङ॰ पुस्तकान्तरञ्च।
(४) चेन्द्रमिति ङ॰ पुस्तकान्तरञ्च।
(५) सोमभागांस्ततः इति ख॰ ङ॰ पुस्तकान्तरञ्च।
(६) एतच्छ्लोकार्द्धं क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न दृश्यते।
(७) वासिष्ठाश्च वसिष्ठश्चेति पाठः सङ्गतः। वसिष्ठाश्च वसिष्ठाश्चेति क॰ च॰, वसिष्ठाश्च वसिष्ठाश्चेति ग॰ घ॰।
(८) सर्व्वकर्म्मसु यज्ञेषु दक्षिणीयतमाश्चेति क॰ घ॰ च॰।
(९) येऽद्यापीति क॰ ग॰ ध॰ च॰।
(१०) वसिष्ठाः सदस्याः स्युस्तु कर्हिचिदिति क॰ ग॰ घ॰ च॰।

अर्चयेद्(१) दक्षिणाभिस्तान् भालवेयी श्रुति(२)स्त्रियम्(३) ।
ऋषिस्तु मैत्रावरुणिः सूक्तैः षोडशभिः परैः ॥१४२॥
तुष्टाव चाग्नि(क)मित्यग्निमाभरस्वाथ जुषस्व नः(ख) ।
प्राग्नये(ग)ऽथ प्रसम्राजो(घ) द्वितीयं प्राग्नये(ङ) तृचम् ॥१४३॥
वैश्वानरीयाण्येतानि(४) त्वे ह(च)न्द्राणि पराण्यतः ।
दश पञ्च च सूक्तानि निपातो मरुतां स्तुतिः ॥१४४॥
नकिः सुदास(छ) इत्यस्यां दानं पैजवनस्य तु ।
वसिष्ठेन चतुर्भि(५)र्द्वे नप्तु(ज)रिति कीर्त्तितम् ॥१४५॥
संवादः सूक्तमैन्द्रं(६) वाश्विन्यं तत्तु(७) प्रचक्षते ।
वसिष्ठागस्त्ययोश्च कीर्त्यते तनयैः सह ॥१४६॥
इन्द्रेण चैव संवादो महिमा जन्म कर्म च ।

(१) पूजयेदिति ख० ङ० पुस्तकान्तरञ्च ।
(२) स्तुतिरिति क० घ० च० ।
(३) वह्यर्थं भाल्लवी श्रुतिरिति ख० ङ० ।
(४) वैश्वानरीयमित्येतदिति क० घ० च० ।
(५) चतुर्भिस्त्विति क० ग० घ० च० ।
(६) संवादमैन्द्रसूक्तमिति ङ० पुस्तकान्तरञ्च, संवादे सूक्तमैन्द्रे इति ख० ।
(७) वाश्विन्य वत्त्विति क० ग० घ० च० ।

(क) ऋ० ७, १, १ । (ख) ऋ० ७, २, १ । (ग) ऋ० ७, ५, १ ।
(घ) ऋ० ७, ६, १ । (ङ) ऋ० ७, १३, १ । (च) ऋ० ७, १८, १ ।
(छ) कुम्भे नार्वौ ५२, १० । (ज) ऋ० ७, १८, २२ ।

पराणि प्रे(क)ति चत्वारि वैश्वदेवानि यानि(१) तु ॥२४७॥
स्तौत्यृगब्जा(ख)महिं तत्र मानो(ग)ऽहिर्बुध्न्य(घ) एव च ।
अहिराहन्ति मेघान् स एति वा तेषु मध्यमः ॥१४८॥
योऽहिः स बुध्न्यो बुध्नेति सोऽन्तरिक्षेऽभिजायते(२) ।
उदुस्य(ङ)सवितुः सूक्तं(३) मन्त्रो (च)वाजिनदेवताः(४) ॥१४९॥
तृचो(५)ऽर्द्धर्चस्य पादोऽत्र प्रथमायामृचि स्तुतः(६) ।
पादश्चैव तृतीयोऽत्र प्रथमायामृचि स्तुतः(७) ॥१५०॥
यथार्द्धर्चो भगमुग्र(छ)स्तथा नूनं भगो(ज)ऽपि च ।
स हि रत्नानि सविता सुवातीति भगः स वा(८) ॥१५१॥

---

(१) तन्नेति ख० ङ० पुस्तकान्तरञ्च ।
(२) अहिराहन्तीत्यादि सोऽन्तरिक्षेऽभिजायते इत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु न विद्यते ।
(३) सूक्ते इति ख० ङ० ।
(४) वाजिनदेवत इति ख० ङ० पुस्तकान्तरञ्च ।
(५) तृचः इति ग० ।
(६) तृचोऽर्द्धस्य भागोऽत्र भगमुग्र इति स्तुतिरिति ख० ङ० पुस्तकान्तरञ्च । स्तुतिरित्यत्र स्तुतः इति ग० ।
(७) पञ्चम्यामहिर्दैवतः इति क० ग० घ० च० ।
(८) एष श्लोकः क० ग० घ० च० चिह्नितपुस्तकेषु नापठ्यत ।

---

(क) ऋ० ७, ३४, १ । (ख) ऋ० ७, ३४, १६ । (ग) ऋ० ७, ३४, १७ । (घ) ऋ० ७, ३४, १७ । (ङ) ऋ० ७, ३८, १ । (च) ऋ० ७, ३८, ७ । (छ) ऋ० ७, ३८, ६ । (ज) ऋ० ७, ४१, ५ ।

वैश्वदेवानि पञ्चोर्ध्वंपञ्चर्चो भगदेवता[१]।
प्रातर्जितं[क]मुषसेऽन्त्या द्रष्टुं स सौत्याग्नि[२]रेव वा ॥ १५२॥
एके तु प्रात[ख]रित्यस्यां भगमेव[३] प्रचक्षते।
आद्यान्ये ते तु ऋषयः कीर्त्तयन्ति[४] प्रसङ्गतः ॥१५३॥
सूक्तेषु[५] देवता मान्या मान्यास्तत्र स्तुवन्ति[६] च।
सालोक्यात्[७]साहचर्य्याद्वा संस्तवादथ वा पुनः ॥१५४॥
गणस्थानाद्भक्तितो वा कीर्त्यन्तेऽन्यास्तु देवताः।
दाधिक्रमथ सावित्रं रौद्रमित्यनुपूर्व्वशः ॥१५५॥
दधिक्रां[ग] प्रथमायान्तु[८] देवताः परिकीर्त्तिताः।
ता ज्ञेया आप[घ] आप्यं स्यादार्भवः प्रथमस्तृचः ॥१५६॥
उत्तमा वैश्वदेवी वा आर्भवी वा निगद्यते[९]।

---

(१) पञ्चोर्ध्वं पञ्चर्चो भगदैवत इति क॰ ख॰ ग॰ घ॰ च॰।

(२) द्रष्टु स्तौत्याग्नीरिति क॰ घ॰ च॰, दृष्ट्वाचाग्नीरिति ङ॰ पुस्तकान्तरञ्च।

(३) प्रातरित्येतां भागीमेवेति ख॰ ङ॰ पुस्तकान्तरञ्च।

(४) आद्यान्येषु तु ज्ञेषु तु यत्कीर्त्तयन्तीति ङ॰ पुस्तकान्तरञ्च।

(५) सूक्तेऽस्मिन्निति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च।

(६) स्वन्या अन्यास्तत्र भवन्तीति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च।

(७) कालादिति ख॰ ङ॰ पुस्तकान्तरञ्च।

(८) प्रथमायाश्चेति क॰ ग॰ घ॰ च॰।

(९) वैश्वदेवी तु समुद्रज्येष्ठेत्ययं स्तुतिरिति क॰ घ॰ च॰।

---

(क) ऋ॰ ७, ४१, २। (ख) ऋ॰ ७, ४१, १। (ग) ऋ॰ ७, ४४, १। (घ) ऋ॰ ७, ४७, १।

वैश्वदेवे तथा प्रस्त्र(१) आर्भवं शस्यते हि तत्।
इंसमेऽक्ति समस्ताद्य समुद्रज्येष्ठा(क)अपां स्तुतिः(२) ॥१५७॥

इति बृहद्देवतायां पञ्चमोऽध्यायः।

---

(१) प्रास्त्रे इति ग०।
(२) वैश्वदेवे तथा प्रस्त्र इत्यादि स्तुतिरित्यन्तपाठः क० घ० च० चिह्नित-पुस्तकेषु न विद्यते।

---

(क) ऋ० ७, ४९, १।

क्रन्दन्त सारमेय स धावन्त द्रष्टुमुद्यत ॥१२॥
यदर्ज्जुने(क)ति च त्रिभि सान्त्वयित्वा व्यसुष्वपत्[1] ।
स तं[2] प्रस्वापयामास जनमन्यञ्च वारुणम् ॥१३॥
ततस्तु वरुणो राजा स्वान् पाशान् प्रत्यमुञ्चत[3] ।
स बद्ध[4] पितरं सूक्तैश्चतुर्भिरिति उत्तरे[5] ॥१४॥
अभितुष्टाव धीरे(ख)ति सुमोचैनन्ततः पिता ।
मुवाच त्वे(ग)ति चोक्ताया पाशा अस्मात्प्रमोचिरे[6] ॥१५॥
पराणि त्रीणि सूक्तानि वायव्यानि प्रवीरया(घ) ।
अत्र तास्त्वे[7]न्द्रवायव्या ऋचो[8] यासु[9] द्विवत्स्तुति ॥१६॥
प्रवीरयोक्ता वायव्या स्रा तु[10] गौत्यैतरेयके ।

---

(१) क्रन्दन्तमित्यादि सान्त्वयित्वा व्यसुष्वपदित्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु न विद्यते ।
(२) एवमिति ख० ङ० पुस्तकान्तरञ्च ।
(३) स्वे पाशे प्रत्यबध्यत इति क० ग० घ० च० ।
(४) बुद्धेति क० घ० च ।
(५) बद्ध स वारुणे पाशे धुवा सत्वेति दृश्यते इति ख० ङ० पुस्तकान्तरञ्च ।
(६) मुमुचिरे इति पाठः शुद्धः ।
(७) चेति ख० ङ० पुस्तकान्तरञ्च ।
(८) सुतामिति क० ग० घ० च० ।
(९) यास्त्विति ख० ङ० पुस्तकान्तरञ्च ।
(१०) प्रास्विति ख० ।

---

(क) ऋ० ७, ५५, २ । (ख) ७, ८६, १ । (ग) ऋ० ७, ८८, ७ ।
(घ) ऋ० ७, ९०, १ ।

पदस्य व्यत्ययं कृत्वा वायोः प्राधान्यमुच्यते ॥१७॥
ते सत्येन ऋचो यावन्नरस्यातुर्ध्वेव पुनः ।
उशन्तैका[क] प्रणीता[ख] वर्गद्वयोरेता भव स्तुता[१] ॥१८॥
ऐन्द्राग्ने शुचि[ग]मित्येते प्रेति[घ] सारस्वते परे ।
स्तुतयैव सरस्वांस्तु[२] जनियन्त[ङ]श्चतुर्ऋचे[३] ॥१९॥
राजा वर्षसहस्राणि[४] दीचिव्यमाडय पुरा ।
चचारैकरथेनेमां भुवन् सर्व्वां समुद्रगाः ॥२०॥
यच्छ्रे वहत भागान् मे[५] दस्यो वाप्यनेकशः[६] ।
प्रत्यूचुस्तं नृप सद्यस्त्वतीर्षा कथं वय ॥२१॥
यद्देम भोगान् सर्वांस्ते सर्वे वार्षसहस्रिके[७] ।

---

(१) प्रवीरयोक्ता वायव्या इत्यादि द्वयोरेता भव स्तुता इत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु नावलोक्यते ।
(२) देवा सरस्वान् स इत्तीति ख० पुस्तकान्तरे। देवा इत्यत्र दृचे इति ख० ।
(३) चतसृभिरिति क० घ० च० चतिसृभिरिति ग० ।
(४) वर्षसहस्रादेति ख० ग० ङ० पुस्तकान्तरे ।
(५) भोगान् मे इति पाठो दुष्ट उत्तरत्र तथादर्शनात् । उपहृत भा सर्व्वामिति क० घ० च०, वहत भागान् मे इति ग०, वहत भा सर्व्वा इति ङ० ।
(६) वाप वैकम् इति क० ख० ग० घ० च० ।
(७) वर्षसहस्रके इति ख० ङ० ।

---

(क) ऋ० ७, ९१, २ । (ख) ऋ० ७, ९२, २ । (ग) ऋ० ७, ९३, १ ।
(घ) ऋ० ७, ९५, १ । (ङ) ऋ० ७, ९६, ४ ।

सरस्वती प्रपद्यस्व मा त्वा[1] वक्ष्यति नाहुष ॥२२॥
तथेत्युक्त्वा जगामाशु आपगा[2] स सरस्वतीम् ।
सा चैनं प्रतिजग्राह दुदुहे च पयो घृतम्[3] ॥२३॥
एतदत्यद्भुतं कर्म सरस्वत्या नृप प्रति ।
वारुणि[4] कीर्त्तयामास प्रथमस्य द्वितीयया ॥२४॥
द्वे बार्हस्पत्ये ऐन्द्रे च[5] वैष्णवे तु[6] परे तत ।
उत्तमैन्द्यश्च तिस्र[क] सु[7] पर्ज्जन्ये तिस्र उत्तरे ॥२५॥
आग्नीर्द्धक् प्रथमा तत्र प्रथमस्य तृतीयया ।
यज्ञे आचेन्द्रमेवासीदन्यया त्विन्द्राबृहस्पती[8] ॥२६॥
तृतीया नवमी चैव स्तौतीन्द्राब्रह्मणस्पती[9] ।

---

(१) ते इति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(२) जगामाथ मानवीमिति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(३) प्रतिजग्राह सा चैनं पय सर्पिश्च दुह्यतीति क॰ ग॰ घ॰ च॰ ।
(४) वारुण इति ख॰ ।
(५) ऐन्द्रे यज्ञे दिव सूक्ते इति क॰ घ॰ च॰, यज्ञे बार्हस्पत्यमैन्द्र मिति ग॰ ।
(६) चेति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(७) ऋचौ द्वितीयोत्तमैन्द्रेति क॰ घ॰ च॰ ।
(८) आग्नीर्द्धक् प्रथमा तत्रेत्यादि अन्यया त्विन्द्रा बृहस्पती इत्यन्तपाठ क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु नोपलभ्यते । तेषु अस्मिन् स्थले, स्तौतीन्द्र प्रथमा त्वत्र द्वितीयाया बृहस्पति । इति श्लोकार्द्धं वर्त्तते ।
(९) सहेन्द्राब्रह्मणस्पती इति ख॰ ङ॰ पुस्तकान्तरञ्च ।

---

(क) ऋ॰ ७, १०१, १ ।

संवत्सर[क]न्तु माण्डूकमैन्द्रासोमं[१] परन्तु यत् ॥२७॥
ऋषिर्ददर्श रक्षोघ्नं[२] पुत्त्रशोकपरिप्लुतः ।
हते पुत्त्रशते क्रुद्धः सौदासैर्दुःखितस्तदा[३] ॥२८॥
ये पाकशंस[ख]मृक् सौम्या[४] आग्नेयी तत उत्तरा ।
एकादशी वैश्वदेवी सौम्यस्तस्याः परो तृचः[५] ॥२९॥
यदि वाह[ग]मृगाग्नेयी ऐन्द्री यो मे[घ]ति तु स्मृता[६] ।
यावणी प्रयाजिगाती[ङ]ति वितिष्ठध्वं[च] तु मारुती ॥३०॥
प्रवर्त्तये[छ]ति पञ्चैन्द्र्य ऐन्द्रासोमीत्यृगुत्तमा ।
ऋषिस्त्वाशिषमाशास्ते मा नो रक्ष[ज] इति तृचि[७] ॥३१॥
दिवश्चैव पृथिव्याश्च तथा पालनमात्मनः ।
उलूक यातुं[झ][८] जह्येताञ्छानारूपाश्चिमाचरान्[९] ॥३२॥

(१) मण्डूका इन्द्रासोममिति ख० ङ० पुस्तकान्तरञ्च ।
(२) राक्षोघ्नमिति क० ग० ङ० च० ।
(३) एतच्छ्लोकार्द्धं क० घ० च० चिह्नितपुस्तकेषु नेष्यते ।
(४) सौम्याविति ङ० ।
(५) तृच इति ग० ।
(६) यो मेतीन्द्र स्तुतोऽह्नयेति ङ० पुस्तकान्तरञ्च ।
(७) तृचे इति क० घ० च० ।
(८) यात्विति क० ख० ग० घ० च०, यान्त्विति पुस्तकान्तरम् ।
(९) एष श्लोकः क० घ० च० चिह्नितपुस्तकेषु नेष्यते ।

(क) ऋ० ७, १०३, १ । (ख) ऋ० ७, १०४, ८ । (ग) ऋ० ७, १०४, १४ । (घ) ऋ० ७, १०४, १६ । (ङ) ऋ० ७, १०४, १७ । (च) ऋ० ७, १०४, १८ । (छ) ऋ० ७, १०४, १९ । (ज) ऋ० ७, १०४, ०३ । (झ) ऋ० ७, १०४, २२ ।

पञ्चदश्यां तु सूक्तस्याष्टम्यां(१) चैव वारुणिः ।
दुःखशोकपरीतात्मा प्रपते विलपन्निव ॥२३॥
हते पुत्रशते तस्मिन्(२) वसिष्ठो दुःखितस्तदा ।
रक्षोभूतेन शापात्तु सुदासेनेति नः श्रुतं(३) ॥२४॥
कण्वश्चैव प्रगाथश्च घोरपुत्रौ बभूवतुः ।
गुरुणा तावनुज्ञातावूषतुः सहितौ वने ॥२५॥
वसतोश्च तयोस्तत्र कण्वपत्न्याः शिरःस्वपन्(४) ।
कृत्वा कनीयान् कण्वस्योरूत्सङ्गावबुध्यत(५) ॥२६॥
शप्तुकामस्तु तं कण्वः क्रुद्धः पापाभिशङ्कया ।
बोधयामास पादेन दिधक्षन्निव तेजसा ॥२७॥
विदित्वा तस्य तं भावं प्रगाथः प्राञ्जलिः स्थितः ।
मातृत्वे च पितृत्वे च वरयामास तावुभौ ॥२८॥
स घोरो(६) वाथ कण्वो वा वंशजैर्वैङ्गभिः पितुः ।
ददर्शान्यैश्च सहितः ऋषिर्मण्डलमष्टमम् ॥२९॥

---

(१) चाष्टम्यामिति क॰ ग॰ घ॰ च॰ ।
(२) क्रुद्धः इति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(३) वै श्रुतिरिति क॰ ग॰ घ॰ च॰ ।
(४) शिरःश्रमादिति क॰ घ॰ च॰ । शिरः स्वपदिति ख॰ ग॰ ।
(५) उत्सङ्गेनावबुध्यतेति क॰ घ॰ च॰ । कण्वस्योरूत्सङ्गेन त्वबुध्यतेति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(६) घोरः इति क॰ ख॰ घ॰ च॰ ।

माचिदे(क)न्द्राणि चत्वारि अन्वस्य स्थूर(ख)मित्यृचि ।
तुष्टावाङ्गिरसी नारी शश्वती(१) पश्यती(ग) पतिम् ॥४०॥
स्त्रियं सन्तं(२) पुमांसन्तमासङ्गः स्तुतवानृषिः(३) ।
तस्य(४) दानं स्तुतौ(घ)त्वृग्भिश्चतुर्भिः परिकीर्त्तितम् ॥४१॥
शिक्षे(ङ)त्यृग्भ्यां तु काण्वस्य विभिन्दोः परिकीर्त्तितम् ।
पाकस्थाम्नस्तु(५) भोजस्य चतुर्भिर्यमिति(च) स्तुतम् ॥४२॥
पौष्णौ प्रेति(छ) प्रगाथौ द्वौ(६) मन्यते शाकटायनः ।
ऐन्द्रमेवाह पूर्वन्तु गालवः पौष्णमुत्तरम्(७) ॥४३॥
ऐन्द्राणामिह सूक्तानामुत्तमस्योत्तमे तृचे ।
दानं राज्ञः कुरुङ्गस्य स्थूरं राध(ज) इति स्तुतं ॥४४॥
दूरा(झ)दित्याश्विने सूक्ते सप्तर्षिमन्तामे(ञ) यथा ।

---

(१) शशन्ताविति ख० । शशताविति ङ० ।
(२) व्यक्तमिति ग० ।
(३) मासङ्गं स्तुतवानृषिरिति ङ० पुस्तकान्तरञ्च ।
(४) तस्येति ख० ङ० पुस्तकान्तरञ्च ।
(५) चेति ख० ङ० ।
(६) त्विति ख० ङ० पुस्तकान्तरञ्च ।
(७) उत्तमामिति ङ० ।

---

(क) ऋ० ८, १, १ । (ख०) ऋ० ८, १, ३४ । (ग) ऋ० ८, १, ३४ ।
(घ) ऋ० ८, १, ३० । (ङ) ऋ० ८, २, ४१ । (च) ऋ० ८, ३, २१ ।
(छ) ऋ० ८, ४, १५ । (ज) ऋ० ८, ४, १९ । (झ) ऋ० ८, ५, १ ।
(ञ) ऋ० ८, ५, ३० ।

आगन्त(क) मारुतं सूक्तं वय(ख)मित्यैन्द्रमुत्तरम्(१) ॥५७॥
काण्वस्य सौभरे(२)श्चैव यजतो वरुणै(३) सह ।
कुरुक्षेत्रे यज्ञान् जनुर्हवींषि विविधानि च ॥५८॥
आस्तुत्य(४) सोऽभितुष्टाव इन्द्रश्चित्र सरस्वतौ ।
इन्द्रो वै(ग)त्वमयर्चां स दानशक्तिं प्रकाशयन् ॥५९॥
आस्तुराजोऽभिमानाच्च प्रहर्षितमना स्वयम्(५) ।
स स्तुतो(६) देववच्चित्र(घ) ऋषये तु गवां ददौ(७) ॥६०॥
अयुतानां सहस्रं वै निर्गधाय स्तवमृषि ।
ऋषिश्चोवाच(८) महात्मा नाहमर्हाम्यृषे स्तुतिम् ॥६१॥
तिर्यग्योनौ समुत्पन्नो(९) देवता(१०) स्तोतुमर्हसि ।

---

(१) वयमेन्द्रमत सदमिति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(२) सौभरेरिति क॰ ग॰ घ॰ च॰ ।
(३) वक्त्रैरिति क॰ घ॰ च॰ ।
(४) आस्तवः इति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(५) इन्द्रो वै त्वमयर्चां स इति श्लोक क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु नावलोक्यते ।
(६) सस्तुत इति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च ।
(७) यददौ तद्भूषेण वेति ङ॰ पुस्तकान्तरञ्च ।
(८) प्रोवाचेति ङ॰ ।
(९) समुद्भूत इति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(१०) देव मा इति ग॰ ।

---

(क) ऋ॰ ८, २०, १ । (ख) ऋ॰ ८, २१, ४ । (ग) ऋ॰ ८, २१, १७ । (घ) ऋ॰ ८, २१, १८ ।

तमन्वयया पुनश्चास्तौदोत्य[क] सूक्तेन चाश्विनौ[१] ॥६२॥
इत्ति[ख]ष्वेत्येतदाग्नेयं सखायश्चेन्द्रमुत्तरम्[२]।
यथा वरः सुषाम्णे[ग]उत्तमस्त्वौषमस्तुच ॥६३॥
अष्टौ तु सहिता एता देवता विभिदुर्वसम्।
उषाश्चेन्द्रश्च सोमश्चाथाग्निः सूर्यो बृहस्पतिः ॥६४॥
अङ्गिराः सरमा चैव ता वा[घ]मित्युत्तरस्य तु।
आदौ मैत्रावरुणस्तु[३] नव द्वादश तूत्तराः ॥६५॥
वैश्वदेव्यो बहुराजा यथादादृषये वसु।
इन्द्रो वेत्येतयर्चा तु दानशक्तिप्रकाशनम्[४] ॥६६॥
कीर्त्तितं[५] तु ऋषे तस्मिन्नूच[ङ]मुचष्णायने।
अश्विनौ ददतु प्रीतौ तदित्येकं सुषामनि[६][च] ॥६७॥

---

(१) स्तुत्वा चित्र सूक्तौ यदैश्विमिरिति क० घ० च०।
(२) उत्तममिति ख० एतच्छ्लोकार्द्धं क० घ० च० चिह्नितपुस्तकेषु न पठितम्। तेषु अस्मिन् स्थले, अश्विनावग्निमिन्द्रञ्च चामितुष्टाव देवता। एतच्छ्लोकार्द्धं वर्त्तते।
(३) मित्रावरुण इति ख० ङ०।
(४) एतच्छ्लोकार्द्धं ख० ग०ङ० चिह्नितपुस्तकेषु नास्त्यत।
(५) कीर्त्तनमिति ट० पुस्तकान्तरञ्च।
(६) एतच्छ्लोकार्द्धं क० ग० घ० च० चिह्नितपुस्तकेषु न विद्यते।

---

(क) ऋ० ८, २२, १। (ख) ऋ० ८, २३, १। (ग) ऋ० ८, २३, २८। (घ) ऋ० ८, २४, १। (ङ) ८, २४, २२। (च) ऋ० ८, २५, २९।

आश्विनं तु युवो[क]र्युंक्ष्व[ख] वायव्या उत्तरास्तु याः ।
यं सवर्णमनुर्नाम लेभे पुत्रं विवस्वतः ॥६८॥
वैश्वदेवानि पञ्चैतान्यग्निरुक्थे[ग] जगाद सः[१] ।
बभ्रुरेक[घ] इति त्वस्मिंल्लिङ्गतो[२] द्विपदा दश ॥६९॥
स्तूयन्ते देवता ह्यासु कर्मभिः[३] स्वैः पृथक् पृथक् ।
स्तुताः कर्मगुणैः स्वैः स्वैर्देवता यत्र यत्र तु ॥७०॥
पृथक् कर्मस्तुतिर्नाम वैश्वदेवन्तदेव तु[४] ।
तासामृभुरिति त्वाद्या सौम्याग्नेयी त्वृगुत्तरा ॥७१॥
त्वाष्ट्री चैन्द्री च रौद्री च पौष्णी वैष्णव्यृगाश्विनी ।
नवमी मैत्रावरुण्यृग्दशमी मित्रसंस्तवा ॥७२॥
यजमानप्रसङ्गात्तु यजिरेवात्र संस्तुता ।
यो यजाति[ङ]द्वृचे शक्रो यजतां पतिरीरितः ॥७३॥
तस्य द्युमान्[च] द्वृचे यज्वा चतसृष्वपि सश्चि[छ]ति ।

---

(१) वैश्वदेवानि सूक्तानि जगादाग्निरिति स्वयमिति क० घ० च० ।
(२) त्वेता लिङ्गत इति ख० ग० ङ० पुस्तकान्तरञ्च ।
(३) ह्याद्या नवभिरिति क० घ० च० ।
(४) पृथक् कर्मस्तुतेर्युक्तं तद्विद्याद्वैश्वदेवतमिति ख० ङ० पुस्तकान्तरञ्च ।

---

(क) ऋ० ८, २६, १ । (ख) ऋ० ८, २६, २० । (ग) ऋ० ८, २७, १ । (घ) ऋ० ८, २९, १ । (ङ) ऋ० ८, ३१, १ । (च) ऋ० ८, ३१, २ । (छ) ऋ० ८, ३१, १५ ।

यज्ञनोरेव दम्पत्योः पञ्च या[क] दम्पतीत्यृचः ॥७४॥
आग्नर्म्मा[ख]ग्नीरेतु[ग] पौष्णौ परे मित्रार्य्यमा यथा[घ]।
वरुणश्च सुनस्त्वञ्च आदित्या अग्नि[ङ]मग्नये[१] ॥७५॥
सूक्तानि प्रकृतानी[च]ति चौष्णैन्द्राणि पराण्यतः।
अध[छ] इत्यत्र कन्या तं स्त्रीलिङ्गेनेन्द्रमब्रवीत् ॥७६॥
स हि तां कामयामास दानवीं पाकशासनः।
ज्येष्ठां स्वसारं पुंसस्य[२] तस्यैव बधकाम्यया[३] ॥७७॥
अग्निने[ज]त्याश्विनं सूक्तमैन्द्रे सूक्ते परे ततः।
ऐन्द्राग्न्यात् परमाग्नेयमैन्द्राग्न्याद्वारुणे[४] परे ॥७८॥
उत्तरे वरुणे त्वन्य आ वा[झ]मित्याश्विनस्तृचः।
सूक्ते इमे[ञ] समाग्नेये[५] ताभ्यामैन्द्रे ततः परे[६] ॥७९॥

---

(१) यो यजाति इचे मक इत्यादिसार्द्धश्लोकद्वयं क० ग० घ० च० चिह्नित-पुस्तकेषु नापश्यत।
(२) प्युसस्येति क० घ० च०, थ्यंसस्येति ख० पुस्तकान्तरस्य।
(३) युवकाम्ययेति ख० ग० ङ० पुस्तकान्तरस्य।
(४) ऐन्द्राग्नं परमाग्नेयमैन्द्राग्नं वारुणे इति क० घ० च०। वारुणे इत्यत्र वारुणमिति ग०।
(५) इमे तु चाग्नेये इति क० घ० च०।
(६) ताभ्य मैन्द्रेति चोत्तरे इति क० ग० घ० च०।

---

(क) ऋ० ८, ३१, ५। (ख) ऋ० ८, ३१, १०। (ग) ऋ० ८, ३१, ११। (घ) ऋ० ८, ३१, १२। (ङ) ऋ० ८, ३१, १४। (च) ऋ० ८, ३२, १। (छ) ऋ० ८, ३३, १९। (ज) ऋ० ८, ३५, १। (झ) ऋ० ८, ४२, ४। (ञ) ऋ० ८, ४३, १।

वशायाख्याय(१) यत्(२) प्रादात्कानीनस्तु पृथुश्रवा ।
तदृच सस्तुत दानमाम(क) इत्येवमादिभि(३) ॥८०॥
आन(ख) प्रगाथौ वायव्य सूक्तस्योपोत्तमा च या ।
भिचार्य्यमाणौ मरुत सुगीथोच(ग) दृचे स्तुता ॥८१॥
द्विचत्वारिंशकान्प्रीत(४) स्त्रिशोकाय पुरन्दर ।
गिरि निकृत्य वज्रेण गा ददावसुरैर्हृता ॥८२॥
य(घ) इन्तदिति चैतस्यामृषिस्तु स्वयमब्रवीत्(५) ।
स्तुता नवम्या त्वदितिर्मही(ङ)त्यादित्यदेवते(६) ॥८३॥
अन्त्या पक्षोपथेऽपि तु सौम्य स्वादो(च) रिति स्तुतम् ।
पराण्यष्टौ तु(७) सूक्तानि ऋषीणा तिग्मतेजसाम् ॥८४॥

---

(१) वशामाख्यायेति घ० ।
(२) वशाश्वाय वयदिति ङ० ।
(३) आदिनेति ख० ङ० पुस्तकान्तरश्च ।
(४) प्रीत इति ङ० पुस्तकान्तरश्च ।
(५) भिचार्य्यमाणौ मरुत इत्यादि ऋषिस्तु स्वयमब्रवीदित्यन्तपाठ क० ग० घ० च० चिह्नितपुस्तकेषु नेष्यते ।
(६) चापौति क० घ० च० ।
(७) पराणि चाष्टाविति ख० ङ० पुस्तकान्तरश्च ।

---

(क) ऋ० ८, ४६, २१ । (ख) ऋ० ८, ४६, २५ । (ग) ऋ० ८, ४६, ३ । (घ) ऋ० ८, ४६, २० । (ङ) ऋ० ८, ४७, १ । (च) ऋ० ८, ४८, १ ।

ऐन्द्राग्न्यभि[क] तु षड्विंशः प्रगाथो बहुदेवतः ।
ऋगन्त्याग्नेरचेत्य[ख]ग्निः सूर्य्यमन्त्यपदा[1] जगौ[2] ॥८५॥
प्रस्कण्वस्य पृषध्रस्य[3] प्रादाद्यद्वस्तु किञ्चन ।
तद्भूरी[ग]दिति सूक्ताभ्यामखिलन्त्विह संस्तुतम्[4] ॥८६॥
ऐन्द्राण्युभय[घ]मित्यत्र षडाग्नेयात् पराणि तु[5] ।
निपातमाह[6] देवानां दाता म[ङ] इति भागुरिः ॥८७॥
त्र्यृचे[7]यास्कस्त्वृचन्त्वेतं[8] मन्यते वैश्वदेवतं ।
आदित्यदैवतं सूक्तं त्याग्नि[च]त्यत्र परन्तु यत् ॥८८॥
धीवराः सहसा मीनान् दृष्ट्वा सारस्वते जले ।

---

(१) अन्त्यं पदमिति ङ० पुस्तकान्तरञ्च ।

(२) एतच्छ्लोकार्द्धं क० ग० घ० च० चिह्नितपुस्तकेषु न दृश्यते । तेषु अस्मिन् स्थले, अन्त्येत्यग्निरिति त्वस्यास्ततोऽग्निः सूर्य्य एव तु । इति श्लोकार्द्धमस्ति ।

(३) त्विति ङ० ।

(४) परिकीर्त्तितमिति ख० ङ० पुस्तकान्तरञ्च ।

(५) श्लोकार्द्धमेतद् ख० ङ० चिह्नितपुस्तकयोर्न विद्यते ।

(६) निपातानाहेति ख०, निपातेनेहेति ङ० पुस्तकान्तरञ्च ।

(७) त्र्यृचमिति ग० ।

(८) यास्कोऽस्कोऽर्द्धं त्र्यृचं चैनमिति ङ० ।

---

(क) ऋ० ८, ४९, १ । (ख) ऋ० ८, ५६, ५ । (ग) ऋ० ८, ५५, १ । (घ) ऋ० ८, ६१, १ । (ङ) ऋ० ८, ६५, १० । (च) ऋ० ८, ६०, १ ।

जालं प्रक्षिप्य तान् बद्धोदक्षिपन् सलिलात् स्थलम् ॥८९॥
शरीरपातभीतास्ते तुष्टुवुश्चादितेः सुतान् ।
मुमुचुस्तास्ततस्ते च प्रसन्नास्तान् समूदिरे ॥९०॥
धीवराः क्षुध्नय मा वो भूत्स्वर्गं प्राप्स्यथेति च[1] ।
उते[क]ति माता चैवैषा त्र्यृचेनाभिष्टुतादितिः ॥९१॥
मातृत्वाद्गर्भसम्बन्धात्[2] स्तूयेतैषा[3] सुतौ सुतौ ।
ऐन्द्राण्या त्वा रथ[ख] त्रीणि स्तौत्यृक्तुपमे[ग]ति षट् ॥९२॥
आर्चाश्वमेधयोश्च पञ्चदानस्तुतिः परा ।
अपा[घ]दिन्द्रस्य चाग्नेश्च विश्वेषां चैव संस्तवः ॥९३॥
तृचस्य प्रथमोऽर्द्धर्चे शेषा वरुणदेवता[4] ।
त्व[ङ]माग्नेयेऽथ वा सूक्ते उत्तरे[5] हविषां स्तुतिः ॥९४॥
पय पत्न्योषधीनाञ्च[6] तथा रूपं हि दृश्यते ।

---

(१) धीवरा सहसा मीनानित्यादि सार्द्धश्लोकद्वयं क० ग० घ० च० चिह्नितपुस्तकेषु नापश्यत ।

(२) मातृत्वादतिसम्बन्धादिति क० च०, मातृत्वादभिसम्बन्धादिति ग० मातृत्वादिति सम्बन्धादिति घ० ।

(३) स्तुवन्त्येनामिति ख० ङ० पुस्तकान्तरञ्च ।

(४) शेषो वरुणदैवत इति ख० ग० ङ० ।

(५) सूक्तमुत्तरमिति क० ग० घ० च० ।

(६) चेति ख० ङ० ।

---

(क) ऋ० ८, ६७ १०। (ख) ऋ० ८, ६८, १। (ग) ऋ० ८, ६८, १४। (घ) ऋ० ८, ६९, ११। (ङ) ऋ० ८, ७१, १।

उ[क]दित्याश्विनमाग्नेये परे सूक्ते विशो विश[ख] ॥८५॥
ऋग्भ्यामश्व[ग]मिति द्वाभ्यां स्तौत्यात्मानमृषिः स्वयम् ।
आत्मानमात्मना स्तुत्वा स्तौति दानं श्रुतर्व्वण ॥८६॥
आत्मादानाभिसम्बन्धात् परुष्णीञ्च महानदीम्[१] ।
परुष्णी परया चेन्द्र[२] त्रिभि सूक्तैरिम[घ]न्विति ॥८७॥
सोमस्य त्वय[ङ]मित्यस्य पराण्यैन्द्राणि यानि तु ।
नहो[च]ति तेषां प्रथमे[३] वैश्वदेव्यृगवीवृधत्[छ] ॥८८॥
देवाना[ज]मिति देवानामग्नेश्च[झ]माग्नेयमुत्तरम्[४] ।
सौम्याश्विनानि सूक्तानि आ मे[ञ]ऐन्द्राणि त[ट] तथा[५] ॥८९॥
अपालाऽत्रिसुता त्वासीत्कन्या त्वग्दोषिणी पुरा ।
तामिन्द्रश्चकमे दृष्ट्वा[६] विजने पितुराश्रमे ॥१००॥

---

(१) आत्मानमात्मना स्तुत्वेत्यादि परुष्णीञ्च महानदीमित्यन्तपाठ क० ग० घ० च० चिह्नितपुस्तकेषु न पठितः ।
(२) परया परुष्णीमिन्द्रमिति क० ग० घ० च० ।
(३) प्रथममिति ख० पुस्तकान्तरञ्च ।
(४) आग्नेयन्तु ततः परमिति क० घ० च० ।
(५) आम इति ऐन्द्राणि तमितीति चेति क० ग० घ० च० ।
(६) दृष्ट्वेति क० घ० च० ।

---

(क) ऋ० ८, ७३, १ । (ख) ऋ० ८, ७४, १ । (ग) ऋ० ८, ७४, १३ । (घ) ऋ० ८, ७६, १ । (ङ) ऋ० ८, ७८, १ । (च) ऋ० ८, ८०, १ । (छ) ऋ० ८, ८०, १० । (ज) ऋ० ८, ८३, १ । (झ) ऋ० ८, ८४, १ । (ञ) ऋ० ८, ८५, १ । (ट) ऋ० ८, ८८, १ ।

तपसा बुबुधे सा तु सर्व्वमिन्द्रचिकीर्षितम् ।
उदकुम्भं समादाय अपामर्थं जगाम सा[1] ॥१०१॥
दृष्ट्वा सोममपादास्ये तुष्टावर्चा वने तु तं ।
कन्या वा[क]रिति चैतस्यामेषोऽयं कथितः स्तुतः[2] ॥१०२॥
सा सुषाव मुखात् सोमं स्तुत्वेन्द्रञ्चाजुहाव तं[3] ।
असौ य एषी[ख]त्यनया पपाविन्द्रस्तु तन्मुखात्[4] ॥१०३॥
अपूपांश्चैव सक्तूंश्च भक्षयित्वा तु तद्गृहात्[5] ।
ऋग्भिस्तुष्टाव सा चैनं जगादैनं ऋचेन तु[6] ॥१०४॥
सुलोमामनवद्याङ्गीं कुरु मां शक्र सुत्वचां ।
तस्यास्तद्वचनं श्रुत्वा प्रीतस्तेन पुरन्दरः[7] ॥१०५॥
रथच्छिद्रेण तामिन्द्रः शकटस्य युगस्य च ।

---

(१) क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु उदकुम्भं समादायेति श्लोकार्द्धं, अपूपांश्चैव सक्तूंश्चेति श्लोकार्द्धात्परत्र पठितम् ।
(२) दृष्ट्वा सोममपादास्ये इत्यादि एषोऽयं कथितः स्तुत इत्यन्तःपाठः क॰ ग॰ घ॰ च॰ चिह्नितपुस्तके नोपलभ्यते ।
(३) पपाविन्द्रस्तु तन्मुखादिति क॰ ग॰ घ॰ च॰ ।
(४) एतच्छ्लोकार्द्धं क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न विद्यते ।
(५) शतक्रतुरिति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(६) असौ भूते वृषेन सेति ङ॰ पुस्तकान्तरञ्च ।
(७) एतच्छ्लोकार्द्धं क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु नेष्यते ।

---

(क) ऋ॰ ८, ८१, १ । (ख) ऋ॰ ८, ८१, २ ।

प्रच्छिद्य निष्कर्षं त्वचः सुल्लक् सा तु ततोऽभवत्(१) ॥१०६॥
तस्यां त्वचि व्यपेतायां पूर्व्वस्यां शल्लको(२)ऽभवत्।
उत्तरा त्वभवद्गोधा छकलामस्त्वगुत्तमा ॥१०७॥
इतिहासमिमं(३) सूक्तं त्वाहतुर्यास्कमाठरौ(४)।
कन्ये(क)ति शौनकः सूक्ते पान्त(ख)मैन्द्रे ततः परे(५) ॥१०८॥
उत्तमा पार्थवी प्रोक्ता उत्तरस्त्वैतरेयके।
छान्दोगिके तृतीये तदार्भवं शस्यते यतः(६) ॥१०९॥
मारुतं गौः(ग) परं सूक्तमा त्वै(घ)न्द्राणि(७) पराणि षट्।
सूक्ते द्वितीय एतेयामितिहासं प्रचक्षते(८) ॥११०॥

---

(१) तत. सा सुल्वचाभवदिति ख० पुस्तकान्तरञ्च।
(२) तस्यास्त्वगपहृतायाः पूर्व्वा सा शल्यक इति क० ग० घ० च०।
(३) इदमिति क० ग० घ० च०।
(४) यास्कमागुरिरिति क० ग० घ० च० यास्कगालवाविति ढ० पुस्तकान्तरञ्च।
(५) शौनकस्त्वैन्द्रं यान्तमित्युत्तरे च ये इति क०।
(६) उत्तमा पार्थवीत्यादिश्लोक. क० ग० घ० च० चिह्नितपुस्तकेषु नोपलभ्यते।
(७) त्वात्वैन्द्राणीति क० ग० घ० च०।
(८) एतच्छ्लोकार्द्धं क० ग० घ० च० चिह्नितपुस्तकेषु नेष्यते।

---

(क) ऋ० ८, ९१, १। (ख) ऋ० ८, ९२, १। (ग) ऋ० ८, ९४, १। (घ) ऋ० ८, ९५, १।

अपक्रम्य तु[१] देवेभ्य सोमो वृत्रभयार्दित ।
नदीमंशुमतीनाम्नीमभ्यतिष्ठत् कुरून्[२] प्रति ॥१११॥
त बृहस्पतिरेकेन अभ्यपा[३]द्वृत्रहा सह ।
योत्स्यमान सुसंहृष्टै[४]र्मरुद्भिर्विविधायुधै ॥११२॥
दृष्ट्वा तानायत सोम स्वबलेन व्यवस्थित ।
मन्वानो वृत्रमायान्त[५] जिघांसुमरिसेनया ॥११३॥
व्यवस्थित धनुष्मन्त तमुवाच बृहस्पति ।
मरुत्पतिरय सोम एहि[६] देवान्[७] पुनर्विभो ॥११४॥
श्रुत्वा देवगुरोर्वाक्यमनर्थं वृत्रशङ्कया[८] ।
सोऽब्रवीन्नेति तं शक्र ओजसैव[९] बलाद्बली ॥११५॥

---

(१) अपचक्रामेति ख० ङ० पुस्तकान्तरञ्च ।
(२) अंशुमती नामा अभ्यतिष्ठद्गुरूनिति क० ग० घ० च०, अभ्यति ष्ठत् कुरूनिति ख० ङ०।
(३) अभ्ययादिति पाठ साधुः। दृष्वाभ्ययादिति ङ० पुस्तकान्तरञ्च ।
(४) योत्स्यमानञ्च सहृष्टैरिति क० घ० च० ।
(५) दृष्ट्वा तानायतात्सोम स्वबलेन व्यवस्थितम् । मन्वान वृत्रमायान्त मिति क० घ० च० ।
(६) मरुत्पतिरय सोममेहीति क० ग० घ० च० ।
(७ देवेति पाठ समीचीन ।
(८) श्लोकार्द्धमेतत् क० ग० घ० च० चिह्नितपुस्तकेषु न विद्यते ।
(९) मर्म एवेति क० घ० च० ।

इयाय देवानायन्तं[1] तं पपुर्विधिवत्सुराः।
जघ्नुः पीत्वा च दैत्यानां समरे[2] नवतीर्नव ॥११६॥
तदेतदप्यवद्रष[3][क] सूचे सर्व्वं निगद्यते।
ऋचस्य देवता तस्य[4] इन्द्रमेवाह शौनकः ॥११७॥
ऐन्द्राबार्हस्पत्य उक्ता ब्राह्मणे त्वैतरेयके[5]।
ऋचेनेन्द्रमपश्यन् तं [6]नेमोऽय[ख]मिति भार्गवः ॥११८॥
तुष्टावेन्द्रो हृचेनाय[ग]मद्दं पश्य च मास्थये।
स हि स्तुवन्नेव एको नेन्द्रा[7] अस्तीति चाब्रवीत् ॥११९॥
तदाकर्ण्येन्द्र आत्मानमृग्भ्यां तुष्टाव दर्शयन्[8]।

(१) घ्यादायेति क॰ ग॰ घ॰ च॰।
(२) इतरा इति क॰ घ॰ च॰।
(३) तदेतदपि यतस्मिन्निति क॰ ग॰ च॰।
(४) देवता श्रोता इति ख॰ ग॰ ङ॰ पुस्तकान्तरश्च।
(५) श्लोकार्द्धमेतत् क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न दृश्यते।
(६) यदृश्यन्तमिति क॰ घ॰ च॰,ऐन्द्रमपश्यन् तमिति ख॰ पुस्तकान्तरश्च।
(७) इन्द्रः इति पाठः साधुः।
(८) स हि स्तुवन्नेव एक इत्यादि ऋग्भ्यां तुष्टाव दर्शयन्नित्यन्तपाठः क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न पठितः।

(क) ऋ॰ ८, ८६, १३। (ख) ऋ॰ ८, १००, ३। (ग) ऋ॰ ८, १००, ४।

ऋषिस्तु दृष्ट्वा[१] सुप्रीतो विश्वेत्तात[क]इति द्वृचे ॥१२०॥
विविधानि च कर्म्माणि दानमैन्द्रस्य शंसति ।
मनोजवा[ख]स्तु सौपर्णौ[२] समुद्रे[ग] वज्रसंस्तवः ॥१२१॥
वाचं सर्व्वगतां देवीं[घ] स्तौति यद्वा[ङ]गिति द्वृचे ।
त्रींल्लोकानभितपेमान्[३] वृत्रस्त्वप्सौ स्वयं स्थिता ॥१२२॥
तं नाशकं हन्तुमिन्द्रो विष्णुमभ्येत्य सोऽब्रवीत् ।
त्वं हनिष्ये तिष्ठस्व विक्रम्यात्र[४] ममान्तिके ॥१२३॥
उद्यतस्य तु[५] वज्रस्य द्यौर्ददातु[६] समान्तरम् ।
तथेति विष्णुस्तच्चक्रे द्यौश्चास्य विवरन्ददौ ॥१२४॥
तदेतदखिलं प्रोक्तं विष्णविति सखे[च]त्वृचि[७] ।

---

(१) तं दृष्ट्वेति ख० ङ० पुस्तकान्तरयोः ।
(२) सौपर्णीति ख० ङ० ।
(३) अभितप्येमानिति ख० ङ० पुस्तकान्तरयोः ।
(४) त्वं हनाव विक्रम्य तिष्ठस्वेति ख० ङ० पुस्तकान्तरयोः ।
(५) उद्यतस्येति क० ग० च० ।
(६) ददात्विति क० ग० च० ।
(७) यत्संसमिद्धोऽहं सखीयृचीति क० ग० घ० च० ।

---

(क) ऋ० ८, १००, ६ । (ख) ऋ० ८, १००, ८ । (ग) ऋ० ८, १००, ९ । (घ) ऋ० ८, १००, ११ । (ङ) ऋ० ८, १००, १० । (च) ऋ० ८, १००, १२ ।

मैत्रावरुणः सूक्तायाश्रतस्रस्तुध[क]मित्युचः ॥१२५॥
प्रे[ख]ति मित्राय वा पादाद्यार्यम्णो[१] वरुणस्य च।
नय[ग]श्चतुर्थः सर्वेषामादित्यानामिति स्तुतिः ॥१२६॥
परा त्वादित्यदेवत्या[२] आम[घ] इत्याश्विनो द्वृचः[३]।
वायव्ये चोत्तरे सौर्ये औषसी त्वृगियं[ङ] परा[४] ॥१२७॥
पावमानी प्रजा ह्रे[च]ति माते[छ]त्युग्भ्यान्तु गौः स्तुता।
त्वमग्ने वृह[ज]दाग्नेये परेऽग्निस्तृचि संस्तुतः ॥१२८॥
मरुद्भिः सह रुद्रैश्च आग्ने याह्री[झ]ति मध्यमः।
प्रजा ह्रे[ञ]त्यपि वार्द्धचे प्रथमेऽग्निरिहोच्यते ॥१२९॥
पादे तृतीये आदित्य स्तुरीये मध्यमः स्तुतः।

---

(१) मित्राय पादस्य चार्यम्णः इति क० ख० ग० घ०।

(२) ऋच आदित्यदेवत्या इति ङ० पुस्तकान्तरञ्च।

(३) द्यृच इति ग०।

(४) सौर्यं चौषस्या प्रभा वा चन्द्रसूर्ययोरिति ख० ङ० पुस्तकान्तरञ्च। चौषस्या इत्यत्र उषसेति ग०।

---

(क) ऋ० ८, १०१, १। (ख) ऋ० ८, १०१, ५। (ग) ऋ० ८, १०१, ४। (घ) ऋ० ८, १०१, ७। (ङ) ऋ० ८, १०१, १२। (च) ऋ० ८, १०१, १४। (छ) ऋ० ८, १०१, १५। (ज) ऋ० ८, १०२, १। (झ) ऋ० ८, १०२, १४। (ञ) ऋ० ८, १०२, १४।

रहस्ये ब्राह्मणेऽप्येवं व्याख्यातं ह्यैतरेयके(१) ॥१२०॥
पावमानः स्तुतः सोमो नवमे त्विह मण्डले(२)।
पवमानवदाग्नेयस्तु(३) समिद्ध (क)इति संस्तुतः ॥१२१॥
अग्न आयूंषी(ख)ति साम्नु तिसृष्वग्निर्निपातभाक्।
अविता न(ग) इति त्वस्मिंस्तृचे पूष्णा(४) सह स्तुतः ॥१२२॥
आग्नेय्यौ द्वे ऋचावत्र यत्त (घ)इत्युत्तरे ततः।
उभाभ्या(ङ)मिति सावित्री अग्निसावित्र्य(५)गुत्तरा ॥१२३॥
पुनन्तु मां(च) वैश्वदेवी आग्नेयी त्वृगुपप्रियम्(छ)।
षडुत्तरा(६) य(ज) इत्यृच(७) स्वाध्यायाध्येतृसंस्तवः ॥१२४॥

---

(१) प्रजा ह्येत्यपि वार्द्धं इत्यादिसार्द्धश्लोकः क० ग० घ० च० चिह्नित-पुस्तकेषु न विद्यते।
(२) नवमे मण्डलेऽर्चिभिरिति क० घ० च०, मण्डलर्चिभिरिति ग०।
(३) पवमानवदाग्नेय' इति ख०।
(४) पूषेति ख० ङ० पुस्तकान्तरञ्च।
(५) आग्न्यासावित्रीति ख०।
(६) सप्तोत्तरा इति ख० ङ० पुस्तकान्तरञ्च।
(७) उत्तरे च य इत्येवेति ग०।

---

(क) ऋ० ९, ५, १। (ख) ऋ० ९, ६६, १९। (ग) ऋ० ९,६७,२०।
(घ) ऋ० ९, ६७, २३। (ङ) ऋ० ९, ६७, २५। (च) ऋ० ९, ६७, २७।
(छ) ऋ० ९, ६७, २८। (ज) ऋ० ९, ६७, ३१।

सूक्ते निरुक्ते सूक्ते[क]ऽग्नि रक्षोहा घर्मसंस्तवः[१]।
सूर्यवर्चात्मवर्चान्[२] पवित्र[ख]मिति चोच्यते ॥१२५॥
आर्भवन्तु भवेत्याद्य ऋभुर्धीर[ग] इति स्मृतः।
निपातैस्तु त्रिभिः पादैस्त्रयो देवा इहोदिताः[३] ॥१२६॥
मह्या देवानां तिस्रोक्तास्त्रिभिस्त्वेतैर्हृचैर्हृचे.[४]।
सूर्यवर्चात्मवर्चायं[५] स्तूयते सोम[घ] इत्यपि[६] ॥१२७॥
अनादृत्यां तु वर्त्तन्यां पप्रच्छर्षीन्छचीपतिः।
काले दुर्गे महत्यस्मिन् कर्मणा केन जीव्यथ ॥१२८॥
शकटं शाकिनी गावः कृषिरस्यन्दनं वनं[७]।
समुद्रः पर्वतो राजा एवं जीवामहे वयम् ॥१२९॥
अथ स्तुवन्[८] शशंसास्य धृषिराङ्गिरसः शिशुः।

(१) एतच्छ्लोकार्द्धं ङ० चिह्नितपुस्तके न पठितम्।
(२) सूर्यवर्चात्मवर्चायेति क० घ० च०।
(३) एष श्लोक क० ग० घ० च० चिह्नितपुस्तकेषु नेष्यते।
(४) हृचाद्वचैरिति क० ग० घ० च०।
(५) सूर्यवर्चात्मवर्चायेति क० घ० च०।
(६) एव वेति क० ग० घ० च०।
(७) अरस्य नन्दनन्दनमिति ख०। एष श्लोक क० ग० घ० च० चिह्नितपुस्तकेषु नापठ्यत।
(८) स्तुवन्नेवेति क० ग० घ० च०।

(क) ऋ० ६, ७३, १। (ख) ऋ० ९, ८३, १। (ग) ऋ० ९, ८७, ३। (घ) ऋ० ९, १०७, ७।

नानानीयेन(क) सूक्तेन हृषीणामेव(१) सन्निधौ ॥१४०॥
तानिन्द्रः प्राब्रवीत् सर्व्वां(२)स्तपध्वं सुमहत्तपः ।
नातप्ततपसः शक्यमिदं(३) कृत्स्नं व्यपोहितुं ॥१४१॥
अथ ते वै तपस्तेपुः सर्व्वे स्वर्गजिगीषवः ।
ततस्ते तपसोग्रेण पावमानीर्ऋचोऽब्रुवन् ॥१४२॥
अनसूयुरधीयानः शुश्रूषुस्तपसान्वितः ।
दश पूर्व्वापरान् वंश्यान् पुनात्यात्मानमेव च ॥१४३॥
पापं यच्च(४)करोत्किञ्चिन्मनोवाग्देहभोजनैः(५) ।
पूतः स तस्मात् सर्व्वस्मात् स्वाध्यायफलमश्नुते(६) ॥१४४॥
पावमान्यः परं ब्रह्म शुक्रं ज्योतिः सनातनं(७) ।
गायत्र्योऽभ्येत्य यथासां प्राणानायम्य तन्मनाः(८) ॥१४५॥
पावमानं पितॄन् देवान् ध्यायेद्यश्च सरस्वतीम् ।

---

(१) इवेति ख० ङ० पुस्तकान्तरयोः ।
(२) स्ताह सर्व्वानिति क० ग० घ० च० ।
(३) न ह्यतप्ततपसा शक्यं विनेति क० ग० घ० च० ।
(४) यद्वेति ख० ङ० पुस्तकान्तरयोः ।
(५) मनोवाग्देहतो जनैरिति क० घ० च०, मनोवाग्देहतो जने-रिति ग० ।
(६) स्वधिगम्योक्तमाप्नुयादिति ख० ङ० पुस्तकान्तरयोः ।
(७) ज्योतिश्शाश्वतमिति क० घ० च० ।
(८) अत्र श्लोकः ख० ङ० पुस्तकद्वये न विद्यते ।

---

(क) ऋ० ८, ११०, १ ।

पितॄंस्तस्योपवर्तेत[१] क्षीरं सर्पिर्मधूदकम् ॥१४६॥
एतत् सूक्तं शतं सौम्यं मण्डलं सचतुर्दशम् ।
पावमान[२]मिति ख्यातमनुवाकास्तु सप्त वै[३] ॥१४७॥
सप्ताग्नेयानि सूक्तानि ददर्शाप्त्य इति त्रितः ।
प्रकेतुने[क]ति त्वाष्ट्रस्तु त्रिशिराः सूक्तमुत्तरम् ॥१४८॥
त्र्यृचस्तस्य[४] षडाग्नेय्यस्तृचस्तस्ये[ख]ति[५] यः परः ।
तेनेन्द्रमभितुष्टाव स्वप्नान्त इति नः[६] श्रुतिः ॥१४९॥
अभवत्स हि[७] देवानां पुरोधाः प्रियकाम्यया[८] ।
असुराणां स्वसुः पुत्रस्त्रिशिरा विश्वरूपभृत् ॥१५०॥
तस्यापि प्रहित[९]स्त्विन्द्रो देवेषु बुबुधेऽसुरैः ।

---

(१) उपतिष्ठेतेति ङ॰ पुस्तकान्तरञ्च ।
(२) बीजमात्रमिति ख॰ ।
(३) एष श्लोकः क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न दृश्यते ।
(४) तस्येति ङ॰ ।
(५) त्र्यृचस्यास्येतीति ङ॰ ।
(६) न श्रुतिरिति क॰ घ॰ च॰, श्रुतमिति ङ॰, पुस्तकान्तरञ्च । एष श्लोकः ख॰ चिह्नितपुस्तके न पठितः ।
(७) स ह्येति ख॰ ङ॰ ।
(८) प्रियकाम्येति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(९) तं स्रजम् प्रहितः इति क॰ घ॰ च॰ । महित इति ग॰ ।

---

(क) ऋ॰ १०, ८, १ । (ख) ऋ॰ १०, ८, ७ ।

सोऽस्य वज्रेण तान्याशु(१) शिरांसि चौप्यचिच्छिदत्(२) ॥१५१॥
तस्य यत्सोमपानन्तु मुखं सोऽभूत् कपिञ्जल ।
कलविङ्क सुरापानमन्नाद तित्तिरि(३)स्त्वभूत् ॥१५२॥
त वागभ्यवदद्द्वाष्ट्री(४) ब्रह्महासि शतक्रतो ।
अपर्वं हतवान् यस्माद्(५) विश्वरूप पराङ्मुखम् ॥१५३॥
समभ्यषिञ्चत् सूक्तेन ऋषि(६)राप(क) इति स्वयम् ।
सिन्धुद्वीपोपनुत्यर्थं तस्याशीलस्य पाप्मन ॥१५४॥
मैथुनार्थमभीप्सन्तीं प्रत्याचष्टे यमीं यम ।
ओचित् सखाय(ख)(७) संवादे(८) विवस्वतस्तयोस्तयो ॥१५५॥
वृषा(ग)ग्नेये हविर्धाने युजे वा(घ)मथ(९) मन्यते ।
परेयिवांस(ङ)मित्यत्र स्तूयते प्रथमो यम(१०) ॥१५६॥

---

(१) सोऽस्य वज्रेण तस्याशु इति ख० ग० घ० ।
(२) तान्याशु शिरांसि चौप्याच्छिनदिति ग०। शिरांस्येवाच्छिनत् प्रभु इति ख० पुस्तकान्तरश्च ।
(३) तित्तिरः इति ख० ग० पुस्तकान्तरश्च ।
(४) त्वाष्ट्रीति ख० ग० घ० ।
(५) अपर्वमिति क० ग० घ० ।
(६) ऋषिरिति क० ग० ख० घ० ।
(७) तयोर्विवदिनीति क० ग० ख० घ० ।
(८) सवाद इति ख० ग० घ० ।
(९) तृचस्तेनेति क० ग० ख० घ० ।
(१०) इत्यन्तस्मिन् स्तूयते सूक्तादौ इति क० ग० घ० ।

(क) ऋ० १०, ९, १ । (ख) ऋ० १०, १० १ । (ग) ऋ० १०, ११, १ ।
(घ) ऋ० १०, १३ १ । (ङ) ऋ० १०, १४, १ ।

अथर्व्वाणोऽथ भृगव पितरोऽङ्गिरस[क]श्च ह ।
सह्या देवगणास्तत्र संस्तूयन्ते शुभंकृत ॥१५७॥
पितृभिश्चाङ्गिरोभिश्च संस्तुतो दृश्यते यम ।
मन्त्रेषु वक्रुश पादे विवस्वन्त पिता हि स ॥१५८॥
सत्कार्य्यप्रेतमयुक्तै पितृभि स्तूयते यम ।
प्रेहि प्रेही[ख]ति तिसृषु प्रेताशिष उदाहृता ॥१५९॥
पितृणां हि पति देवो यमस्तस्मात् स सूक्तभाक्[१] ।
अतिद्रव[ग]त्वृचे श्वानौ पर पित्र्यमुदीरितम्[२] ॥१६०॥
परेणैव[३] तु सूक्तेन श्मशाने कर्म शंसति[४] ।
पितृदेवासुराणाञ्च अभवन्नयस्त्रय ॥१६१॥
हव्यकव्यवहौ चोभौ सह रक्षाग्निना सह[५] ।
तत्र मैन[घ]मिति त्वेतत्कव्यवाहनसंस्तुति[६] ॥१६२॥

---

(१) अथर्व्वाणोऽथ भृगव इत्यादिसार्द्धश्लोकत्रय क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु नोपलभ्यते ।
(२) उदीरितामिति क॰ ग॰ घ॰ च॰ ।
(३) उत्तरेणेति ग॰ ।
(४) एतच्छ्लोकार्द्धं ख॰ ङ॰ चिह्नितपुस्तकयोर्न पठितम् ।
(५) सहरक्षा च नामय इति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(६) त्वाह कव्यवाहनमेवचेति ख॰ ङ॰ पुस्तकान्तरञ्च ।

---

(क) ऋ॰ १०, १४, ६ । (ख) ऋ॰ १०, १४, ७ । (ग) ऋ॰ १०, १४, १० ।
(घ) ऋ॰ १०, १६, १ ।

## अथ सप्तमोऽध्यायः।

दृष्ट्वा[1] भर्तुः परोक्षन्तु सरण्यूः सदृशीं स्त्रियम्।
निक्षिप्य मिथुनं[2] तस्यामश्वा भूत्वापचक्रमे[3] ॥१॥
अविज्ञानाद्विवस्वांस्तु तस्यामजनयन्मनुम्।
राजर्षिरभवत् सोऽपि[4] विवस्वानिव तेजसा ॥२॥
स विज्ञाय[5] त्वपक्रान्तां सरण्यूमश्वरूपिणीम्।
त्वाष्ट्रीं प्रति जगामाशु वाजी भूत्वाश्वलक्षणः[6] ॥३॥
सरण्यूश्च[7] विवस्वन्तं विदित्वा[8] हयरूपिणम्[9]।

---

(१) दृष्ट्वेति क॰ घ॰ च॰।
(२) मैथुनमिति पाठः साधुः।
(३) अश्वो भूत्वोपचक्रमे इति क॰ घ॰ च॰।
(४) राजर्षिरासीत् स मनुरिति ख॰ ङ॰ पुस्तकान्तरञ्च।
(५) विज्ञाप्येति ग॰।
(६) सलक्षणा' इति क॰ घ॰ च॰, स्वलक्षणः इति ग॰।
(७) तमिति ख॰ ङ॰ पुस्तकान्तरञ्च।
(८) विज्ञायेति ख॰ ङ॰ पुस्तकान्तरञ्च।
(९) हरिरूपिणमिति पुस्तकान्तरम्।

मैथुनायोपचक्राम[१] तांश्च तत्रारुरोह सः ॥४॥
ततस्तयोस्तु वेगेन शुक्रं तदपतद्भुवि ।
उपाजिघ्रच्च[२] सा त्वश्वा तच्छुक्रं गर्भकाम्यया ॥५॥
आघ्रातमात्राच्छुक्रात्तु कुमारौ संबभूवतुः ।
नासत्यश्चैव दस्रश्च यौ सुतावश्विनाविति[३] ॥६॥
इतिहासमिमं यास्कः सरण्यूदेवते ह्यृचे[४] ।
विवस्वतश्च त्वष्टुश्च त्वष्टे[क]ति मन्ह मन्यते ॥७॥
पूषे[ख]ति पादौ पौष्णौ द्वौ त्वाग्नेया[५]वुत्तरौ तु यौ ।
स्यात्तृतीयोऽपि वा पौष्णस्तिस्रश्चान्याः परास्तु याः[६] ॥८॥
अपां स्तुतिस्त्वृगन्वैका[७] तृचात्सारस्वतात्परा ।
स्तुतः परोक्षः सोमस्तु द्रप्स[ग] इत्युत्तरे तृचे ॥९॥
अब्देवताशीर्वादो[८] वा पयस्वत्यु[घ]त्तरा तु या ।

---

(१) मिथुनायायचक्रामेति ख० ङ० पुस्तकान्तरञ्च ।

(२) उपजिघ्रतीति क० घ० च० ।

(३) यौ तु तौ वाजिनावितीति क० घ० च० ।

(४) ऋचाविति क० ध० च०, तृचे इति ङ० पुस्तकान्तरञ्च ।

(५) द्वावाग्नेयाविति ङ० पुस्तकान्तरञ्च ।

(६) पौष्णस्त्वपरस्तृच इति ख० ङ० पुस्तकान्तरञ्च ।

(७) अपां स्तुति स्तुतिस्त्वेकेति ख०, अपां स्तुतिस्तुतस्त्वेकेति ङ० पुस्तकान्तरञ्च ।

(८) अब्देवत्याशीर्वाद इति ख० ङ०, पुस्तकान्तरञ्च ।

---

(क) ऋ० १०, १७, १ । (ख) ऋ० १०, १७, ३ । (ग) ऋ० १०, १७, ११ ।
(घ) ऋ० १०, १७, १४ ।

घतसप्ताः स्तुतिर्मृत्यो[क]रन्ते क्षिप्ताश्च[१] कर्म्मणि ॥१०॥
मृतशिष्टेभ्य आशास्त इमे[ख] ज्योग्जीवनं पुनः ।
इमं जीवेभ्य[ग] आशास्ते तेभ्यः परिधिकर्म्मणि[२] ॥११॥
यथा[घ] धान्युत्तरा लाष्ट्री ततो याम्या इमा[ङ]स्त्विति[३] ।
स्त्रीणामाशिषमाशास्ते तथैवाञ्जनकर्म्मणि[४] ॥१२॥
उदीर्ष्व नारीत्यनया मृत[च]पत्नी तु रोहती[५] ।
भ्राता कनीयान् प्रेतस्य निगदात्[६] प्रतिषेधति ॥१३॥
कुर्य्यादेतत् कर्म्म होता देवरो न भवेद्यदि ।
प्रेतानुगमनं न स्यादिति ब्राह्मणशासनात् ॥१४॥
वर्णानामितरेषाञ्च स्त्रीधर्म्मोऽयं भवेन्न वा[७] ।
शान्त्यर्थं धनुरादाने प्रेतस्यर्चं धनु[छ]र्जपेत्[८] ॥१५॥

---

(१) त्विति ङ० ।
(२) इम श्लोक क० ग० घ० च० चिह्नितपुस्तकेषु न दृश्यते ।
(३) यथधान्युत्तरलाष्ट्री ततो याम्या इमास्त्विलीति ख० ङ० पुस्तकान्तरञ्च ।
(४) तथा परिधिकर्म्मणीति क० ग० घ० च० ।
(५) मृतं पत्न्यनुरोहतीति पाठः साधुः । मृतमन्वारोहतीति क० घ० च० ।
(६) निगतेति क० घ० च०, निगत्वेति ग० ।
(७) कुर्य्यादेतत् कर्म्म होतेति सार्द्धश्लोक क० ग० घ० च० चिह्नितपुस्तकेषु नावस्थित ।
(८) शान्त्यर्थं च जपत्यस्या, धनुरित्युत्तरामृचमिति क० ग० घ० च० ।

---

(क) ऋ० १०, १८, २ । (ख) ऋ० १०, १८, ३ । (ग) ऋ० १०, १८, ४ ।
(घ) ऋ० १०, १८, ५ । (ङ) ऋ० १०, १८, ७ । (च) ऋ० १०, १८, ८ ।
(छ) ऋ० १०, १८, ९ ।

विक्रोशमानस[क] इत्यग्निसुत्तरा सूर्य्यमर्च्चति[१] ।
एतौ मे[ख]ऽत्र य[ग] इत्येते स्तुतिश्चैवेन्द्रवज्रयो[२] ॥२७॥
तृचे तृचे[घ] धनुश्चैन्द्र[३] देवाना[ङ]मिति तु त्रय ।
शीतोष्णवर्षदातार पर्जन्यानिलभास्करा ॥२८॥
अन्त्ये सूर्य्यानिलौ चोभौ स्तूयेते च पदे[४] सह ।
मा ते जीवातु[च]रित्यस्यामिन्द्रो वा सूर्य्य एव वा ॥२९॥
विश्वो ह्य[छ]न्यच[५] सवाद[६] स्नुषे शक्रस्य चैव हि ।
युग्मा एव तु शक्रस्य अयुग्मा एव तु वृषे[७] ॥३०॥
स्नुषेन्द्रस्यागतान् देवान् दृष्ट्वा शक्रमनागतम् ।
यज्ञे परोक्षवत् प्राह श्वशुरो नागतो मम ॥३१॥
यद्यागच्छेद्भक्षयेत् स[ज] धाना सोम पिबेदपि ।
इति तस्या वच श्रुत्वा तत्क्षणाद्दैत्यवज्रधृक् ॥३२॥
तिष्ठन् वेद्यामुत्तरस्यामुच्चैराह परोक्षवत्[८] ।

---

(१) एवत्विति क० ग० घ० च० ।
(२) एता उभो लेताविति स्तूयेते वज्रमुत्तरेति क० घ० च० ।
(३) ऐन्द्रीति क० घ० च०, ऐन्द्रीमिति ग० ।
(४) पदे सस्तूयते इति ख० ङ० पुस्तकान्तरच ।
(५) ह्यन्यस्त्विति क० ग० घ० च० ।
(६) सवादमिति ख० ङ० ।
(७) युग्माः प्रथमस्य विज्ञेया वसुक्रस्येतरा ऋच इति ख० ङ० पुस्तकान्तरञ्च ।
(८) स्नुषेन्द्रस्यागतान् देवानित्यादिसार्द्धश्लोकद्वय क० ग० घ० च० चिह्नित पुस्तकेषु न दृश्यते ।

---

(क) ऋ० १०,२७,१८। (ख) ऋ० १०,२७,२०। (ग) ऋ० १०,२७,२१।
(घ) ऋ० १०,२७,२२। (ङ) ऋ० १०,२७,२३। (च) ऋ० १०,२७,२४।
(छ) ऋ० १०, २८, १। (ज) ऋ० १०, २८, २।

तृतीयया चतुर्थ्या च प्रदेवत्रे(क)त्यपां स्तुतिः(१) ॥२३॥
अपां नपा(ख)दित्यनेन नाम्नाग्नि(२)र्मध्यमः स्तुतः ।
प्रति य(ग)द्वैश्वदेवन्तु(३) तस्य प्रे(घ)त्यैन्द्रमुत्तरम्(४) ॥२४॥
वैश्वदेवी प्रमे(ङ)त्येका सं मे(च)त्यैन्द्रो(५)हृच.(६) परः ॥
कुरु श्रवण(छ)मर्चन्ति(७) परे द्वे(८) चासदस्यवम् ॥२५॥
मृते मित्रातिथौ राज्ञि तं नपातमृषिः परैः ।
उपमश्रवसं यस्तु(ज) चतुर्भिः स व्यशोकयत् ॥२६॥
मावेपा(झ) इति सूक्तं यत्तद्यूतस्तुति(९)रुच्यते ।
अचा(१०)चान् द्वादशी स्तौति नवम्याद्या च(११) सप्तमी ॥२७॥

---

(१) प्रदेवत्रेत्यपा स्तुताविति ख० ग० ङ० पुस्तकान्तरेषु ।
(२) नामाग्निरिति क० घ० च० ।
(३) त्विति क० ग० घ० च० ।
(४) उत्तममिति ख० ङ० पुस्तकान्तरेषु ।
(५) तस्याश्चैन्द्र' इति क० घ० च० ।
(६) द्वृच इति ग० ।
(७) अर्चन्त' इति ख० ङ० पुस्तकान्तरेषु ।
(८) परा मदिति क० घ० च० ।
(९) तद्द्यूतस्येति क० घ० च० ।
(१०) तचेति ख० ङ० ।
(११) चयेति ख० ङ० पुस्तकान्तरेषु ।

---

(क) ऋ० १०,३०,१ । (ख) ऋ० १०, ३०, ४ । (ग) ऋ० १०,३०,१३ ।
(घ) ऋ० १०, ३२, १ । (ङ) ऋ० १०, ३३, १ । (च) ऋ० १०, ३३, २ ।
(छ) ऋ० १०, ३३, ४ । (ज) ऋ० १०, ३३, ६ । (झ) ऋ० १०, ३४, १ ।

त्रयोदशी कृषिं स्तौति कितवस्यानुशासति(१) ।
अद्या(२)स्तु येषामिन्द्रन्ति अबुध्र(क) वैश्वदेवते(३) ॥३८॥
सावित्रमेके मन्यन्ते मह अग्ने(ख) स्तव परम् ।
आचार्य्या शौनको यास्को गालवश्चोत्तमामृचम्(४) ॥३९॥
मम(ग) शौर्य्यमैन्द्रमग्निन्(घ) शौर्य्यं षष्ठ्या तु या स्तुता(५) ।
निपातिनी(६)स्ता सूक्तान्ते वैश्वदेवो(७)ऽत्र तु हव(८) ॥४०॥
आग्निमाग्नि तु य(ङ)स्तौति ऐन्द्राण्यस्ते वसु(च) प्र च ।
ऐन्द्राणामुत्तमा यास्तु सूक्तोऽर्द्धर्च(९) बृहस्पति(छ) ॥४१॥
परे द्विव पर्य्या(ज)ग्नेये प्रथमस्योत्तमा तु या(१०) ।

(१) एतच्छ्लोकार्द्धं ख० ङ० चिह्नितपुस्तकयोर्न विद्यते ।
(२) यद्या इति ङ० ।
(३) वैश्वदेवतमिति पाठः साधुः ।
(४) एष श्लोकः क० ग० घ० च० चिह्नितपुस्तकेषु न पठितः ।
(५) षष्ठ्यां तु संस्तुतः इति ख० ङ० पुस्तकान्तरयोः ।
(६) निपातिन इति ख० ङ० ।
(७) सूक्तान्ये वैश्वदेव्य इति क० ग० घ० च० ।
(८) धृष इति ग० ।
(९) यास्तु चार्द्धर्चे लिति क० ग० घ० च०, याः सूक्ततोऽर्द्धर्चे इति ख० ।
(१०) उत्तमेन लिति ख० ङ० पुस्तकान्तरयोः ।

(क) ऋ० १०, ३५, १ । (ख) ऋ० १०, ३६, १२ । (ग) ऋ० १०, ३७, १ ।
(घ) ऋ० १०, ३८, १ । (ङ) ऋ० १०, ३९, १ । (च) ऋ० १०, ४१, १ ।
(छ) ऋ० १०, ४२, ११ । १०, ४३, ११ । १०, ४४, ११ । (ज) ऋ० १०,
४५, १ ।

द्यावापृथिव्यौ विश्वे च पश्चा[1]द्दृष्टेन संस्तुताः ॥४२॥
आसीत् काक्षीवती घोषा पापरोगेण दुर्भगा।
उवास षष्टिवर्षाणि पितुरेव गृहे पुरा ॥४३॥
आतस्थे महती चिन्ता न पुत्त्रो न पतिर्मम।
जरां प्राप्ता मुधा तस्मात् प्रपद्येऽहं शुभस्पती ॥४४॥
यथैतौ मामकस्तात आराध्यावाप यौवनम्।
आयुरारोग्यमैश्वर्य्यं सर्व्वभूतहने विषम्[2] ॥४५॥
रूपवत्ताञ्च सौभाग्यमहं तस्य सुता यदि।
ममापि मन्त्राः प्रादुःस्युर्यैः स्तोष्येते मयाश्विनौ ॥४६॥
चिन्तयन्तीति सूक्तानि त्रीणि घोषा ददर्श सा।
स्तुतौ तावश्विनौ देवौ प्रीतौ तस्या भगान्तरम् ॥४७॥
प्रविश्य विजरारोगां सुभगाञ्चक्रतुश्च तौ।
भर्त्तारं ददतुस्तस्यै सुहस्त्यञ्च सुतं मुनिम्[3] ॥४८॥
ददतुस्तौ सुपर्णाभ्यां यन्नासत्येति[4] कीर्त्तिते।
काक्षीवत्यै च घोषायै तया ददतुरोजसा[5] ॥४९॥

---

(१) पश्चो इति ख॰ ग॰ ङ॰।
(२) सर्व्वभूतहते प्रियमिति ङ॰।
(३) मनोरिति ङ॰।
(४) येनासत्येतीति ख॰।
(५) न तस्यां माद्युरोगयेति ख॰ ङ॰ पुस्तकान्तरच। आसीत् काक्षीवती घोषेत्यादि सप्त श्लोकाः क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न सन्ति।

प्राजापत्यासुरी त्वासीद्विकुण्ठा नाम नामत ।
सेच्छन्तीन्द्रसम पुत्र तेपेऽथ सुमहत्तप ॥५०॥
सा प्रजापतित कामान्(१) लेभेऽथ विविधान् वरान्(२) ।
तस्याञ्चेन्द्र स्वय(३) जज्ञे जिघासुर्दैत्यदानवान् ॥५१॥
एकदा(४) दानवै सार्द्धं समरे समसज्जत ।
जघान तेषा नवतीर्नव सप्त च सप्तधा(५) ॥५२॥
भित्त्वा(६) स्वबाहुवीर्येण हैमरौप्यायसी(७) पुरी ।
हत्वा सर्वान् यथास्थान पृथिव्यादिष्ववस्थितान्(८) ॥५३॥
राज्य प्राप स दैत्येषु स्वेन वीर्येण दर्पित ।
देवान् बाधितुमारेभे मोहितोऽसुरमायया ॥५४॥
बध्यमानास्तु तेनापि असुरेणामितौजसा ।
उपाधावन्नृषिश्रेष्ठ तत्प्रबोधाय सप्तगुम्(९) ॥५५॥

---

(१) काममिति क० घ० च० ।
(२) सुमहत्तपा इति क० ग० घ० च० ।
(३) सुत इति ख० ङ० पुस्तकान्तरञ्च ।
(४) एकश्चेति क० घ० च० ।
(५) सप्तकानिति ख० ङ० पुस्तकान्तरञ्च ।
(६) जित्वेति ख० ङ० पुस्तकान्तरञ्च ।
(७) हैमवत्यायसीरिति क० घ० च० ।
(८) एतच्छ्लोकार्द्धं क० घ० च० चिह्नितपुस्तकेषु न पठितम् ।
(९) राज्य प्राप स दैत्येष्वित्यादिश्लोकद्वय क० ग० घ० च० चिह्नित पुस्तकेषु नापठ्यत ।

पृथिव्यां कालकेयांश्च पौलोमांश्चैव धन्विमः।
तांश्च युच्छादयामास[१] प्रह्लादतनयानपि[२] ॥५६॥
ऋषिस्तु सप्तगुर्नाम तस्यासीत्सुप्रियः सखा।
स चैनमभितुष्टाव जगृभ्मे[क]ति करे स्पृशन् ॥५७॥
ततः स[३] बुद्धा चात्मानं सप्तगुस्तुतिहर्षितः।
आत्मानमेव तुष्टाव अहं[४] भुव[ख]मिति त्रिभिः ॥५८॥
कीर्तयन् स्वानि कर्माणि यानि स्म कृतवान् पुरा।
यथाकरोत् स[५] वैदेहं ध्वसं सोमपतिं[६] नृपम् ॥५९॥
वसिष्ठशापादभवद्विदेहो[७] नृपतिः पुरा।
इन्द्रप्रसादादीजे स[८] सत्रैः[९] सारस्वतादिभिः ॥६०॥
प्रभूतां शक्तिमत्ताञ्च शत्रूणामपरिक्रियाम्[१०]।

---

(१) युच्छादयन् सर्वानिति ख॰ ङ॰ पुस्तकान्तरञ्च।
(२) दितीति क॰ ग॰ घ॰ च॰।
(३) तिति ख॰ ङ॰ पुस्तकान्तरञ्च।
(४) चाहमिति ख॰ ङ॰ पुस्तकान्तरञ्च।
(५) चेति क॰ ग॰ घ॰ च॰।
(६) ध्वसं सोमपतिरिति क॰ घ॰ च॰, सौमपतिमिति ग॰।
(७) वैदेहं इति ग॰।
(८) चेति क॰ ग॰ घ॰ च॰।
(९) मन्त्रैरिति पुस्तकान्तरम्।
(१०) एतच्छ्लोकार्द्धं क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु नेष्यते।

---

(क) ऋ॰ १०, ४७, १। (ख) ऋ॰ १०, ४८, १।

विष्णुलोकेषु[१] चैश्वर्य्यं प्रभुत्वं भुवनेषु च ॥६१॥
प्र वो मह[क] इति त्वस्यामात्मन्ये[२] वार्पयत् स्वयम्[३]।
वैश्वानरे गृहपतौ यविष्ठेऽग्नौ च पावके ॥६२॥
वषट्कारेण सूक्तेषु अग्नौ च[४] सहस स्तुतौ[५]।
अपचक्राम देवेभ्य सौचीकोऽग्नि[६]रिति श्रुति ॥६३॥
स प्राविशदृतूनस्य स्तनयो वनस्पतीन्।
ततोऽसुरा प्रादुरासन्नष्टेऽग्नौ हव्यवाहने ॥६४॥
तेऽग्निमेवान्वैचन्त देवा हत्वासुरान् युधि।
तन्नु दूराधमश्वैव वरुणश्चान्वपश्यताम् ॥६५॥
उभावेन समादाय देवानेवाभिजग्मतु।
दृष्ट्वा देवास्तेनमूचुरग्ने हव्यानि नो वह ॥६६॥
वर गृहाण मत्तश्च चित्रभानो भजस्व न[७]।
प्रत्युवाचाथ तानग्निर्विश्वे देवा यदात्थ माम्[८] ॥६७॥
तत्करिष्ये शृणुतान्नु होत्र[९] पञ्च जना मम।

---

(१) स्तषु सर्व्वेष्विति क॰ ग॰ घ॰ च॰।
(२) चात्मन इति क॰ ग॰ घ॰ च॰।
(३) वीर्य्यमत्ययमिति ग॰।
(४) त्विति ङ॰ पुस्तकान्तरञ्च।
(५) माष्टवर्गौ सह स्तुतावविति ख॰ ग॰, सहसस्तुते इति ङ॰।
(६) अभिचक्राम सौचिको मयादग्निरिति क॰ ग॰ घ॰ च॰।
(७) चेति क॰ घ॰ च॰।
(८) वैश्वानराय दातु मेति क॰ घ॰ च॰, विश्वे सूत यथाक्रमादिति ग॰।
(९) होत्रमिति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च।

---

(क) ऋ॰ १०, ५०, १।

ग्राम्यमुख्यः[१] प्रणीतश्च पुत्रो गृहपतेश्च यः ॥६८॥
उत्तरो दक्षिणश्चाग्निरेते पञ्च जनाः स्मृताः।
मनुष्याः पितरो देवा गन्धर्व्वोरगराक्षसाः ॥६९॥
यास्कौपमन्यवा[२]वेतानाहतुः पञ्च वै जनान्।
निषादपञ्चमान् वर्णान् मन्यते शाकटायन ॥७०॥
ऋत्विजो[३] यजमानश्च शाकपूणिस्तु मन्यते।
[४]आयुरस्तु च मे दीर्घं हवींषि विविधानि च ॥७१॥
अरिष्टिः पूर्व्वजानाञ्च भ्रातृणामध्वरेऽध्वरे[५]।
प्रयाजा[क]श्चानुयाजाश्च घृतं सोमे पयः[६] पशुः ॥७२॥

---

(१) ग्रामामुख्यः इति ग०।

(२) यास्कौपमन्यवाविति क० घ० च०।

(३) ऋत्विजेति ख०।

(४) ख०चिह्नितपुस्तके आयुरस्तु च मे दीर्घमिति श्लोकार्द्धात्प्राक्,—

होताध्वर्य्युश्च उद्गाता ब्राह्मणो तान् वदति तान्।
चक्षुः श्रोत्रं मनो वाक् च प्राणश्चेत्यात्मवादिनः॥
गन्धर्व्वाप्सरसो देवा मनुष्याः पितरस्तथा।
सर्पाश्च ब्राह्मणाश्चैव श्रूयन्ते ह्यैतरेयके॥
ये चान्ये पृथिवीजाता देवाश्चान्येऽथ यज्ञियो।

इत्यधिकं पठितम्।

(५) भ्रातृणामेवमध्वरे इति ख०।

(६) च यः इति ख० ग०।

---

(क) ऋ० १०, ५१, ८।

मद्दैवत्यानि[१] वै सन्तु यज्ञो मद्देवतोऽस्तु च[२] ।
तवाग्ने यज्ञ (क)इत्येतत् प्रत्यर्द्धं[३] स्विष्टकृत स:[४] ॥७३॥
तस्य[५] त्रीणि सहस्राणि नव त्रीणि (ख)शतानि च ।
त्रिंशच्चैव तु देवानां दर्व्वानेव[६] वरान् ददुः ॥७४॥
ततोऽग्निः सुमनाः प्रीतो विश्वैर्देवैः पुरस्कृतः ।
विधुयाङ्गानि यज्ञेषु चक्रे होत्र[७]मतन्द्रितः ॥७५॥
भ्रातृभिः सहितः प्रीतो दिव्यात्मा हव्यवाहनः ।
तस्यास्थि देवदार्व्वासीन्मेदोमांसञ्च गुग्गुलुः ॥७६॥
सुगन्धि तेजन स्नायुः[८] शुक्रं रजतकाञ्चने ।
रोमाणि काशाः[९] केशाश्च कुशाः कूर्म्मा नखानि च ॥७७॥
अन्त्राणि शैवलास्त्वेव मज्जा सिकतकर्करा:[१०] ।

---

(१) मे दैवत्यानीति ख०, मद्दैवत्याग्विति ग०, मद्दैवत्यानीति क० घ० च० ।
(२) न्त्वध· इति ग० ।
(३) प्रत्यार्द्धीति ग० ।
(४) एतच्छ्लोकार्द्धं क० घ० च० चिह्नितपुस्तकेषु न विद्यते ।
(५) यस्येति क० ग० घ० ङ० च० ।
(६) सर्व्वाण्येतानिति ख० ।
(७) होत्रमिति ग० ।
(८) सुचिति क० घ० च०, सुगन्धं तजनवत् प्राघुरिति ख० ।
(९) काशाविति क० घ० च० ।
(१०) शिकतशर्करा इति ख०, सिकतशार्करा इति ग० ।

---

(क) ऋ० १०, ५१, ८ । (ख) ऋ० १०, ५२, ६ ।

असृक्पित्तस्य विविधं धातवो गैरिकादयः ॥७८॥
एवमग्निश्च देवाय सूक्तैरष्ट[क]दिति त्रिभिः ।
समृद्धिरे[(ख)] परे त्वग्रादैन्द्रे सूक्ते तु तां स्तुते ॥७९॥
विधुन्दद्राण[(ग)]मित्यस्यां सूर्याचन्द्रमसौ स्तुतौ ।
प्राणवाताभवचापि स्तुतिरप्यत्र दृश्यते[1] ॥८०॥
इदं [(घ)]द्वे वैश्वदेवे च द्वितीयेऽर्यमणो हृचः[2] ।
प्रथमैन्द्री द्वितीयाग्नेय्यन्या सत्योमदेवता[3] ॥८१॥
[4]गौपायनाः समबन्धो[5]र्वा यदि वा मनमः सुतः ।
राजानमसमातिरैक्ष्वाको[6]रथप्रोष्ठः[7] पुरोहितान् ॥८२॥

---

(१) एष श्लोकः क० ग० घ० च० चिह्नितपुस्तकेषु न पठितः ।
(२) [illegible] श्रुतिरिति ग०, [illegible] इति ट० ।
(३) प्रथमा [illegible] [illegible] इति क० घ० च० ।
(४) ग० चिह्नितपुस्तके गौपायनानिति [illegible] पाठः—
[illegible]
[illegible]
[illegible]
इति [illegible] पठितः ।
(५) [illegible] इति [illegible] ।
(६) [illegible] इति क० ख० च० ।
(७) [illegible] इति ग०, [illegible] इति ट० ।

---

(क) ऋ० १०, ११, १ । (ख) ऋ० १०, ५५, १ । (ग) ऋ० १०, ३१, १ ।
(घ) १०, ५८, १ ।

युदम्य बन्धुप्रभृतीन् द्वैपादा ये त्रिमण्डले ।
द्वौ किराताकुली[१] नाम ततो मायाविनौ द्विजौ ॥८३॥
असमाति पुरोऽधत्त वरिष्ठौ तौ हि मन्यते ।
तौ कपोतौ द्विजौ भूत्वा गत्वा गोपायनान[२]भि ॥८४॥
मायाबलाच्च योगाच्च सुबन्धुमभिपेततु ।
स दुःखादभिघाताच्च मुमोह च पपात च ॥८५॥
तौ ततोऽस्यासुमालुप्य[३] राजानमभिजग्मतु ।
तत सुबन्धौ पतिते गतासौ भ्रातरस्त्रय ॥८६॥
जेपु स्वस्त्ययन सर्व्वे मे[क]ति गौपायना[४] सह ।
मन[ख]श्चावर्तयन्तोऽस्य[५] सूक्त य[ग]दिति तेऽभ्ययु ॥८७॥
जेपुश्च भेषजार्थं प्र मतारी[घ]ति परन्तत ।
सूक्तस्याद्यमृचस्त्वत्र[६] निर्ऋतेरपनोदन ॥८८॥

(१) किरातो कुनी इति ग० । कली इति क० घ० ङ० च० ।
(२) गोपायनानिति घ० ।
(३) स्यानुप्येति ख० स्याक्षोप्येति ग० ङ० ।
(४) गोपायना इति ख० ग० ।
(५) चावर्त्तन तस्येति ख० ।
(६) तचेति ख० ग० ।

(क) ऋ० १०, ५७, १ । (ख) ऋ० १०, ५७, ३ । (ग) ऋ० १०,५८, १ ।
(घ) ऋ० १०, ५९, १ ।

त्रयः पादा मो ष्वि(क)ति तु सौम्या नैर्ऋत उत्तमः ।
ऋक् सौम्या नैर्ऋती(१) चैषा असुनीते(ख)स्तुतिः परा ॥८९॥
ऋचे(२) त्वनुमतं पादमन्यं यास्कस्तु मन्यते ।
भूर्द्यौः सोमश्च पूषा च स्वं पथ्या स्वस्तिरेव च ॥९०॥
स्तुवन्त्योरेव शान्त्यर्थं पुनर्न(ग) इति तु स्तुता(३) ।
द्वयः श(घ)मिति रोदस्योरैन्द्रोऽर्द्धर्चः स(ङ)मित्यृचि ॥९१॥
रपसो नाशनार्थं वै तुष्टुवुस्त्वथ रोदसी ।
रप (च)इत्यभिधानन्तु गदितं पापदुष्कृयोः ॥९२॥
इयमिरे(छ)ति चतसृभिस्तत ऐक्ष्वाकुमस्तुवन् ।
इन्द्रक्षत्रे(ज)त्यृचा चास्य स्तुत्वाग्निमिपुराग्निपः(४) ॥९३॥
अगस्त्यस्ये(झ)ति माता च तेषां तुष्टाव तं नृपम् ।
स्तुतः स राजा सव्रीडस्तस्थौ गौपायनानभि ॥९४॥

---

(१) निर्ऋतीति ख० ग० ।
(२) ऋचीति ग० ।
(३) संस्तुतः इति ख० ।
(४) एतच्छ्लोकार्द्धं ख० चिह्नितपुस्तके नेष्यते ।

---

(क) ऋ० १०, ५९, ४ । (ख) ऋ० १०, ५९, ५ । (ग) ऋ० १०, ५९, ७ । (घ) ऋ० १०, ५९, ८ । (ङ) ऋ० १०, ५९, १० । (च) ऋ० १०, ५९, १० । (छ) ऋ० १०, ६०, २ । (ज) ऋ० १०, ६० ५ । (झ) ऋ० १०, ६०, ६ ।

सूक्तेनाथ स्तुव[1]न्नग्निं दैपदेन यथाचिषु[2]।
अग्निरित्यब्रवीदेता[3]नयमन्तः परैत्वसून्[4] ॥८५॥
सुबन्धुरस्य चैक्ष्वाको[5]मया गुप्तो हितार्थिना।
सुबन्धवे प्रदायासून्[6]जीवेत्युक्ता च पावक ॥८६॥
सुतो गोपायनै प्रीतो जगाम त्रिदिवं प्रति।
अथ माते[क]ति दृष्टास्ते[7] सुबन्धोरसुमाह्वयन् ॥८७॥
शरीरमभिनिर्द्दिश्य सुबन्धो पतित भुवि।
सूक्तशेष जगुश्चास्य चेतसो धारणाय ते ॥८८॥
सम्यासुद्याय[ख]मित्यस्य पृथक्पाणिभिरस्पृशन्।
पडिद्[ग] वैश्वदेवानि द्वितीयेऽङ्गिरसा स्तुति[8] ॥८९॥
जन्म कर्म च सख्यञ्च[9] इन्द्रेण सह कीर्त्तयन्।

---

(१) सूक्तेनैषा स्तुवन्निति क॰ ग॰ घ॰ च॰।
(२) दैपद यत्तदचिष्विति क॰ घ॰ च॰।
(३) देवानिति ग॰।
(४) परा व्यसुरिति क॰ ग॰ घ॰ ङ॰ च॰।
(५) सुबन्धोरस्य चैक्ष्वाकोरिति क॰ ख॰ घ॰ च॰।
(६) असुमिति ख॰ ग॰।
(७) ग्रैसेयेति ख॰।
(८) ऋषिरिति क॰ घ॰ च॰।
(९) सख्यश्चेति क॰ घ॰ च॰।

---

(क) ऋ॰ १०, ६०, ७। (ख) ऋ॰ १०, ६०, १२। (ग) ऋ॰ १, ६१, १।

आचार्य्या केचिदित्याहुरत्र वाग्विदुषा स्तत्र ।
ययाभिर्निन्द्यते[१] त्वृग्भि सूक्तेऽन्याभिरनर्थवित् ॥१०७॥
ये रैनामन्वविन्दन्त विद्माम स्वपिता शचीम्[२] ।
तया च घ्नभजद्यज्ञे तदृचोक्त[३] तृतीयया ॥१०८॥
प्रशस्यते दशम्या[४] तु विद्मानुत्तमया त्वृचा[५] ।
यज्ञे महर्षिञामाह विनियोगश्च कर्म्मणाम् ॥१०९॥
परे तु स्तूयते चोक्ता अष्टौ[क] चैवादिते[६] सुता ।
धातेन्द्रो वरुणो मित्र अग्न सूर्य्योऽर्य्यमा भग ॥११०॥
ऐन्द्रेऽगनिष्ठा[७] सूक्ते द्वे प्रस्वि[ख]त्यत्र परन्तु यत् ।
तत्र प्राच्य प्रतीच्यश्च स्रवन्त्यो दक्षिणाश्च या[८] ॥१११॥
ता सप्त सप्तकैर्वर्गै मन्त्र्यन्ते प्रधानत[९] ।

(१) तथाभि निन्दत इति ख० ।
(२) विद्मावधिमता सतीमिति ख०, विद्मासर्पिमता सतीमिति ग० ।
(३) उक्त इति क० घ० च० ।
(४) दशम्येति ग० ।
(५) ऋचेति ख० ग० ।
(६) चाप्य ह्यष्टौ चादितये इति क० घ० च० ।
(७) अनिष्टा इति क० घ० च० ।
(८) दक्षिणाश्चयेति ख०, दक्षिणाश्चया इति ग० ।
(९) दशकमध्ये [illegible] इति ग०

(क) ऋ० १० ७२, ८ । (ख) ऋ० १०, ७५, १ ।

सत्यसूर्य्यर्त्तुसोमानां सौर्य्याद्यच्च द्वृगुच्यते ।
पराभिस्तिसृभिस्तृग्भि(१)स्तुष्यते सोम चौषधः(२) ॥११८॥
विसृष्टमुत्तरा त्वासाम्तृक् चन्द्रमसमर्च्चति ।
सूर्य्याये भावदृत्तन्तु रैभी(क)त्यष्टाभिरुच्यते ॥११९॥
य(ख)दश्विनौ तृच(३)स्तौति सूर्य्यं(४) एवोत्तरार्च्चति ।
सप्तदशी वैश्वदेवी सूर्य्याचन्द्रमसी परा ॥१२०॥
परस्याः प्रथमौ पादौ सौर्य्यौ चान्द्रमसौ परौ ।
श्रौर्णनाभो तृचे त्वश्विनाश्विनौ मन्यते स्तुतौ ॥१२१॥
सूर्य्याचन्द्रमसौ तौ हि प्राणापानौ च तौ स्मृतौ ।
अहोरात्रे(५) च तावेव स्यातां तावेव रोदसी ॥१२२॥
अश्नुवाते हि तौ लोकाञ्ज्योतिषा च रसेन च ।
पृथक् पृथक्के चरतु(६) दक्षिणेनोत्तरेण च ॥१२३॥

---

(१) त्वचेति ख० ।
(२) चौषधिरिति ग० ।
(३) तृच इति ग० ।
(४) सूर्य्यमिति पाठ साधु ।
(५) अहोरात्राविति ख० ।
(६) तौ चरतः इति पाठः सङ्गतः । चेरतुरिति ग० ।

---

(क) ऋ० १०, ८५, ६ । (ख) ऋ० १०, ८५, १४ ।

(१)सुकिंशुक(क)मिति लयां सूर्य्यामारोहतीं पतिम्।
स्तौति विश्वावसुश्चैव ह्यचे(२) गन्धर्व्वमुत्तरे ॥१२४॥
अनृचरा(ख) इत्यनया यौ तौ(३) स्तौतीह दम्पती।
मृदान् प्रपद्यमानान्नु पराभिः पञ्चभिर्वधूम् ॥१२५॥
वाससश्च वधूनाश्च वरदानं प्रचक्षते।
ततस्त्रिभिर्विरागस्य यद्वध्व(ग)(४) इति वाससः ॥१२६॥
तद्युक्तया तया स्पर्शो निद्रिते पत्युरेव च।
ऋगुत्तरा तृतीयस्य विभवे सति वाससः ॥१२७॥
अन्यत्र मैथुनाद्भर्त्तुर्हरणं प्रतिषिध्यते।

---

(१) ख० चिह्नितपुस्तके सुकिंशुकमिति श्लोकात् प्राक्,—
सूर्य्यः सरति भूतेषु सर्व्वेः पतितानि वा।
सद्दयत्नापात्येषु सर्व्वकार्य्याणि स वदत् ॥
चाद अवति वाचा य श्वावनिन्द्रतुमुच्यते।
वमेषत्रे समेवानि निर्म्मितेऽप चन्द्रमोः ॥
इत्यधिकपाठोऽस्ति।

(२) ह्युचे इति ग०।

(३) यावे इति ख०।

(४) यद्वध्वइति वाससः इत्यादि ऋगुत्तरा तृतीयस्येत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु न विद्यते।

---

(क) ऋ० १०, ८५, २०। (ख) ऋ० १०, ८५, २३। (ग) ऋ० १०, ८५, ३०।

ये(क) यज्ञनाशिनीं स्तौति द्वचे(१)मा परिपन्थिनः ॥१२८॥
अष्टमे य(ख)दिति लाह यादृग्वाधूयमर्हति।
आशास्ते(२) चैव विविधं शान्तिभ्यश्चानुशासनम्(३) ॥१२९॥
वह्वा स्त्री भाववृत्ति(४)श्च परया तत्र कथ्यते।
पराभिराशीराशास्ते पृथक् ताभ्यः सहैव च। ॥१३०॥
मन्त्रा वैवाहिका ह्येते निगद्यन्ते नृणामपि।
आर्त्त्विज्या यजमानाश्च यथारूप विशेषतः ॥१३१॥
प्रत्यृच प्रतिकीर्त्यन्ते देवताश्चेह यासु या.(५)।

---

(१) द्वृचे इति ग०।
(२) आशास्तीति क० ग० घ० च०।
(३) शान्तिभिश्चानुवासनमिति ख०।
(४) भावक्तिभिरिति क० घ० च०।
(५) ख० चिह्नितपुस्तके, पराभिराशीराशास्ते इत्यादि देवताश्चेह यासु या इत्यन्तपाठो न विद्यते। तत्र अस्मिन् स्थले,
   सुभ्यामि(ग)तदिवाथोहस्तात्रन्ह धनमाशिष ।
   आशास्ते परयाक्तस्या सयोगार्थास्तयाशिष ॥
   पराभिराशिम शास्ते पृथक् ताषा सह क्वचित्।
   अघोरे(घ)ति द्वचे तम्या स(ङ)मिहेति द्वयोर्द्वयो ॥
   आना प्रजापते प्रेमानश्च(च) यथारूप विशेषतः।
   प्रत्यृच कीर्त्यते देवता तेषु भावस्तत ॥
   इति पाठो वर्त्तत।

---

(क) ऋ० १०, ८५,३१। (ख) ऋ० १०,८५,१५। (ग) ऋ० १०, ८५,३६।
(घ) ऋ० १०, ८५,४४। (ङ) ऋ० १०,८५,४६। (च) ऋ० १०, ८५, ४३।

वदेत्तां[१] देवतां तास्तु मरामंवीर्वदेत वा ॥१२१॥
उपसः सर्व्वेया चैता भावठत्तं प्रचचते।
सूर्य्यया मत्त सूक्तेऽस्मिन् पादस्यैवात्र वाच्यते ॥१२२॥
वि हि[क] वार्षाकपं सूक्तमसौ तु[२] कपिलो वृषा।
इन्द्रः प्रजापतिश्चैव विश्वस्मादिन्द्र उत्तरः[ख] ॥१२४॥
रक्षोहणा[ग]दि चाग्नेयं[३] त्रीन् स्तौत्यग्नीन् परं हविः[घ]।
इमञ्च मध्यमश्चैव असौ वैश्वानरश्च यः ॥१२५॥
इन्द्रं[ङ] पुरुषसूक्त[च]स्य[४] अन्यया पुरुषस्य तु।
यथैनमभजन् साध्या[५] यज्ञार्थं सोऽयं[६] उच्यते ॥१२६॥
आपान्तमन्यु[छ]रित्यस्यां[७] स्तुतः सोमस्तु[८] दृश्यते।

---

(१) वदेतामिति ख॰ ग॰।
(२) शौति ग॰।
(३) वाग्नेयमिति क॰ घ॰ च॰।
(४) यथैन्द्रात्पौरुषं सूक्तमिति ख॰।
(५) साध्येति ख॰।
(६) सार्थं इति ख॰।
(७) इत्येतामिति ख॰।
(८) स्वनेति ख॰ ग॰।

---

(क) ऋ॰ १०, ८६, १। (ख) ऋ॰ १०, ८६, ५। (ग) ऋ॰ १०, ८७, १। (घ) ऋ॰ १०, ८८, १। (ङ) ऋ॰ १०, ८९, १०। (च) ऋ॰ १०, ९०, १। (छ) ऋ॰ १०, ८९, ५।

साख्योक्यात्साहचर्य्याद्वा स्तूयते सोम एव वा ॥१२७॥
निपातभाक् सोमस्य ऋचा रथीतरोऽब्रवीत् ।
ऐन्द्रो ह्येष निपातस्तु(१) स्तुतोऽग्निररुणेन(२)स ॥१२८॥
यज्ञस्य वो(क) वैश्वदेवे प्रैत(ख) इत्युत्तरन्तु यत् ।
तत्राब्बुदस्य ग्रावाण मूर्त्तिमन्तमिवार्चति ॥१३९॥
पुरूरवसि राजर्षावप्सरास्तूर्व्वशी पुरा ।
न्यवसत् संविदं कृत्वा तस्मिन् धर्म्मञ्चचार च ॥१४०॥
तया तस्य च संवास(३)मसूयन् पाकशासन ।
पैतामहस्यानुरागमिन्द्रवज्रापि(४) तस्य तु ॥१४१॥
स तयोस्तु वियोगार्थं(५) पार्श्वस्थं वज्रमब्रवीत् ।
प्रीतिम्भिन्ध्यनयो(६)र्वज्र मम चेदिच्छसि प्रियम् ॥१४२॥
तथेत्युक्त्वा तयो प्रीतिं वज्रो भिद्नति(७) मायया ।
ततस्तया विहीनस्तु चचारोन्मत्तवन्नृप ॥१४३॥

---

(१) ऐन्द्रेषु हि निपातोऽग्नेति क॰ ग॰ घ॰ च॰ ।
(२) वरुणेन च इति ख॰ ।
(३) संवासमिति क॰ घ॰ च॰ ।
(४) चानुरागमिन्द्रवर्चापीति क॰ ख॰ घ॰ च॰ ।
(५) विभागार्थमिति क॰ घ॰ च॰ ।
(६) प्रीतिम्भिद तयोरिति ग॰ ।
(७) भिनत्तीति साधु ।

---

(क) ऋ॰ १०, ९२, १ । (ख) ऋ॰ १०, ९४, १ ।

चरन् सरसि सोऽपश्यदभिरूपामिवोर्वशीम् ।
सखीभिरभिरूपाभिः पञ्चभिः पार्श्वतो वृताम्[१] ॥१४४॥
तामाह पुनरेहीति नेति सा त्वब्रवीन्नृपम् ।
तामुपाक्रयत शैत्या दुःखात्सा त्वब्रवीन्नृपम् ॥१४५॥
अप्राप्याहं त्वयाद्येह स्वर्गे प्राप्स्यसि मां पुनः ।
आह्वानं प्रति चाख्यान[२]मितरेतरयोरिदम् ॥१४६॥
संवादं मन्यते यास्क इतिहासन्तु शौनकः ।
पय[क] इति परमैन्द्रं प्रते[ख]या [ग]ओषधीस्तवः ॥१४७॥
आर्ष्टिषेणस्तु देवापिः कौरव्यश्चैव शन्तनुः[३] ।
भ्रातरौ[४] कुरुषु त्वेतौ राजपुत्रौ बभूवतुः ॥१४८॥
ज्येष्ठस्तयोस्तु देवापिः कनीयांश्चैव शन्तनुः ।
त्वग्दोषी राजपुत्रस्तु[५] ऋष्टिषेणसुतो[६]ऽभवत् ॥१४९॥

---

(१) वृता षतत्कभिः स्वतः इति ख० ।
(२) आख्यातमिति क० ग० घ० च० ।
(३) कनीयांश्चैव शन्तनुरिति ख० ।
(४) भारताविति क० ग० घ० च० ।
(५) त्वग्दोषिणौ राजपुत्रः इति क० घ० च० ।
(६) आर्ष्टिषेणसुतः इति ग० ।

---

(क) ऋ० १०, ९५, १ । (ख) ऋ० १०, ९६, १ । (ग) ऋ० १०, ९७, १ ।

राज्येन च्छन्दयामासुः[१] प्रजाः स्वर्गं गते गुरौ।
स मुहूर्त्तमिव ध्यात्वा प्रजास्ताः प्रत्यभाषत ॥ १५०॥

इति बृहद्देवतायां सप्तमोऽध्यायः।

---

(१) छन्दयेयुस्तत्तु राज्यमिति षा० ष० च०।

# अथाष्टमोऽध्यायः।

न राज्यमहमर्हामि नृपतिर्वोऽस्तु शन्तनुः।
तथेत्युक्त्वाभ्यषिञ्चंस्ताः प्रजा राज्याय शन्तनुम् ॥१॥
ततोऽभिषिक्ते कौरव्ये वनन्देवापिराविशत्।
न ववर्षाथ पर्जन्यस्तस्मिन्राष्ट्रे शतं समाः ॥२॥
ततोऽभ्यगच्छद्देवापिं प्रजाभिः सह शन्तनुः।
प्रसादयामास चैनं तस्मिन् धर्मव्यतिक्रमे ॥३॥
सिषिच(१) चैनं राज्येन(२) प्रजाभिः सहितस्तदा।
तमुवाचाथ देवापिः प्रह्वं प्राञ्जलिसंस्थितम्(३) ॥४॥
न राज्यमहमर्हामि त्वग्दोषोपहतेन्द्रियः।
याजयिष्यामि ते राजन् वृष्टिकामेज्यया स्वयम् ॥५॥
ततस्तन्तु पुरोऽधत्त आर्त्विज्याय स शन्तनुः।
स चास्य चक्रे कर्माणि(४) वार्षिकाणि यथाविधि ॥६॥

---

(१) सिषेचेति पाठः समीचीनः।
(२) राज्ये त्विति पाठः साधीयान्। चैव राज्यश्चेति क० घ० च०।
(३) प्रह्वस्तु प्राञ्जलिः स्थितः इति क० घ० च०, प्रह्वन्तु प्राञ्जलिसंस्थितमिति ग०, प्रह्वं प्राञ्जलिसंस्थितमिति पुस्तकान्तरम्।
(४) चकार सोऽस्य कर्माणीति ख०।

बृहस्पते प्रती[क]त्यृग्भिरीजे चैव[१] बृहस्पतिम्।
द्वितीययास्य सूक्तस्य बोधिते जातवेदसा ॥७॥
आस्ये ते द्युमति[२] वाचं दधामि स्तुहि देवताः[३]।
इति[४] सोऽस्मै ददौ प्रीतो वाचं देवो[५] तया च सः ॥८॥
ऋग्भिस्ततस्त्रिभिर्देवान् जगौ वृष्ट्यर्थमेव तु।
अग्निञ्च सूक्तशेषेण क[ख]मैन्द्रं सूक्तमुत्तरम् ॥९॥
इन्द्रदृह्ये[ग]ति विश्वेषामु[घ]दित्यृलिक्स्तुतिः परम्।
शक्तिप्रकाशने तेषां[६] विनियोगोऽत्र कीर्त्यते ॥१०॥
प्रे[ङ]तीतिहाससूक्तन्तु[७] मन्यते शाकटायनः।

---

(१) प्रतीत्येतदीजे चैवेति क॰ घ॰ च॰।
(२) आस्येति द्विमतिरिति ख॰।
(३) द्वितीययास्य सूक्तस्येत्यादि दधामि स्तुहि देवताः इत्यन्तपाठः क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु नापव्यत।
(४) तत इति क॰ ग॰ घ॰ च॰।
(५) वाचन्देवीमिति क॰ ग॰ घ॰ च॰।
(६) शक्तिप्रकाशने नैषामिति क॰ ख॰ ग॰ घ॰ च॰।
(७) इतिहासं प्रेति सूक्तमिति ख॰, सेतिहास प्रेति सूक्तमिति पुस्तकान्तरम्।

---

(क) ऋ॰ १०, ९८, १। (ख) ऋ॰ १०, ९९, १। (ग) ऋ॰ १०, १००, १। (घ) ऋ॰ १०, १०१, १। (ङ) ऋ॰ १०, १०२, १।

याज्ञेन्द्रौ चन[१]मैन्द्रं वा वैश्वदेवन्तु शौनकः ॥११॥
आजावनेन[२] भार्म्याश्च[३] इन्द्रासोमौ तु मुद्गलः ।
अजयद्वृषभं[४] युक्त्वा ऐन्द्रश्च द्रुघणं रथे ॥१२॥
युध्यन् सख्ये जय प्रेप्सुरैन्द्रो[५] प्रतिरथ जगौ[६] ।
आशु[क]रैन्द्रमपादेवी अमीषा[ख]मित्यृचि स्तुता ॥१३॥
चतुर्थी बार्हस्पत्या स्यादावत्[ग] प्रसह्यामिति[७] ।
द्वृचे च[८] मरुतः प्रे[घ]ति मर्व्वेति परमन्तु यत् ॥१४॥
तत्रानिरुक्तश्लोकादृगेका सूर्य्यमर्च्चति ।
घर्मपरा[९]श्चतस्रस्तु सवितारमभी[ङ]ति या ॥१५॥
सूक्तशेषस्य षड्ऋचः सूर्य्याचन्द्रमसौ सह ।

---

(१) चयमिति ख॰, चयमिति घ॰ च॰ ।
(२) आजावने त्विति ख॰, आजीवनन्त्विति पुस्तकान्तरम् ।
(३) भार्म्याश्च इति ख॰ गार्ग्यश्चेति पुस्तकान्तरम् ।
(४) वृषभमिति क॰ ख॰ घ॰ ।
(५) इन्द्रः इति पाठः सङ्गतः ।
(६) एतच्छ्लोकार्द्धं क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु नेक्ष्यते ।
(७) एतच्छ्लोकार्द्धं क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु नोपलभ्यते ।
(८) द्वृचस्त्विति ख॰, द्वृचे त्विति ग॰ ।
(९) धर्मपरा इति ख॰ ग॰ ।

---

(क) ऋ॰ १०, १०३, १ । (ख) ऋ॰ १०, १०३, १२ । (ग) ऋ॰ १०, १०३, ५ ।
(घ) ऋ॰ १०, १०३, १३ । (ङ) ऋ॰ १०, १०३, ७ ।

तुष्टावेन्द्रमषाढी[क]ति अष्टकोऽस्मात् परेण[१] तु ॥१६॥
कौत्सः कदा वसोः [ख]सूक्तं दुर्मित्रो नाम नामतः।
सुमित्र इति नामास्य[२] गुणार्थमितरं पदम् ॥१७॥
भर्तारमस्तु प्रजाकामः कर्माणि कृतवान् पुरा।
न हि लेभे प्रजाः काश्चित्काश्यपो मुनिसत्तमः ॥१८॥
उवाच भार्या भर्तारं सुतानिच्छामि यावतः।
तावतो जनयिष्यामि देवता द्वन्द्वशस्तु हि ॥१९॥
समभ्यधुस्तु सर्वाणि द्वन्द्वानि स्तुतिकाम्यया।
तान्यवेक्ष्याथ तच्चक्रे[३] नासत्यौ सूक्तभागिनौ ॥२०॥
तदेतदन्ततो भावादाश्विनं सूक्तमुच्यते।
न ह्यस्मिन्देवतालिङ्गं प्रायेणात्र हि दृश्यते ॥२१॥
सूक्तेन तु परेणात्र स्वयमाविर[ग]भूदिति।
आत्मानमेव तुष्टाव प्राजापत्याथ[४] दक्षिणा[घ] ॥२२॥
दातृनत्र स्तुतानेके दक्षिणानां वदन्ति तु।
दातृत्वाद्दक्षिणानाञ्च भोजास्तत्रभिः स्तुताः ॥२३॥

---

(१) अष्टकः परमेष्ठेति क॰ घ॰ च॰।
(२) सुमित्रश्चैव नाम स्यादिति क॰ घ॰ च॰।
(३) सचक्रे इति ख॰।
(४) अथेति ख॰।

---

(क) ऋ॰ १०, १०४, १। (ख) ऋ॰ १०,१०५, १। (ग) ऋ॰१०,१०७,१।
(घ) ऋ॰ १०, १०७, ५।

असुराः पणयो नाम रसापारनिवासिनः[1] ।
गास्तेऽपजह्रुरिन्द्रस्य न्यगूहंश्च[2] प्रयत्नतः ॥२४॥
बृहस्पतिस्तथापश्यद्दृष्ट्वेन्द्राय शशंस च ।
प्राहिणोत्तत्र दूतीन्तु[3] सरमां पाकशासनः ॥२५॥
कि[क]मित्यचायुजाभिस्तां पप्रच्छुः पणयोऽसुराः ।
कुतः कस्यासि कल्याणि किं वा कार्य्यमिहास्ति ते ॥२६॥
अथाब्रवीत्तां सरमा दूत्यैन्द्री विचराम्यहम् ।
युष्मान् प्रजायान्विच्छन्ती[4] ऐन्द्रीर्गाश्चैव पृच्छति ॥२७॥
विदित्वेन्द्रस्य दूतीन्तामसुराः पापचेतसः ।
ऊचुर्मा सरमे गास्त्वमिहास्माकं स्वसा भव ॥२८॥
सूक्तस्य चान्यथा चर्य्या[5] युष्माभिस्त्वेव सर्वशः ।
साब्रवीन्नाह[ख]मिच्छामि स्वसृत्वं वा धनानि वा ॥२९॥
पिबेयं[6] तु पयस्तासां गवां यास्ता निगूहथ ।
असुरास्तां तथेत्युक्ता तदाजह्रुः पयस्ततः ॥३०॥

---

(१) सिन्धुपारनिवासिनः इति ख० ।
(२) निगूह्यस्येति क० घ० च० ।
(३) दूत्येऽयेति ख० ग० ।
(४) विधूय वः सर्व्वा इति क० घ० च० ।
(५) सूक्तस्यान्तपर्य्येति क० घ० च० ।
(६) पिवामीति क० घ० च० ।

---

(क) ऋ० १०, १०८, १ । (ख) ऋ० १०, १०८, १० ।

सा स्वभावाच्च लौल्याच्च पीत्वा तत्(१) पय आसुरम् ।
परं(२) स्वननं चक्र बलपुष्टिकरं ततः ॥ २१ ॥
शतयोजनविस्तारामतरत्तां रसां पुनः ।
यस्याः पारेऽपरे तेषां पुरमासीच्च दुर्जयम् ॥ २२ ॥
पप्रच्छेन्द्रश्च सरमां कच्चिद्गा दृष्टवत्यसि ।
सा नेति प्रत्युवाचेन्द्रं प्रभावादासुरस्य हि(३) ॥ २३ ॥
तां जघान तदा क्रुद्धः उद्गिरन्तीं पयस्ततः ।
जगाम सा भयोद्विग्ना पुनरेव पणीन् प्रति ॥ २४ ॥
पयसस्तस्य पद्धत्या रथेन हरिवाहनः ।
गत्वा जघान च पणीन् गाश्च ताः पुनराहरत् ॥ २५ ॥
तेऽवदन्(क) वैश्वदेवन्तु जामदग्न्यस्तथाप्रिय(४) ।

---

(१) पेति क॰ घ॰ च॰ ।
(२) पद इति ग॰ ।
(३) स्विति क॰ ग॰ घ॰ च॰ ।
(४) ख॰ चिह्नितपुस्तके एतच्छ्लोकार्द्धं न विद्यते । तत्र चास्मिन् स्थले,
ते च तं वैश्वदेवं स्याद् द्वाभ्यामाप्रा सुक्तभेदगौ ॥
जामदग्निवसिष्ठाभ्यां प्रियसूक्तमिदं परं ।
प्रशस्त युगपत् सर्वे वैश्वदेवास्तु भिन्नि: परे ।
इति पाठो वर्त्तते ।

(क) ऋ॰ १०, १०८, १ ।

युगपद्वे व्रजन्तं तं[१] वैरूपा ह्यगयस्त्रयः ॥३६॥
इन्द्रं प्रति जगुः सूक्तैः पणीन् प्रतिजिगीषिणम्[२] ।
वैश्वदेवं परं सूक्तं घर्म[क]स्त्वेकेन तु स्तुतान् ॥३७॥
देवानिन्द्रं च मन्यन्ते छन्दांस्यग्निं[३] च मध्यमम् ।
आग्नेयं चित्र[ख] इत्येतज्जगादर्षिरुपस्तुतः ॥३८॥
पिबे[ग]न्द्रं स्तौति ने[घ]त्यन्तं रक्षोघ्नाग्नेयमुत्तरम्[४] ।
इति वै[ङ] तावदैन्द्रं त[च]दाख्याः षष्ठ्यां निपातिताः[५] ॥३९॥
प्राजापत्यमथाग्नेयं वैन्यमित्यनुपूर्वशः ।
वरुणेन्द्राग्निसोमाना[६]मिमं न[छ] इति संस्तुतिः[७] ॥४०॥
यतस्तस्त्र सूक्तादावग्निरात्मस्तवं जगौ ।
स्तुतः सोमस्तु षष्ठ्या च नवम्या[८]श्च पदैस्त्रिभिः ॥४१॥

---

(१) त्वं तन्विति क० घ० च० ।
(२) प्रतिमनीषिणः इति ख० ।
(३) छन्दांस्यग्निमिति ख० ।
(४) आग्नेयन्तु परं ततः इति क० घ० च० ।
(५) षष्ठ्यां च संस्तुतः इति ख० ।
(६) सोमाग्निवरुणानान्त्विति क० घ० च० ।
(७) संस्तवः इति ख० ग० ।
(८) नवम्यामिति ख०, नवम्येति ग० ।

---

(क) ऋ० १०, ११४, १ । (ख) ऋ० १०, ११५, १ । (ग) ऋ० १०, ११६, १ । (घ) ऋ० १०, ११७, १ । (ङ) ऋ० १०, ११८, १ । (च) ऋ० १०, १२०, १ । (छ) ऋ० १०, १२४, १ ।

आग्नेयं वैश्वदेवञ्च अय[क]मित्यत्र तु द्वृचाः[1] ।
शार्ङ्गाश्चत्वार ऋषयो अग्निमार्चन् पृथक् पृथक् ॥५३॥
आश्विनं त्यञ्चि[ख]दित्येतदय[ग]मैन्द्रं ततः परम् ।
इमां खनामी[घ]ति सूक्तमिन्द्राणी यत्स्वयं जगौ ॥५४॥
तदौपनिषदं सूक्तं भाववृत्तं प्रचक्षते ।
[2]अरण्यानी[ङ]त्यरण्यान्याः स्तुतिरैन्द्रे तदुत्तरे ॥५५॥
सावित्रं सविता यन्त्रैः[च] समिद्धश्चित् समिध्यसे[छ] ।
आग्नेयं श्रद्धया[ज] आद्यं मेधासूक्तमतः परम् ॥५६॥
आग्नेयमासुरित्यस्माच्छास[झ] ऐन्द्रे ततः परे ।
सोम एकेभ्य[ञ] इत्येतद्भाववृत्तं प्रचक्षते[3] ॥५७॥

---

(१) द्वृचा इति ग० ।

(२) ख० चिह्नितपुस्तके अरण्यानीति श्लोकात् प्राक्, उत्तरानपर्णां पाठान्तु स्तौति सूक्ते महौषधिम् । प्रतिसंवननीं त्वं पान्माः सपत्नापनोदिकाम् । इत्यधिकं पठितम् ।

(३) वदन्ति त्विति ख० ।

---

(क) ऋ० १०, १४२, १ । (ख) ऋ० १०, १४३, १ । (ग) ऋ० १०, १४४, १ ।
(घ) ऋ० १०, १४५, १ । (ङ) ऋ० १०, १४६, १ । (च) ऋ० १०, १४९, १ ।
(छ) ऋ० १०, १५०, १ । (ज) ऋ० १०, १५१, १ । (झ) ऋ० १०, १५२, १ ।
(ञ) ऋ० १०, १५४, १ ।

शौनको वैश्वदेवन्तु मन्यते शाकटायनः ।
सूक्तेऽस्मिन् देवतास्तिस्र एता एव प्रकीर्त्तिताः(१) ॥५८॥
यदरायी(क)त्यलक्ष्मीघ्नं तत्र चत्तो(ख) इति द्व्यृचे ।
प्राधान्याद्वा निपाताद्वा स्तूयते ब्रह्मणस्पतिः ॥५९॥
इन्द्रस्यैव य(ग)दित्यस्यां विश्वेदेवाः परी(घ) त्यृचि ।
आग्नेयं चाग्नि(२)(ङ)मित्येतद्वैश्वदेवमिमा नु कम्(च) ॥६०॥
इन्द्रः प्राधान्यतस्तत्र(३) विश्वैर्देवैः सह स्तुतः ।
आदित्यैश्च मरुद्भिश्च तथारूपं हि दृश्यते ॥६१॥
सूर्यो न(छ) इति सौर्यन्तु यत्त्वेतदुदसा(ज)विति ।
पौलोमी स्वान् गुणांस्तत्र सपत्नीनां प्रशंसति ॥६२॥
ऐन्द्रं(४) तीव्रस्य(झ) मुञ्चामि(ञ) भेषज्यं यक्ष्मनाशनम् ।
राजयक्ष्मघ्नं सूक्तं प्राजापत्यं तदुच्यते ॥६३॥
ऐन्द्राग्नं मन्यते यास्क एके लिङ्गोक्तदैवतम् ।

---

(१) शौनको वैश्वदेवन्त्वित्यादि एता एव प्रकीर्त्तिता इत्यन्तपाठः ख० ग० घ० च० चिह्नितपुस्तकेषु नेक्ष्यते ।
(२) त्वग्निमिति घ० ।
(३) प्रधानतो वाचेति ग० ।
(४) इन्द्रमिति ख० ।

---

(क) ऋ० १०, १५५, १ । (ख) ऋ० १०,१५५,२ । (ग) ऋ० १०,१५५,४ ।
(घ) ऋ० १०, १५५, ५ । (ङ) ऋ० १०,१५६,१ । (च) ऋ० १०,१५७,१ ।
(छ) ऋ० १०, १५८, १ । (ज) ऋ० १०,१५९,१ । (झ) ऋ० १०,१६०,१ ।
(ञ) ऋ० १०, १६१, १ ।

गर्भसंस्रवभयुक्तं[1] यत्तेतद्ब्रह्मणे[क]ति तु ॥६४॥
स्रवतामपि गर्भाणां दृष्टन्तदनुमन्त्रणम् ।
वैन्यन्तु वेनस्तत्पश्य[2] अक्षीभ्या[ख] यक्ष्मनाशनम् ॥६५॥
दुःस्वप्नघ्नमपेही[ग]ति निपातीन्द्रोऽग्निरेव तु ।
आसीदृषि[3]र्दीर्घतपा[4] कपोतो नाम नैर्ऋतः ॥६६॥
चक्रे[5]कपोतस्तस्याश्रमसन्निधाने पदङ्किल ।
स त[6]मात्मच्छितैर्वाक्यैः कपोत स्तुतवानृषि[7] ॥६७॥
देवा [घ]इति तु सूक्तेन प्रायश्चित्तार्थमुच्यते ।
ऋषभ मा[ङ] सपत्नघ्न येनेदमिति मानसम् ॥६८॥
तुभ्ये[च]त्यृषी ददृशतुरैन्द्र गाथिनभार्गवौ ।
वरुणो विधातानुमतिर्धाता सोमो बृहस्पतिः ॥६९॥
षडेता देवतास्तत्र तृतीयायामृचि स्तुताः ।
वातस्ये[छ]ति परेषास्तौदनिल पितर स्वकम् ॥७०॥

---

(१) रक्षोघ्नमेयमित्युक्तमिति ख॰ ग॰ ।
(२) अपपश्यदित्यर्थे पश्यदित्यार्षं । भावदत्त पश्येवमिति ख॰ ।
(३) आशीविष इति ख॰ ।
(४) दीप्ततपाः इति क॰ घ॰ च॰ ।
(५) अकरोदिति क॰ घ॰ च॰ ।
(६) शतमिति ख॰, स्तुतमिति ग॰ ।
(७) कपोतो नैर्ऋतस्तदेति क॰ ग॰ घ॰ च॰ ।

---

(क) ऋ॰ १०, १६२, १ । (ख) ऋ॰ ६०,१६३,१ । (ग) ऋ॰ १०,१६४,१ ।
(घ) ऋ॰ १०, १६५, १ । (ङ) ऋ॰ १०,१६६, १ । (च) ऋ॰ १०,१६७,१ ।
(छ) ऋ॰ १०, १६८, १ ।

मयो भू(क)रिति यत्सूक्तमपश्यच्छबर(१) ऋषिः ।
नानारूपाः पयस्विन्यो गावस्तत्र तु संस्तुताः ॥७१॥
विभ्राट्(ख) सौर्य्यन्त्वन्त्य(ग)मैन्द्रन्त्वायाही(घ)त्युषसः स्तुतिः ।
आ त्वा(ङ)राज्ञेऽभिपिङ्काय(२)द्वे सूक्ते चानुमन्त्रणे ॥७२॥
प्र व (च)इत्युत्तरं यावत् ददर्श स्तुतिमार्बुदिः(३) ।
यत्ततः(४) परमाग्नेयं तत्रार्भवृक् प्रसूनवः(छ) ॥७३॥
ऋषिर्गगो पतङ्गस्तु पतङ्ग(ज)मिति यत्परम् ।
तत्सौर्य्यमेके मन्यन्ते मायाभेदं तथापरे ॥७४॥
मायाभेदे द्वितीयायां वाक् स्तुतेत्याह शौनकः ।
दैवी बिभ्रति मनसापा वाचा विदितां सती(५) ॥७५॥
त्यमू षु(झ)इति तु सौपर्णं(६) सूक्तं स्वस्त्ययनं विदुः ।
उ(ञ)दैन्द्रं वैश्वदेवन्तु प्रथश्च(ट)इति च यत्परम् ॥७६॥

(१) शबरः इति क० घ० च० ।
(२) अभिपिङ्क्तेति ख० ।
(३) आर्बुदः इति ख० ।
(४) यतत इति ख० घ० च० ।
(५) मायाभेदे द्वितीयायामित्यादि सा वाचा विदितां सतीत्यन्तपाठः क० ग० घ० ध० चिह्नितपुस्तकेषु न दृश्यते ।
(६) तार्क्ष्यं वैश्वमिति ख० ।

(क) ऋ० १०, १६९, १। (ख) ऋ० १०,१७०,१ । (ग) ऋ० १०, १७१,१ ।
(घ) ऋ० १०, १७२, १ । (ङ) ऋ० १०,१७३, १ । (च) ऋ० १०,१७५,१ ।
(छ) ऋ० १०, १७६, १ । (ज) ऋ० १०,१७७,१ । (झ) ऋ० १०,१७८,१ ।
(ञ) ऋ० १०, १७९, १ । (ट) ऋ० १०, १८१, १ ।

आत्मप्रभावमाचख्युस्तचाद्या चपयस्तय ।
रथन्तर यथा स्तोच स्तोचञ्चैव यथा बृहत् ॥७७॥
यथा च सम्भृतो घर्म्म सवितुश्चोपलच्यते[1] ।
बृहस्पति[क]रिति त्वस्मिन् स्तुत सूक्ते बृहस्पति ॥७८॥
आशिषो यजमानस्य केचिदेता स्तुति विदु[2] ।
प्राजापत्यस्य यत् सूक्तमपश्य त्वा[ख]प्रजावत ॥७९॥
प्रत्यृच देवता स्तौति लिङ्गैरेवात्र देवता[3] ।
आशिष पुत्रकामस्य प्रथमा द्वि वदत्यथ ॥८०॥
द्वितीया पुत्रकामायास्तृतीयात्मस्तव[4]स्त्वृषे ।
यद्विष्णु[ग]रिति सूक्तन्तु वैश्वदेव प्रचक्षते ॥८१॥
तस्मिन् स्वदारगर्भार्थमृपिराशास्त आशिष ।

---

(१) वादश्चैवात्र दृश्यते इति क० घ० च० ।

(२) बृहस्पतिरिति त्वस्मिन्नित्यादि केचिदेता स्तुति विदुरित्यन्तपाठः ख० चिह्नितपुस्तके न विद्यते । तत्र चास्मिन् स्थले, सूक्ते ऽस्मिन् देवतास्त्विह एता एव प्रकीर्त्तिता इति श्लोकार्द्धं वर्त्तते ।

(३) एवार्थलक्षिता इति ख०, एष श्लोक क० घ० च० चिह्नितपुस्तकेषु नोपलभ्यते ।

(४) चात्मस्तवमिति ग० ।

---

(क) ऋ० १०,१८२,१ । (ख) ऋ० १०,१८३,१ । (ग) ऋ०१०,१८४,१ ।

परन्तु[1] नेजमेष हि[2] गभार्य ताव[3]दुच्यते ॥८२॥
माक्षित्र यन्मक्षि चौशा[क]मादित्याना स्तुति विदु[4]।
सूर्य्यवरुणमित्राणामादित्येष्वितरेषु तु[5] ॥८३॥
एत[6] एव त्रयो वाता स्तुता. खल्पेष्व[7]तोऽन्यथा।
प्रान्यर्थं सूक्तमेतद्धि पावन चैव विश्रुतम् ॥८४॥
पातमपि खस्त्ययने दृष्ट तदनुमन्त्रणम्[8]।
उलोऽस्तीत्यितर वातमाग्नेय प्राग्नये[ख] परम् ॥८५॥
विसष्ट जातवेदस्य प्रे[ग]ति दाशतयीषु[9] तु।
यत्किञ्चिदेव त्वा[10]ग्नेय जातवेदसमुच्यते॥८६॥
आयङ्गौ[घ]रिति यत्सूक्त सार्पराज्ञी[11]स्तय जगौ।

---

(१) परे त्विति ख॰ ।
(२) नेजमेषेतीति ख॰ ग॰ ।
(३) वा तदि क॰ घ॰ च॰ ।
(४) श्चादित्येष्वितरेषु त्विति क॰ घ॰ च॰ ।
(५) एतच्छ्लोकार्द्ध क॰ घ॰ च॰ चिह्नितपुस्तकेषु नेष्यते ।
(६) एक इति क॰ घ॰ च॰ ।
(७) खल्पेष्विति ख॰ ।
(८) एतच्छ्लोकार्द्ध क॰ ग॰ घ॰ च॰ चिह्नितपुस्तकेषु न विद्यते ।
(९) दाशतयीष्विति ख॰ ।
(१०) श्चान्यत्रेति ख॰ ग॰ ।
(११) सर्पराज्ञीति क॰ घ॰ च॰ ।

---

(क) ऋ॰ १०, १८५, १ । (ख) ऋ॰ १०, १८७, १ । (ग) ऋ॰ १०, १८८, १ ।
(घ) ऋ॰ १०, १८९, १ ।

तस्मात् सा देवता[१] तच्च सूर्य्यमेके प्रचक्षते ॥८७॥
सुद्गल शाकपूणिश्च आचार्य्यश्च रथीतर[२]।
चिस्थानाधिष्ठिता वाच मन्यन्ते प्रत्यृच स्तुताम् ॥८८॥
भावहत्तपर[३] सूक्त ददर्शाथाघमर्षण।
पर न विद्यते तस्माच्छान्त्यै वा पावनाय वा ॥८९॥
यथाश्वमेध क्रतुराट् सर्व्वरिप्रप्रणोदन[४]।
तथाघमर्षण ब्रह्म सर्व्वरिप्रप्रणोदन[५] ॥९०॥
तदादीनि[६] तु यच्चात सञ्चान ज्ञानमस्तव।
चतुर्थ यत्तु नैर्ऋत्य तत्सपत्ननिवर्हणम्[७] ॥९१॥
समसमित्[क] प्राध्वराणाञ्चेत्याग्नेये एत्र ते स्मृते[८]।

---

(१) तस्य स्याद्देवतेति क० ख० घ० च०।
(२) चाचार्य्य शाकटायन इति ख० ग०।
(३) भावहत्तम्सूक्तमिति क० घ० च०।
(४) सर्व्वरीप्रप्रणोदन इति ख०।
(५) यथाश्वमेध क्रतुराट् इत्यादि सर्व्वरिप्रप्रणोदनमित्यन्तपाठ क० घ० च० चिह्नितपुस्तकेषु नापश्यत।
(६) त्यदादीनीति क० घ० च०।
(७) चतुर्थस्तैक्षस्य यत्तत्सपत्नीनिवर्हणमिति क० घ० च०।
(८) उभे तत्राग्निदेवते इति क० घ० च०।

---

(क) ऋ० १०, १९१, १।

उशना वरुणश्चेन्द्रश्चाग्निश्च सविता स्तुताः ॥८२॥
संज्ञानं प्रथमस्या[1]न्तु द्वितीयस्यामथाश्विनौ[2]।
तृतीया चोत्तमे च द्वे आशिषोऽभिवदन्ति ताः[3] ॥८३॥
इन्द्रः पूषा सपत्नघ्ने द्वितीयस्यामृचि स्तुतौ।
देवानामितराः प्रोक्ता आशीर्वादपराश्च याः[4] ॥८४॥
[5]महानाम्न्य ऋचो गुह्यास्ता ऐन्द्र्यश्चैव यो वदेत्।
सहस्रयुगपर्य्यन्तं सोऽहं ब्रह्म स राध्यते[6] ॥८५॥
[7]पुरीषपदमासान्तु प्रथमं स्यात्प्रजापतेः[8]।

---

(१) प्रथमायामिति पाठ शुद्ध।

(२) उशना वरुणश्चेन्द्रइत्यादि द्वितीयस्यामथाश्विनावित्यन्तपाठ क॰ घ॰ च॰ चिह्नितपुस्तकेषु न दृश्यते।

(३) स त्वाशीर्व्वाद उच्यते इति क॰ घ॰ च॰।

(४) एष श्लोक क॰ घ॰ च॰ चिह्नितपुस्तकेषु नेष्यते।

(५) ख॰ चिह्नितपुस्तके महानाम्ना इति श्लोकात्प्राक्, संसंसंज्ञानमित्येते चैवननं विदुरिति श्लोकार्द्धं वर्त्तते।

(६) राध्यतीति पाठ साधु, सोऽहं ब्राह्म स्वराध्यते इति क॰ घ॰ च॰, साह ब्राह्म स्वरं ध्यास्ते इति ख॰।

(७) सपदैवतमिति ख॰।

(८) ख॰ चिह्नितपुस्तके पुरीषपदमासान्त्विति श्लोकात् प्राक्,—

> त्रिधाधर्म्मयाश्रिताः स्तुताः सह-
> स्वस्मिन् स्तोत्रे दृश्यते यः स्तुतमाना।
> प्रधानस्याहं किंच देवताया
> स्याद्भाग॰ यत्नेरा प्रोक्तेन॥

आग्नेयमैन्द्रं वैष्णव्यं पौष्णं दैवन्तु पञ्चमम्[१]। ८६॥
अग्ने प्रयाजानुयाजा प्रैषा ये च[२] हवींषि च।
यद्दैवतं हविस्तु स्यादग्नेयास्तद्देवतास्तु[३] ते। ८७॥
निविदां निगदानाञ्च खे खैर्लिङ्गैश्च देवता[४]।
निगदेन[५] निगद्यन्ते याश्च कल्पानुगा ऋचः ॥८८॥
अग्नेरेव तु गायत्र्य उष्णिह[६] सवितुः स्मृता ।
अनुष्टुभस्तु सोमस्य बृहत्यस्तु बृहस्पतेः ॥८९॥

---

ऐन्द्रा ऋचो महानाम्नीस्तु विद्या
तथा हि दृष्टं ब्राह्मणसूक्तशब्दः ।
न दृश्यते सूक्तशब्दो न विस्तु
यथा प्रैषेष्वाहाससूक्ताभिधानम् ॥

सूक्तैकदेशा इति तान् प्रतीयां
दन्याश्च कुन्ताः मदशो निगमाः ।
यथैतयो देवि निपादि सज्ञा
कुन्तापे ततस्त्वमेकं सूक्तम् ॥
इत्यधिकपाठोऽस्ति।

(१) विन्द्र त्वा वैष्णवञ्चैव पौष्णञ्चैव मन पदमिति ख०।

(२) एवंति क० घ० च०।

(३) चेति ख०।

(४) लिङ्गोक्तदेवता इति क० घ० घ०।

(५) निगदेष्विति ख०।

(६) उष्णिक इति ख०, उष्णिहेति ग०।

पङ्क्तयस्त्रिष्टुभश्चैव विराड्विन्द्राश्च सर्व्वगः ।
विश्वेषां चैव देवानां जगत्यो याश्च काश्चन ॥१००॥
विराजश्चैव मित्रस्य स्वराजो वरुणस्य च ।
विपथे यस्य वा स्यातां स्यातां वा वायुदेवते ॥ १०१॥
इन्द्रस्यातिधृतिः प्रोक्ता वायोश्च भूरिजः स्मृताः[१] ।
यास्त्वतिच्छन्दसः काश्चित्ताः प्रजापतिदेवताः[२] ॥१०२॥
विच्छन्दसस्तु वायव्या मन्त्राः पादैश्च ये मिताः ।
पौरुषा द्विपदाः सर्व्वा ब्राह्म्य एकपदाः स्मृताः[३] ॥१०३॥
समस्ता ऋच आग्नेय्यो वायव्यानि यजूंषि च ।
सौर्य्याणि चैव सामानि सर्व्वाणि ब्राह्मणानि च ॥१०४॥
वैश्वदेवो वषट्कारो हिङ्कारो ये यजामहे ।
रूपं वज्रस्य वाक्पूर्व्वं स्वाहाकारोऽग्निदैवतः ॥१०५॥
देवानाञ्च पितॄणाञ्च नमस्कारः स्वधैव[४] च ।
क्रुष्टो मूर्द्धनि विज्ञेयस्तालव्यः प्रथमः स्वरः ॥१०६॥
द्वितीयस्तु भ्रुवोर्मध्ये तृतीयः कर्णमंश्रितः ।
चतुर्थो नासिकाग्रे स्यादोष्ठ्यो मन्द्र उच्यते ॥१०७॥

---

(१) एतच्छ्लोकार्द्धं क० घ० च० चिह्नितपुस्तकेषु न पठितम् ।
(२) एतच्छ्लोकार्द्धं ख० चिह्नितपुस्तके न दृश्यते ।
(३) द्विपदा पौरुषं छन्दो ब्राह्मी त्वेकपदा स्मृताः इति ख० ।
(४) तथैवेति ख० ।

मन्द्रकर्षणसंयुक्तमतिस्वारं प्रशंसति[1]।
वदन्ति देवताः कृष्टं मनुष्यास्त्वितरैस्त्रिभिः[2] ॥१०८॥
द्वितीयं पशवः[3] सर्वे गन्धर्वाप्सरसः स्वरम्।
अण्डजाः पक्षिणः सर्पाश्चतुर्थमुपभुञ्जते[4] ॥१०९॥
मन्द्रं पिशाचा रक्षांसि असुराश्चोपभुञ्जते[5]।
अतिस्वारं[6] तु शेषस्य जङ्गमस्थावरस्य च ॥११०॥
वैश्वदेवस्वरः कृष्टो नित्यं यो मूर्ध्नि तिष्ठति[7]।
तालव्यः प्रथमः शाम्भः स्वर आदित्यदैवतः[8] ॥१११॥
स्वरो द्वितीयः साध्यानां भ्रुवोर्देशश्रितश्च यः[9]।
आश्विनस्तु[10] तृतीयोऽत्र स्वरः कर्णसमाश्रितः ॥११२॥
चतुर्थस्तत्र[11] वायव्यो नासिक्यः स्वर उच्यते।

---

(१) तु न विदुरिति ख०।

(२) सर्वां मनुष्याः प्रथमं स्वरमिति ख०।

(३) पशवः इति ख० ग०।

(४) तूपभुज्यते इति क० घ० च०, चतुर्थश्चोपभुञ्जते इति ख०।

(५) एतच्छ्लोकार्द्धं क० घ० च० चिह्नितपुस्तकेषु नोपलभ्यते।

(६) अतिस्वार्यं इति क० घ० च०, अतिसार इति ख०।

(७) ख० चिह्नितपुस्तके, वदन्ति देवताः कृष्टमित्यादि नित्यं यो मूर्ध्नि तिष्ठतीत्यन्तः, द्वितीयस्तु भ्रुवोर्मध्ये इति श्लोकात् प्राक् पठितः।

(८) चेद्दन्त्य एव त्विति क० घ० च०।

(९) देशः समाश्रितः इति ख० ग०।

(१०) आग्नेयस्त्विति क० घ० च०।

(११) त्रिषु इति क० घ० च०।

पञ्चमस्तु स्वरः प्रोक्तश्चाक्षुषः सूर्य्यदैवतः[1] ॥११३॥
यस्तु सामस्वरः षष्ठः[2] स सौम्यो मन्द्र उच्यते।
विकर्षेण तु मन्द्रस्य[3] युक्तोऽतिस्वार्य्य उच्यते ॥११४॥
स मैत्रावरुणो ज्ञेयो मन्द्रस्थानसमाश्रितः[4] ॥
सामस्वराणां सप्तानामेते देवा इहोदिताः[5] ॥११५॥
त्रयाणामितरेषां तु लोकाधिपतयस्त्रयः।
वाग्देवत्योऽथ वाग्नेयः प्रस्तावश्चैव सामसु ॥११६॥
उद्गीथापद्रवावैन्द्रौ स्यातां वा वायुदेवते।
सौर्य्यः स्यात्प्रतिहारोऽत्र निधनं वैश्वदेवतम् ॥११७॥
हिङ्कारप्रणवाभ्यान्तु पुरस्तादेव कीर्तनात्।
इति व्यस्तसमस्तानां मन्त्राणामिह दैवतम्।
देवताविद्वदेचेत प्रयोगे सर्व्वकर्मणाम् ॥११८॥

सप्तर्षयो वसवश्चापि देवा
अथर्व्वाणो भृगवः सोमसूर्य्याः[6]।

---

(१) एतदर्द्धश्लोकाद्धं क० ख० ग० चिह्नितपुस्तकेषु नास्ति।
(२) कृष्ट इति क० ख० ग०।
(३) कर्षणेनैव मन्द्रस्येति क० ख० ग०, विकर्षेन तु मन्द्रस्येति घ०।
(४) मन्द्रस्थानसमाश्रितः इति क० ख० ग०, मन्द्रस्थानसमानि घ-श्रिति ग०।
(५) इति सप्तानां सप्तानामुक्ता सामसु देवताः इति क० ख० ग०।
(६) वंशोऽस्यैषा इति क० ख० ग०।

पथ्यास्वस्ती रोदसी चोक्तमन्त्रे
कुहूर्गुङ्गुरदितिर्धेनुरघ्न्या ॥११९॥
असुनीतिरिला वा धी [1] विधातानुमतिर्दया।
अङ्गिरोभि सहैता सूक्तमन्त्राश्च देवता ॥१२०॥
वैश्वानरो द्वि[2] सुपर्णो विवस्वान्
प्रजापतिर्गौ सुधन्वा नगोध[3]।
अपा नपादर्य्यमा वातजूति-
रिलस्पतिश्चैव रथस्पतिश्च॥१२१॥
ऋभव पर्ज्जन्य पर्व्वताग्नाश्च[4] पत्नी
र्द्यो भगो[5] देवपत्नीर्दिशश्च।
आदित्या रुद्रा पितरोऽथ साध्या
निपातिनो वैश्वदेवेषु सर्व्वे॥१२२॥
अनुक्रान्ता देवता सूक्तभाजो
हविर्भाजश्चोभयथा निपाते।
अथैव स्यादुभयथान्यथा वा
न प्रत्यक्षमनृषेरस्ति मन्त्र ॥१२३॥

---

(१) स्वादिति ख॰ ग॰।
(२) द्यो सुधन्वा गोभ्य इति क॰ घ॰ च॰, न नद्य इति ग॰।
(३) अपीति ख॰ ग॰।
(४) वा गावश्चेति क॰ घ॰ च॰।
(५) भर्गः इति ग॰।

योगेन दाक्ष्येण दमेन बुद्ध्या
वाङ्मात्येन तपसा नियोगैः[1]।
उपास्यथ्याः[2] क्रत्स्नशो देवता या[3]
ऋचो ह यो वेद स वेद देवान्।
यजूंषि यो वेद स वेद यज्ञान्
सामानि यो वेद स वेद तत्त्वं ॥१२४॥

अभौ मे पुत्रकामाया अब्दादूर्द्धं च त[4]त्कृतम्।
आग्निपो योगमेतं हि वाङ्मौ गोर्यन[5] मन्यते ॥१२५॥
एकारमनुकम्पार्थे नाम्नि स्मरति माठरः।
आख्यातभूतकरणं[6] वाष्कुला स्त्री ययौ इत ॥१२६॥
मन्त्राणां देवताविद्यः प्रयुङ्क्ते कर्म कर्हिचित्।
जुषन्ते देवतास्तस्य[7] हवि[8]र्वा[9]देवताविदः ॥१२७॥
अविज्ञानप्रदिष्टं[10] हि हविर्नाश्नन्ति देवताः।

---

(१) अभियोगैरिति ख०।
(२) उपास्यास्ताः इति ख० ग०।
(३) देवतस्येति क० घ० च०।
(४) स वागर्द्धेन यदिति क० घ० च०।
(५) बह्वो गोर्वेन्मिति ख०।
(६) व्याख्याते भूतकरणमिति ख०।
(७) तस्येति ग०।
(८) हविर्व्वेति ख०।
(९) नेति क० ग० घ० च०।
(१०) अविज्ञातप्रदिष्टमिति क० घ० च०।

तस्मान्मनसि मन्त्रस्य देवता जुहुयाद्धवि ॥१२८॥
स्वाध्यायमेव(१) योऽधीते मन्त्रदैवतविच्छुचि ।
स सत्रसदिव (२)स्वर्गं सत्रसद्भिरपीज्यते(३) ॥१२९॥
नियमोऽथ जपे होमे ऋषिच्छन्दोऽथ दैवतम् ।
अन्यथा चेत् प्रयुञ्जानस्तत्फलाच्चात्र हीयते ॥१३०॥
ऋषिच्छन्दोदैवतादिज्ञानं यज्ञादिषु श्रुतम् ।
तदाश्रित्य प्राग्दृष्टिर्विहितात्रेति गम्यताम् ॥१३१॥
अविदित्वा ऋषिच्छन्दोदैवतं योगमेव च ।
योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु स ॥१३२॥
अर्थेप्सव ऋषयश्छन्दोभिर्देवता पुरा ।
अभ्यधावन्निति च्छन्दो मध्ये त्वाङ्गर्महर्षय ॥१३३॥
ऋषिन्तु प्रथमं ब्रूयाच्छन्दस्तु तदनन्तरम् ।
देवतामथ मन्त्राणां कर्मस्वेवमिति श्रुति ॥१३४॥
आप्तस्य वा अनाप्तस्य(४) विविच्यात्मानमात्मनि ।
ईक्षमाणो ह्युभौ सम्यगृचो दैवतवित्पठेत् ॥१३५॥
स ब्रह्मामृतमत्यन्तं योनिं सदसतोर्ध्रुवम् ।
महद्वाणु च विश्वेशं विशति ज्योतिरुत्तमम् ॥१३६॥

इति शौनकाचार्यकृतायां वृहद्देवतायामष्टमोऽध्यायः ॥

समाप्ता वृहद्देवता ॥

---

(१) उतेति क० घ० च० ।
(२) स्वसत्रसदपीति ग० ।
(३) अधीयते इति क० घ० च० ।
(४) आत्मानं वाप्यनधारमिति ख०, आत्मानं वाप्यनाधारमिति ग० ।

श्रीः

# अथार्षानुक्रमणी ।

## प्रथमं मण्डलम् ।

ऋग्वेदमखिलं ये हि द्रष्टारो मुनिपुङ्गवाः ।
तदनुक्रमणायाहं नमामि परमेश्वरीम् ॥१॥
अथाग्निमीळ इत्यादि प्रथमं मण्डलं प्रति ।
शतर्चिनस्तु विज्ञेया ऋषयः सुखसिद्धये ॥२॥
तेषां पूर्वो मधुच्छन्दा मेधातिथिरनन्तरः ।
शुनःशेपस्तृतीयोऽयं हिरण्यस्तूप उत्तरः ॥३॥
कण्वस्तु पञ्चमः षष्ठः प्रस्कण्वः सव्य उत्तरः ।
नोधाः पराशरश्चान्यो गोतमः कुत्स उत्तरः ॥४॥
काश्यपस्तथ कक्षीवान् परुच्छेपस्तदुत्तरः ।
दीर्घतमास्ततोऽगस्त्यः षोडशैते शतर्चिनः ॥५॥
ऋचां शतानि दृष्ट्वा(क)इत एव शतर्चिनः ।
अतादीनान्तु तथाहि तथाप्येते शतर्चिनः ॥६॥

(क) शतानां दृष्ट्वादिति पाठो भवितुमर्हति ।

तत्र त्वामिति आरभ्य सूक्तानां दशकं प्रति ।
वैश्वामित्रो[क] मधुच्छन्दा ऋषिरित्यवगम्यताम् ॥७॥
इन्द्रं विश्वा(११)[ख] इति तस्य जेता तस्य सुतो मुनिः ।
अग्निं दूत(१२)मुपक्रम्य सूक्तद्वादशकं प्रति ॥८॥
काण्वो मेधातिथिर्नाम मुनिरित्यवगम्यताम् ।
कस्य नून(२४)मुपक्रम्य सूक्तानां सप्तकं प्रति ॥९॥
आजीगर्त्तिं शुनःशेप ऋषिरित्यवगम्यताम् ।
अयन्तु देवराताख्यो वैश्वामित्रस्य कृत्रिमः ॥१०॥
त्वमग्न(३१) इत्युपक्रम्य सूक्तानां पञ्चकं प्रति ।
हिरण्यस्तूपनामायमृषिरङ्गिरसः सुतः ॥११॥
प्र वो यह्व(३६)मुपक्रम्य सूक्तानामष्टकं प्रति ।
घोरस्य पुत्रः कण्वोऽयमृषिरित्यवगम्यताम् ॥१२॥
[ग] अभित्य मेष(५१)मित्यादिसूक्तानां सप्तकं प्रति ।
सव्यो हि नामाङ्गिरस ऋषिरित्यवगम्यताम् ॥१३॥
नू चित्सहोजा(५८) इत्यादि सूक्तानां सप्तकं प्रति ।
गोतमस्य सुतो नोधा ऋषिरित्यवगम्यताम् ॥१४॥

---

(क) विश्वामित्र इति ग० ।

(ख) (११) चिह्नेनानेन सूक्तसङ्ख्या परिच्छेद्या । एवं परत्रापि । मन्त्रसङ्ख्या तु मूलत एवावगन्तव्याम् ।

(ग) अपि विवस्वदि(४४)त्यादि सूक्तानां सप्तकं प्रति ।
कण्वस्य पुत्रः प्रस्कण्व ऋषिरित्यवगम्यताम् ।
इत्येवं श्लोकोऽस्मात् पूर्वं भवितुमर्हति । सर्वानुक्रमण्यादौ तथैवोपलम्भात् ।

पञ्चा न तायु(६५)मित्यादिसूक्तानां नवकं प्रति ।
शाक्त्यः पराशरो नाम ऋषिरित्यवगम्यताम् ॥१५॥
उपप्रयन्त(७४) इत्यादिसूक्तानां विंशतिं प्रति ।
राहूगणो गोतमो(क)ऽयमृषिरित्यवगम्यताम् ॥१६॥
इमं स्तोम(९४)मुपक्रम्य सूक्तानां पञ्चकं प्रति ।
कुत्सो हि नामाङ्गिरस ऋषिरित्यवगम्यताम् ॥१७॥
जातवेदस(९९) इत्यस्मिन् मारीचः कश्यपो मुनिः ।
स यो वृषे(१००)ति सूक्तस्य ऋषयो वार्षागिराः ॥१८॥
ऋज्राश्वः प्रथमस्तेषां भयमानसुराधसौ ।
सहदेवोऽम्बरीषश्च तेऽत्र सूक्ते प्रकीर्त्तिताः ॥१९॥
चन्द्रमा(१०५) इति सूक्तस्य त्रित आप्त्योऽथवा ऋषिः ।
नासत्याभ्या(११६)मुपक्रम्य सूक्तेष्वेकादशस्वथ ॥२०॥
कक्षीवान् दैर्घतमस उशिक्सूनुः स एव च ।
भावयव्यस्तु राजायमृषिरा गधिते(१२६,६)त्यृचः ॥२१॥
तद्भार्य्या रोमशा नामोपोत्तमस्या उपोत्तमे ।
अग्निं होतार(१२७)मित्यादिसूक्तेष्वेव त्रयोदश ॥२२॥
दैवोदासिः परुच्छेपो राजैवायमृषिस्मृतः ।
वेदिषदे(१४०)प्रभृतीनां सूक्तानां पञ्चविंशतेः ॥२३॥
दीर्घतमा नामौचथ्य ऋषिरित्यवगम्यताम् ।
कया शुभेतिसंवाद इन्द्रादीनां हि तत्र तु ॥२४॥

(क) गौतम इति घ० ।

कया शुभे(१६५)त्युपक्रम्य युजामाद्यास्त्वचा पुनः ।
एकादश्या[क]श्चायमिन्द्र ऋषिरित्यवगम्यताम् ॥२५॥
ऋषयो मरुतस्तत्र तृतीयाद्ययुजास्त्वचाम् ।
सूक्तस्यान्त्ये तृचेऽगस्त्य ऋषिरित्यवगम्यताम् ॥२६॥
अगस्त्य एव तस्त्वा(१६९)दिमित्रावरुणयो[ख] सुत ।
षड्विंशतेश्च सूक्तानामृषिरित्यवगम्यताम् ॥२७॥
इन्द्रागस्त्ययो संवादो न नून(१७०)मिति तत्र तु ।
प्रथमायास्तृतीयाया ऋचोरिन्द्र ऋषि स्वयम् ॥२८॥
उभौ वाथ चतुर्थ्यास्तु द्वयोरन्यतरोऽथवा ।
पूर्व्वी(१७९)रिति च सूक्तस्य संवादस्तु तृचास्त्रय ॥२९॥
लोपामुद्रा तृचे पूर्व्वे अगस्त्यो मध्यमे तृचे ।
अन्तेवासी ब्रह्मचारी सूक्तस्यान्ते तृचे मुनि ॥३०॥

इति प्रथम मण्डलम् ।

(क) एकादश्या इति क॰ ।
(ख) तस्त्वादिमित्रावरुणयोरिति घ॰ च॰ ।

## अथ द्वितीयं मण्डलम् ।

मध्यमेष्वृषयो ज्ञेया मण्डलेष्वथ मध्यमाः ।
तव त्वमग्न(१) इत्यादिर्द्वितीयं मण्डलं प्रति ॥१॥
ऋषिर्गृत्समदो नाम विज्ञेयः स च शौनकः ।
औरसः शुनहोत्रस्य शुनकस्यैव कृत्रिमः ॥२॥
तस्मादाङ्गिरसः पूर्वं पश्चाच्च भृगुतां गतः ।
हुवे व(४) इति सूक्तानां तत्रापि च चतुष्टये ॥३॥
सोमाहुतिर्भार्गवोऽयमृषिरित्यवगम्यताम् ।
इमा गिर(२७) उपक्रम्य सूक्तानां त्रितयं प्रति ॥४॥
ऋषिः कूर्मो गार्त्समदः स्वयं गृत्समदोऽथ वा ॥५॥

इति द्वितीयं मण्डलम् ।

# अथ तृतीयं मण्डलम्।

सोमस्य मे(१)त्युपक्रम्य तृतीय मण्डल प्रति।
विश्वामित्र इति ज्ञेय स च गाथिसुत[क] स्मृत ॥१॥
ऋषभो द्वे प्र व(११) सूक्ते विश्वामित्रसुतो जगौ।
विपाजसे(१५)ति सूक्ते द्वे कात्योत्कील ऋषिर्जगौ ॥२॥
समिध्यमानो(१७) द्वे सूक्ते वैश्वामित्र कतो जगौ।
अग्नि होतार(१९)मारभ्य गाथी नाम स कौशिक ॥३॥
सूक्तान्यपश्यच्चत्वारि सूक्ते निर्मथिते परे।
देवश्रवोदेववातावृषी एतौ हि भारतौ ॥४॥
कुशिक आसदि(२१)त्यस्मिन्नैषीरथ्यसुतो मुनि।
अथवा मण्डलद्रष्टा विश्वामित्रो यथा श्रुति[ख] ॥५॥
प्र पर्वताना(३३)मित्यस्मिन् विपाड्त्येवमादिभि।
नदीभि सह सवादो विश्वामित्रस्योक्तितीर्षा ॥६॥
अष्टमी दशमी षष्ठी चतुर्थी च नदीवच।
शिष्टा या नवसूक्तस्य विश्वामित्रवचांसि ता ॥७॥
असे प्रयन्ती(२९,१०)त्येतस्यां घोर आङ्गिरसो मुनि।

(क) गाथीसुत इति क०।

(ख) मुनिरिति ग०।

(२९,१०) त्रिष्टेनानन सूक्तसङ्ख्या ऋकसङ्ख्या च अवगन्तव्या। एव मर मापि।

निर्दहेच्छप्यमानेऽपि श्रूयते[क] सा न शप्यते ॥८॥
अभि तष्टेव(२८) सूक्तस्य वैश्वामित्रः प्रजापतिः ।
वाच्यो वा स उभौ वा तौ विश्वामित्रोऽथवा श्रुतेः ॥९॥
इमं महे(५४) उपक्रम्य सूक्तानां त्रितयं प्रति ।
अयमेव ऋषिर्विद्यादुक्तगोत्रः प्रजापतिः ।
भार्गवो जमदग्निर्वा मण्डलान्त्ये त्वृचेऽप्यृषिः ॥१०॥

इति तृतीयं मण्डलम् ।

---

(क) शप्यमानेति भूयते इति ज० ।

# अथ चतुर्थं मण्डलम् ।

त्वां ह्यग्ने सद(१)मित्यादि चतुर्थं मण्डलं प्रति ।
गौतमो वामदेवो[क]ऽयमृषिरित्यवगम्यताम् ॥१॥
अयं पन्थास्तु संवाद इन्द्रादेः सूक्तमच तु ।
अयं पन्था(१८) इति त्वस्य ऋच इन्द्रः स्वयं मुनिः ॥२॥
वामदेवस्तु पश्चानामर्द्धर्चानां ततः परम् ।
न हि न्वस्या(१८,४)दिषण्णामर्द्धर्चानां तथादितिः ॥३॥
ममच्चन त्वे(१८,८)त्यादीनामृचां पश्चान्त एव तु ।
वामदेव ऋषिर्विद्यादृचाप्येव विशेषतः ॥४॥
त्रसदस्युः पौरुकुत्स्य ऋषिः सूक्ते मम द्विता(४२) ।
क उ श्रव[ख](४३)दिति त्वस्य तथा तस्योत्तरस्य च ।
पुरुमीळ्होऽजमीळ्हश्च[ग] सौहोत्रौ तादृषी सह ॥५॥

इति चतुर्थं मण्डलम् ।

---

(क) गौतमो वामदेवोऽयेति ज० ।

(ख) मोक्षमूलरसम्पादित ऋग्वेदे क ऊं श्रवदिति पाठोऽस्ति ।

(ग) पुरुमीढोऽजमीढश्चेति ज० ।

## अथ पञ्चमं मण्डलम् ।

अबोध्यग्निरुपक्रम्य पञ्चमं मण्डलं प्रति ।
पुत्राद्यैः सह भौमोऽत्रिर्मुनिरित्यवगम्यताम् ॥ १ ॥
अत्र तनुक्रमोक्ता ये ज्ञेयास्तत्रिसुता इति ।
अबोध्यग्नि(१)रिति तस्मिन्नृषी बुधगविष्ठिरौ ॥ २ ॥
कुमार(२)मिति चैतस्मिन् कुमारो वा वृशोऽथवा ।
वृशो जार(क) इति ज्ञेय उभौ वात्र समुच्चितौ ॥ ३ ॥
कमेत(२,१)मिति चैतस्यां तथा विश्वोतिपे(२,९)त्यृचि ।
वृश एव ऋषिर्विद्याच्च विकल्पसमुच्चयौ ॥ ४ ॥
त्वमग्न(१) इति सूक्तेषु चतुष्केषु वसुश्रुतः ।
सखायः सं व(७) इत्यस्मिन्निषस्तस्योत्तरेऽपि च ॥ ५ ॥
त्वामग्न(८) इति चैतस्मिन् गयस्तस्योत्तरेऽपि च ।
जनस्य गोपाः(११) सूक्तेषु चतुष्केषु सुतम्भरः ॥ ६ ॥
प्र वेधस(१५) इति तस्मिन् धरुणोऽङ्गिरसः सुतः ।
वृहद्वय(१६) इति तस्मिन् पुरु(ख)स्तस्योत्तरेऽपि च ॥ ७ ॥
प्रातरग्नि(१८)रिति तस्मिन्मृक्तवाहा द्वितो मुनिः ।
अभ्यवस्था(१९)यमग्ने (२०)च सूक्तयोरेतयोर्मुनिः ॥ ८ ॥

(क) जार इति सर्वानुक्रमण्यां दृश्यते ।
(ख) पूरुरिति सर्वानुक्रमण्यामुपलभ्यते ।

वभ्रिर्नाम मुनि पूर्वं प्रयस्वन्तस्तदुत्तरे ।
मनुष्वत्त्वे(२१)ति सूक्तस्य सप्तो नाम मुनि स्मृत ॥ ८ ॥
प्र विश्वसाम(२२)न्नित्यस्य विश्वसामेत्यृषि स्मृत. ।
अग्ने सहन्त(२३)मित्यस्य द्युम्नोऽस्य विश्वचर्षणि ॥ १० ॥
अग्ने त्व(२४) सूक्तमेकर्चा द्वैपदा विद्यते क्रमात् ।
विप्रबन्धु श्रुतबन्धु सुबन्धुर्बन्धुरित्यमी ॥ ११ ॥
गौपायना इमे ज्ञेया अथवा लौपायना[क] इति ।
ऋषिरच्छा व(२५) [ख]इत्यस्मिन्नुत्तरे च वसूयव ॥ १२ ॥
अनस्वन्ते(२७)ति सूक्तस्य त्रिवृष्णापुरुकुत्सजौ ।
त्र्यरुणत्रसदस्यू द्वावश्वमेधश्च भारत ॥ १३ ॥
अन्यानां तिसृणामेषा पूर्व्वासामितरो सह ।
अथवा भौम एवात्रिस्तृयिरत्र न शस्यते[ग] ॥ १४ ॥
दानक्रियायमेकस्य दाढनदाढता यत[घ] ।
समिद्धो अग्नि(२८)रित्यस्मिन् विश्ववारात्रिगोत्रजा ॥ १५ ॥
त्र्यर्यमे(२९)त्यस्य सूक्तस्य गौरिवीति स शक्तिज ।
कस्य वीर क(३०) इत्यस्य बभ्रुर्नाम ऋषि स्मृत ॥ १६ ॥
इन्द्रो रथाय(३१)सूक्तेऽस्मिन्नवस्यु[ङ]र्नाम सस्मृत ।

---

(क) लौपायना इति सर्वानुक्रमणी ।
(ख) मोक्षमूलरसम्पादित ऋग्वदे, ऋच्छ व इति पाठोऽस्ति ।
(ग) शस्यते इति ग० घ० ।
(घ) दानक्रियेयमेकस्य दाढतादाढता यत इति पाठ सम्भवितुमर्हति ।
(ङ) गावस्युरिति सर्वानुक्रमणी ।

अदर्दरुत्स(३२)मित्यस्य गातुनाम मुनिं स्मृत ॥१७॥
प्राजापत्यं संवरणं सूक्ते महि महे (३३)जगौ ।
प्रभुवसु[क]राङ्गिरसो यस्ते साधिष्ठ(३५) इत्युभे ॥१८॥
सम्भानुने(३७)त्युपक्रम्य सूक्तानां सप्तकं प्रति ।
अत्रिरेव स्वयं भौम ऋषिरित्यवगम्यताम् ॥१९॥
तं प्रत्नथे(४४)ति सूक्तेऽस्मिन्नवत्सारो हि काश्यपः ।
अन्येषु दशभिः साकमृषिरित्यवगम्यताम्[ख] ॥२०॥
सदापृणो यजतो[ग]स्य बाहुवृक्तः सुतम्भरः ।
श्रुतवित्तर्यनामा स एवावद्रो मनसः ॥२१॥
एवमेभ्यो इमे चान्ये दृष्टलिङ्गा हि सूक्तके ।
विदा दिव(४५) इति त्वस्मिन्नृषिरेव सदापृणः ॥२२॥
हयो न विदा(४६)नित्यस्मिन् प्रतिक्षत्र ऋषिः स्मृतः ।
प्रयुञ्जती(४७)ति सूक्तेऽस्मिन्नृषिः प्रतिरथः स्मृतः ॥२३॥
कदू प्रियाय(४८)सूक्तेऽस्मिन् देव व(४९) इति चोत्तरे ।
ऋषिः क्रमेण विज्ञेयः प्रतिभानुः प्रतिप्रभुः[घ] ॥२४॥
विश्वो देवस्य(५०) सूक्तस्य तथैवाग्ने सुतस्य(५१) च ।
उभयोरनयोरेव स्वस्त्यात्रेय इति स्मृतः ॥२५॥

---

(क) प्रभूवसुरिति सर्वानुक्रमणी ।

(ख) एष श्लोकः, ज० चिह्नितपुस्तके, सम्भानुनेत्युपक्रम्येति श्लोकात् प्राक् पठितः ।

(ग) यजत इति पाठः सङ्गतः । सदापृणो यजतावित्ति ग० ।

(घ) प्रतिप्रभ इति सर्वानुक्रमणी ।

प्र श्यावाश्व(५९) उपक्रम्य दृशसूक्तेष्वतः परम् ।
श्यावाश्वो मरुतां स्तोता मुनिरित्यवगम्यताम् ॥२६॥
ऋतेन ऋत(६२)मित्यस्य सूक्तेऽयं[क] श्रुतविन्मुनिः ।
ऋतस्य गोपा(६३)वित्यस्मिन् वरुणं व(६४)इतीह च ॥२७॥
अर्चनाना ऋषिर्विद्याद्यश्चिकेते(६५)ति सूक्तयोः ।
रातहव्योऽथ यजतो बलित्येति(६७) च सूक्तयोः ॥२८॥
उरुचक्रिर्वाङ्गश्चक्रः पौरस्यैव द्वयोर्द्वयोः ।
प्रतिप्रियतमं(७५) सूक्तमवस्युर्दृष्टवान्मुनिः ॥२९॥
अत्रिरेव मुनिर्भौम आभात्यग्नि(७६)रिति द्वयोः ।
अश्विनावेह(७८) सूक्तस्य सप्तवध्रिस्तृषिः स्मृतः ॥३०॥
सत्यश्रवा ऋषिर्नाम महे नो अद्य(७९)सूक्तयोः ।
युञ्जते मन(८१) इत्यत्र श्यावाश्वः सूक्तयोर्ऋषिः ॥३१॥
अत्रिरच्छा वदे(८३)[ख]त्यादिचतुःसूक्तेष्वृषिः स्वयम् ।
मण्डलान्त्यस्य सूक्तस्य प्र व(८७) इत्येवयामरुत् ॥३२॥

इति पञ्चमं मण्डलम् ।

---

(क) चेति च० ।

(ख) मोक्षमूलरसम्पादित ऋग्वेदे सर्वानुक्रमण्याम् अच्छ वदेति पाठो वर्त्तते ।

# अथ षष्ठं मण्डलम्।

त्वं ह्यग्न इत्युपक्रम्य षष्ठाख्यं मण्डलं प्रति ।
बार्हस्पत्यो भरद्वाज ऋषिरित्यवगम्यताम् ॥ १ ॥
तत्राप्यन्ये भरद्वाजादृष्यन्ते येऽपवादतः।
तेषामनुक्तगोत्रास्तु विज्ञेयास्तत्सुता इति ॥ २ ॥
इममू षु (१५) इत्यस्य सूक्तस्याङ्गिरसः सुतः ।
वीतहव्यो विकल्पेन मुनिरित्यवगम्यताम् ॥ ३ ॥
अभूरेक(२१)स्त्वपूर्व्ये(२२)ति सुहोत्रः सूक्तयोर्ऋषिः ।
शुनहोत्रो य ओजिष्ठः(२३) सञ्च ले(२४) चेति सूक्तयोः॥ ४॥
कदा(२५) सनाम दास(२६)स्तु सूक्तयोरनयोर्नरः ।
ऋषिर्यो रयि व(४४)स्त्वादिसूक्तानां त्रितयं प्रति ॥५॥
यज्ञा यज्ञीय(४८)सूक्ते च शंयुः पुत्रो बृहस्पतेः ।
स्वादुष्किलाय(४७)मित्यस्य गर्गो नाम ऋषिः स्मृतः ॥६॥
स्तुषे जन(४९)मुपक्रम्य चतुःसूक्तेष्वयं मुनिः ।
ऋजिश्वा ये सुहोत्राद्याः पौत्राश्चैते बृहस्पतेः ॥ ७ ॥
जीमूत(७५)सूक्ते पायुस्तु भारद्वाज ऋषिः स्मृतः ।
उक्तापवादविषयादितरत्रात्र मण्डले ।
स्वयमेव भरद्वाज एवं सर्व्वत्र गम्यताम् ॥ ८ ॥

इति षष्ठं मण्डलम्।

## अथ सप्तमं मण्डलम् ।

---

अग्निं नर इति ह्येतत्सप्तमं मण्डलं मतं ।
ऋषिर्वसिष्ठो विज्ञेयो मित्रावरुणयोः सुतः ॥ १ ॥
इन्द्र क्रतुं न (३२,२६) इत्यस्मिन्नर्द्धर्चे मो षु (३२) सूक्तके ।
वसिष्ठपुत्रः शक्तिर्वा वसिष्ठो वा स्वयं मुनिः ॥ २ ॥
श्वित्यञ्च(३३) इति सूक्तस्य नवानामादितस्तृचां ।
वसिष्ठ एव पञ्चानां विद्युतो ज्योति(३३,१०)रित्यृचाम् ॥ ३ ॥
वसिष्ठपुत्रा इन्द्रो वा ऋषिरित्यवगम्यताम् ।
तिस्रो वाच(१०१) इति तस्मिन् पर्जन्याये(१०२)ति चोत्तरे ।
अग्निपुत्रः कुमारो वा वसिष्ठो वा स्वयं मुनिः ॥ ४ ॥

इति सप्तमं मण्डलम् ।

---

# अथाष्टमं मण्डलम्।

मा चिदन्यदिति(१)लेतदष्टमं मण्डलं प्रति ।
प्रगाथादृषयो ज्ञेयाः शृणु वक्ष्यामि तानिह ॥ १ ॥
अनुक्तगोत्रो यस्त्वत्र मण्डले लक्ष्यते मुनिः ।
स तु काण्व इति ज्ञेयः प्राङ्मत्स्यात्साम्मदादृषेः ॥ २ ॥
मण्डलाद्यद्वृचस्यायं प्रगाथो घोरजो मुनिः ।
स हि घोरस्य कण्वस्य भ्राता सन् पुत्त्रताङ्गतः ॥ ३ ॥
मेधातिथिः परस्तस्मात्स मेध्यातिथिना सह ।
यच्चिद्धि त्वे(१,२)त्यृचामासामृषिराससविंशतेः ॥ ४ ॥
स्तुहि स्तुही(१,३०)त्याद्यानामृचां चतसृणामृषिः ।
प्रयोग[क]पुत्त्र आसङ्गस्तस्य पत्नी तु शश्वती ॥ ५ ॥
अन्वस्य स्थूर(१,३४)मित्यस्याः सा च लङ्गिरसः सुता ।
मेधातिथिप्रियमेधावृषी सूक्ते इदं वसो(२) ॥ ६ ॥
आङ्गिरसः प्रियमेधस्तत्र मेधातिथिर्मुनिः ।
शिचा वि भिन्दो[ख](२,४१) इत्यस्य तृचस्यान्यस्य केवलम्॥७॥
पिबा सुतस्य(२)[ग] सूक्तस्य मेधातिथिर्ऋषिः स्मृतः ।
यदिन्द्र प्रागपाक्(४) सूक्ते देवातिथिर्मुनिः स्मृतः ॥ ८ ॥

---

(क) प्रयोग इति सर्वानुक्रमण्यो ।

(ख) मोक्षमूलरसम्पादित ऋग्वेदे शिक्ष वि भिन्दो इति पाठोऽस्ति।

(ग) मोक्षमूलरसम्पादित ऋग्वेदे सर्वानुक्रमण्याञ्च पिब सुतस्येति पाठो वर्त्तते ।

दूरादिहेव(५) सूक्तस्य ऋषिर्मेध्यातिथिः स्मृतः(क) ।
महानिन्द्रो य(६)इत्यस्मिन् वत्सो नाम ऋषिः स्मृतः ॥ ८ ॥
प्र यद्वस्त्रिष्टुभं(७) सूक्ते पुनर्वत्स ऋषिः स्मृतः ।
आ नो विश्वाभि(८)रित्यस्मिन् सध्वंसो नाम संस्मृतः ॥ १० ॥
आ नूनमश्विने(९)त्यस्मिञ्छ्यावकर्ण ऋषिः स्मृतः ।
यत्स्थ(१०) इत्यस्य सूक्तस्य प्रगाथो नाम संस्मृतः ॥ ११ ॥
त्वमग्ने व्रतपाः(११) सूक्ते वत्स एव मुनिः स्मृतः ।
ऋषिर्य इन्द्र(१२) सूक्तस्य पर्वतो नाम संस्मृतः ॥ १२ ॥
इन्द्रः सुतेषु(१३) सूक्तस्य नारदो मुनिरेव सः ।
यदिन्द्राह(१४)मिति तस्मिंस्तमु(१५)मित्युत्तरेऽपि च ॥ १३ ॥
गोषूक्ती चाश्वसूक्ती च ऋषी एतौ काण्वायनौ ।
प्र सम्राज(१६)मिति त्रीणि सूक्तानीरिम्बिठिर्जगौ ॥ १४ ॥
तं गूर्धये(१७)ति चत्वारि ऋषिः सूक्तानि सोभरिः ।
ईळिष्व ही(१८)त्युपक्रम्य चतुःसूक्तेष्वतः परम् ॥ १५ ॥
ऋषिर्विश्वमना नाम स वैयश्व इतिः स्मृतः ।
एषां चतुर्थे सूक्ते तु व्यश्वो वाङ्गिरसो मुनिः ॥ १६ ॥
अग्निरुक्ये(२०) उपक्रम्य पञ्चसूक्तेष्वतः परम् ।
मनुर्वैवस्वतो नाम ऋषिरित्यवगम्यताम् ।
एषां तु मध्यमे सूक्ते मारीचो वाथ कश्यपः ॥ १७ ॥
मेधातिथिस्तु प्रस्तानि(२१) सूक्तं
मेध्यातिथिस्तत्र वयन्त(२२)सूक्तम् ।

(क) स्मृत इति अ० ।

नीपातिथिः सूक्तमयेन्द्र याहि(३४)
द्वचं तथान्यं वसुरोचिषस्य ॥१८॥
सहस्रमेतेऽङ्गिरसो ह्यपश्यं-
स्ततोऽग्निनेन्द्रेण(३५) ततोऽदिते(३६)ति ।
चतुर्षु सूक्तेष्वत उत्तरेषु
श्यावाश्वनामा मुनिरत्रिगोत्रः ॥१९॥

अग्निमस्तोषि(३९)सूक्तेषु नाभाकोऽस्य चतुर्ष्वृषिः ।
एषां चतुर्थे सूक्ते वा तस्य चान्त्ये त्र्यृचेऽथवा ॥२०॥
आत्रेयस्त्वर्चनाना वा मुनिरित्यवगम्यताम् ।
इमे विप्रस्य(४३) सूक्तेऽस्मिन् समिधाग्नि(४४)मितीह च॥२१॥
विरूपोऽङ्गिरसः पुत्रस्त्रिशोकस्तत उत्तरे ।
सूक्ते त्वावत(४६) इत्यस्मिन्नश्वपुत्त्र ऋषिर्वशः ॥२२॥
महि वो महता(४७) सूक्ते त्वाष्ट्रस्त्रित ऋषिः स्मृतः ।
स्वादोरभक्षि(४८)सूक्तस्य प्रगाथाख्य ऋषिः स्मृतः[क] ॥२३॥

---

(क) अतः परं, एकादश सूक्तानि मोक्षमूलरसम्पादितऋग्वेदे समुपलभ्यन्ते। तानि तु सायणेन न व्याख्यातानि। अत्रापि च तेषां न ऋषिनिरूपणमस्ति। किन्तु सर्वानुक्रमण्यां तत्र तत्र ऋष्युल्लेखो दृश्यते। यथा, अभि प्र(४९) दस्म प्रस्कण्व * * * *। प्रयस्वन्तं(५०) पुष्टिगुः। यथा मनौ (५१) श्रुष्टिगुः। यथा मनौ (५२) आयुः। उपमं त्वा(५३)ष्टौ मेध्यः। एतत्ते (५४) मातरिश्वा * *। भूरीत् (५५) पृषध्रः * * * *। प्रति ते (५६) एषध्रः * * * *। युवं देवा (५७) * * * * * * *

क्रमधिकाविवरणे तु सूक्तानामेषामृषिनिरूपणमुपलभ्यते।

अग्न आयाहि(१०) सूक्तस्य तथा तस्योत्तरस्य च।
भर्गः प्रगाथपुत्त्रोऽयमृषिरित्यवगम्यताम् ॥२४॥
प्रगाथ एव प्रो अस्मै(१२) सूक्तेष्वेषु चतुर्ष्वृषिः।
तरोभि(१९)रितिसूक्तस्य प्रगाथतनयः कलिः ॥२५॥
सूक्ते लिद्ध त्वामग्नि(१७)ति सांमदो वा
मत्स्यो मुनिस्तत्सहचारिणो वा।
जालेन नद्धा[क] बहवो हि मत्स्या
मान्योऽथ मैत्रावरुणिः स्वयं वा ॥२६॥
आ त्वा रथ(१८)मिति तस्य प्र प्र वस्त्रिष्टुभस्य(१९)[ख] च।
आङ्गिरसः प्रियमेध ऋषिरित्यवगम्यताम् ॥२७॥
यो राजे(७०)ति च सूक्तस्य त्वं न(७१) इत्युत्तरस्य च।
आङ्गिरसः पुरुहन्मा मुनिरत्र यदुत्तरम् ॥२८॥
तत्र त्वन्यतरोऽयं वा सुदीतिपुरुमीळ्हयोः।
हविष्कृणुध्व(७२)मित्यस्मिन् प्रागाथो हर्यतो मुनिः॥२९॥
उदीराथा(७३)मिति तस्य तथा तस्योत्तरस्य च।
आत्रेयोऽयं गोपवन ऋषिरित्यवगम्यताम् ॥३०॥
आत्रेयः सप्तवध्रिर्वा तयोः पूर्वस्य गम्यताम्।
ऋषिर्युक्ष्वा हि[ग](७५) सूक्तस्य विरूपो वाङ्गिरसः सुतः॥३१॥
इमं नु(७६) सूक्तमारभ्य त्रिषु सूक्तेष्वतः परम्।

(क) बद्धा इति म०।
(ख) मोक्षमूलरसम्पादितऋग्वेदे त्रिष्टुभमिति पाठो वर्त्तते।
(ग) मोक्षमूलरसम्पादितऋग्वेदे युक्ष्वा होति पाठो वर्त्तते।

काण्वः कुरुसुतिर्नाम ऋषिरित्यवगम्यताम् ॥२२॥
अयं क्रतु(७९)रिति तस्मिन् क्रतुर्नाम भृगोः सुतः ।
न ह्यन्य(८०)मिति सूक्तेऽस्मिन्नेकद्यूर्नौधसो मुनिः[क] ॥२३॥
आ तू न[ख](८१) इत्युपक्रम्य त्रिषु सूक्तेष्वतः परम् ।
कुसीदी नाम काण्वोऽयमृषिरित्यवगम्यताम् ॥२४॥
प्रेष्ठं व(८४) इति[ग] सूक्तस्य काव्योऽयमुशना मुनिः ।
आ मे हव(८५)मुपक्रम्य त्रिषु सूक्तेष्वतः परम् ॥२५॥
आङ्गिरसः कृष्णनामा मुनिरित्यवगम्यताम् ।
एषान्तु मध्यमे सूक्ते कार्ष्णिर्वा विश्वको मुनिः ॥२६॥
उत्तरे च [घ]वसिष्ठस्य पुत्रो वा द्युम्निको[ङ] मुनिः ।
प्रियमेधो वाङ्गिरस ऋषिरित्यवगम्यताम् ॥२७॥
तन्मोदंसस्य[च](८८) सूक्तस्य नोधा नाम स गौतमः ।
बृहदिन्द्राय(८९) सूक्तस्य ऋषी तस्योत्तरस्य च ॥२८॥
नृमेधः पुरुमेधश्च सहैतावङ्गिरःसुतौ ।
अपाला नाम कन्ये(९१)ति सूक्तस्यात्रेः सुता मुनिः ॥२९॥
श्रुतकक्षः सुकक्षश्च तावप्यङ्गिरसः सुतौ ।

---

(क) नाम नौधसः इति घ० ।
(ख) मोक्षमूलरसम्पादितऋग्वेदे आ तु न इति पाठो दृश्यते ।
(ग) प्रेष्ठं वोऽतिथीति च० घ० ।
(घ) उत्तरमेवेति ज० ।
(ङ) द्युम्नीक इति सर्व्वानुक्रमणी ।
(च) मोक्षमूलरसम्पादितऋग्वेदे सर्व्वानुक्रमण्यामनुक्रमणिकाविवरणे च तन्मोदस्यमिति पाठो वर्त्तते ।

पान्तमा व(९२) इति तस्य तादृशो ऽवगम्यताम् ॥४०॥

उद्घेदभी(९३)ति सूक्तस्य सुकक्षः स्वयमेव तु।

गौर्धयती(९४)ति सूक्तस्य बिन्दुरङ्गिरसः सुतः।

पूतदक्षोऽथवा ज्ञेयः सोऽपि चाङ्गिरसः सुतः ॥४१॥

आ त्वे(९५)ति सूक्ते तत उत्तरे च

तिरश्चिनामा(क) ङ्गिरसस्तनूजः।

तयोत्तरे मारुतिर्वा द्युतानो

रेभस्सुतः काश्यप उत्तरस्य ॥४२॥

इन्द्राय साम(९८) सूक्तस्य तथा तस्योत्तरस्य च।

नृमेधनामाङ्गिरस ऋषिरित्यवगम्यताम् ॥४३॥

अयन्त एमि(१००) सूक्तस्य नेमो नाम भृगोः सुतः।

अयमस्मि(१००,४) इत्यृचे त्वस्मिन्निन्द्र एव ऋषिः स्मृतः ॥४४॥

ऋधगित्थे(१०१)ति सूक्तस्य जमदग्निः स भार्गवः।

त्वमग्न(१०२) इति सूक्तस्य प्रयोगो नाम भार्गवः ॥४५॥

अथवा इध्मसुतः पावकोऽग्निर्मुनिः स्मृतः।

गृहपतियविष्ठाख्यावग्नी वा महसः सुतौ ॥४६॥

तयोरन्यतरो वान्योऽप्यृषिरित्यवगम्यताम्।

ऋषिस्त्वदर्शि(१०३) सूक्तस्य सोभरिर्नाम काण्वः ॥४७॥

इत्यष्टमं मण्डलम्।

---

(क) तिरश्ची नामेति सर्वानुक्रमणी, अनुक्रमणिकाविवरणञ्च।

## अथ नवमं मण्डलम् ।

स्वादिष्ठये(१)त्युपक्रम्य नवमं मण्डलं प्रति ।
पावमान्यस्तु विज्ञेया ऋचयः सौमिकाश्च ते[क] ॥ १ ॥
मण्डलाद्यस्य सूक्तस्य मधुच्छन्दा ऋषिः स्मृतः ।
पवस्व देववी:(२) सूक्ते मेधातिथिरिति स्मृतः ॥ २ ॥
एष देव(३) इति तस्य शुनःशेपो मुनिः स्मृतः ।
सना च सोम(४)[ख] सूक्तस्य हिरण्यस्तूप ऋषिः स्मृतः ॥३॥
एतेषामुक्तगोत्रत्वाद्गोत्रोक्तिर्न कृता मया ।
समिद्ध(५) इत्युपक्रम्य सूक्तानां विंशतिं प्रति ॥ ४ ॥
असितो वा देवलो वा ऋषिरेतौ तु काश्यपौ ।
ऋषिः पवस्व(२५) सूक्तेऽस्मिन्नागस्त्यः स दृळ्हच्युतः ॥ ५ ॥
दृळ्हच्युतस्य पुत्रोऽयमिध्मवाहस्तदुत्तरे ।
एष कवि(२७)रेष वाजी(२८) सूक्तयोरनयोः क्रमात् ॥६॥
नृमेधः प्रियमेधश्च मुनिराङ्गिरसाविमौ ।

---

(क) सर्व्वानुक्रमणीवेदार्थदीपिकाजगन्नाथकृतानुक्रमणिकाविवरणेषु नवममण्डलस्य सोमदेवताकत्वकीर्त्तनमस्ति । अत्र तु नवममण्डले सौमिकानामृषित्वं दृश्यते । अत्र शौनक एव प्रमाणम् । अथवा सोमो देवता एषामिति व्युत्पत्त्या ऋषयोऽपि सौमिका इति व्यपदिश्यन्ते । अधिकेन व्यपदेशा भवन्तीति न्यायात् ।

(ख) मोक्षमूलरसम्पादितऋग्वेदे सर्व्वानुक्रमण्याञ्च सन च सोमेति पाठो वर्त्तते ।

प्राण(२९) प्र धारा अस्ये(३०)ति सूक्तयोरनयो क्रमात् ॥७॥
नृमेधश्चाथ विन्दुश्च मुनिरङ्गिरस सुत' ।
प्र सोमास (३१) प्र सोमास (३२) सूक्तयोरनयो क्रमात ॥८॥
राहूगणो गौतमोऽथ श्यावाश्वश्चात्रिगोत्रज ।
प्र सोमास(३३) उपक्रम्य द्वयोराप्तस्थितो मुनि ॥९॥
द्वयोर्द्वयोरुत्तरयोर्ऋषयोऽङ्गिरस सुता ।
प्रभूवसूरङ्गणो बृहन्मतिरिमे त्रय ॥१०॥
प्र ये गाव(४१) उपक्रम्य त्रिषु सूक्तेष्वत परम् ।
मेध्यातिथि स्वय काण्व ऋषिरित्यवगम्यताम् ॥११॥
त्रिष्वेवाङ्गिरसोऽयास्य प्र ण(४४) इत्युत्तरेष्वपि ।
कविस्तु भार्गव सूक्तेष्वया सोम(४७) इति त्रिषु ॥१२॥
उचथ्यस्त्रिषु सूक्तेषूत्त(५०) इत्यङ्गिरस सुत ।
उत्ते(५३) सूक्त उपक्रम्य सूक्तानामष्टक प्रति ॥१३॥
काश्यपोऽयमवत्सार ऋषिरित्यवगम्यताम् ।
अया वीती(६१)ति सूक्ते चामहीयुरङ्गिर सुत' ॥१४॥
एते असृग्र(६२)मित्यस्मिन् जमदग्निर्भृगो सुत ।
आ पवस्वे(६३)ति सूक्तेऽस्मिस्त्रिषुवि काश्यपो मुनि ॥
वृषा सोमे(६४)ति सूक्तेऽस्मिन् मारीच काश्यपो मुनि ॥१५॥
हिन्वन्ति(६५)सूक्त जमदग्निराप
स्वय भृगुर्वा वरुणस्य पुत्र ।
अमिर्भृगोत्रान्तु पवस्व(६६)सूक्त
वैखानसा नाम शत विदुस्ते ॥१६॥

त्वं सोम(१०)सूक्ते मद्वचात्तृचेषु
मुख्येषु सप्तर्षयः प्रसिद्धाः ।
भरद्वाजः कश्यपो गोतमोऽत्रि-
र्विश्वामित्रो जमदग्निर्वसिष्ठः ॥१७॥

उत्तराणां तु शिष्टानामृचामङ्गिरसः सुतः ।
पवित्रो वा वसिष्ठो वा ह्युभौ वा तावृषी सह ॥१८॥
प्र देव(६८)मिति वत्सप्रिः[क] सूक्तं भालन्दनो जगौ ।
दधुः(६९) सूक्तं त्वाङ्गिरसो हिरण्यस्तूप उत्तरम् ॥१९॥
हिरम्ना(७०) इति सूक्तेऽस्मिंस्तत आ दक्षिणो(७१)त्तरे ।
रेणुः पूर्व्वोऽथ ऋषभो वैश्वामित्रौ च तावृषी ॥२०॥
हरिं मृजन्ति(७२) सूक्तस्य स्रक्के द्रप्सस्य(७३) च क्रमात् ।
हरिमन्तः पवित्रश्च मुनिरङ्गिरसः सुतः ॥२१॥
शिशुर्न(७४) सूक्ते कक्षीवान्मुनिर्दीर्घतमःसुतः[ख] ।
अभि प्रियाण्यु(७५)पक्रम्य पञ्चसूक्तेष्वतः परम् ॥२२॥
कविर्नाम भृगोः पुत्र ऋषिरित्यवगम्यताम् ।
सोमस्य धारे(८०)त्यादीनां सूक्तानां त्रितयं प्रति ॥२३॥
भारद्वाजो वसुर्नाम मुनिरित्यवगम्यताम् ।
पवित्र(८३)मिति सूक्तस्य पवित्रोऽङ्गिरसः सुतः ॥२४॥
ऋषिः पवस्व(८४) सूक्तस्य वाच्यो नाम प्रजापतिः ।
इन्द्राय सोम(८५) सूक्तस्य वेनो नाम स भार्गवः ॥२५॥

(क) वत्सप्रीरिति सर्व्वानुक्रमणी ।
(ख) दैर्घतमस इति प० प० । कक्षीवानौशिज इत्यनुक्रमणिकाविवरणम् ।

परीत(१००) इति सूक्तेऽस्मिन् भारद्वाजादयो[क] विदुः ।
एते तु सप्त ऋषयः सगोत्राः परिकीर्तिताः ॥४२॥
पवस्वे(१०८)त्युत्तरं सूक्तं मन्त्रैते त्वृषयो विदुः ।
तस्य त्वाद्ये द्वृचे शाक्त्यो गौरिवीतिर्ऋषिः स्मृतः ॥४३॥
तृतीयाया ऋचः शक्तिर्वासिष्ठोऽन्त्ये द्वृचेऽपि च ।
अथ द्वृचानां शिष्टानामूरुराङ्गिरसो मुनिः ॥४४॥
भारद्वाज[ख] ऋजिश्वा च तथैवाङ्गिरसौ नृपाः ।
ऊर्ध्वसद्मा कृतयशा ऋणञ्चय इति त्रयः ॥४५॥
धिष्ण्याग्नयः[ग] परि प्रे(१०९)ति सूक्तमैश्वरयो विदुः ।
पर्यूषु प्र(११०)ति सूक्तस्य त्रिवृष्णपुरुकुत्सजौ ॥४६॥
त्र्यरुणस्त्रसदस्युश्च मुनिरित्यवगम्यताम् ।
अया रुचे(१११)ति सूक्तस्य पारुच्छेपिरनानतः ॥४७॥
नानान(११२)मिति सूक्तस्य शिशुराङ्गिरसो मुनिः ।
शर्यणावति(११३)सूक्तस्य य इन्दो(११४)रुत्तरस्य च ॥४८॥
मारीचः कश्यपो नाम ऋषिरित्यवगम्यताम् ।

इति नवमं मण्डलम् ।

---

(क) भरद्वाजकश्यपगोतमात्रिविश्वामित्रजमदग्निवसिष्ठा इति ऋगनुक्रमणिकाविवरणे वेदार्थदीपिका च ।

(ख) भारद्वाजा इति घ० ।

(ग) धिष्ण्याग्नेय इति घ० च० ।

# अथ दशमं मण्डलम् ।

अग्ने बृहन्निति(१)त्येतद्दशमं मण्डलं पुनि ।
चुद्रसूक्ता महासूक्ता विज्ञेया ऋषयस्त्विति ॥१॥
मण्डलादिमुपक्रम्य सप्तसूक्तेभ्यतः परं ।
आप्त्यस्त्रितो मुनिस्त्वाष्ट्रस्त्रिशिराः सूक्तयोर्द्वयोः ॥२॥
प्रकेतुने(८)ति तत्रापि यत्सूक्तद्वरमन्तयोः ।
अम्बरीषसुतस्तत्र सिन्धुद्वीपोऽथवा मुनिः ॥३॥
ओ चि(१०)त्सूक्तेष्वयुक्षु पश्या सह मुनिर्यमी ।
वैवस्वतो यमो नाम नवम्या सह युक्षु तु ॥४॥
वृषा(११)द्यावा(१२)युजे(१३)त्येषां सूक्तानां त्रितयं प्रति ।
आङ्गि(क)र्नाम हविर्धानो मुनिरित्यवगम्यताम् ॥५॥
एतेषामुत्तरे सूक्ते विवस्वानदितेः सुतः ।
परेयिवांसं(१४)सूक्तस्य यमो वैवस्वतो मुनिः ॥६॥
उदीरतामुपक्रम्य पञ्चसूक्तान्यतः परम् ।
यमपुत्त्रा विदुस्तेषामु(१५)च्छङ्खो दमनश्च मा(१६) ॥७॥
एको देवश्रवास्त्वष्टा(१७)परः सङ्कुसुकः परम्(१८) ।
मथितस्तु नि वर्तध्व(१९) मस्मिन् सूक्ते मुनिः पुनः ॥८॥
भृगुर्वा वारुणिर्विद्याद्भार्गवश्च्यवनोऽथवा ।
भद्र(२०)मित्यादिसूक्तानां सप्तानां विमदो मुनिः ॥९॥

---

(क) आङ्गिरित्यत्र आङ्गिरस इति अनुक्रमणिकाविवरणम् ।

प्राजापत्यः स ऐन्द्रो वा वसुक्रद्वा वसुक्रजः ।
ऋषिर्वसुक्र ऐन्द्रीयस्त्रिषु सूक्तेष्वसत्स्वि(२७)ति ॥१०॥
तन्मध्यसूक्ते विश्वो हि(२८) प्रथमाया ऋचो मुनिः ।
इन्द्रस्नुषा वसुक्रस्य पत्न्येवेन्द्रो युजामृचाम् ॥११॥
चतुर्थ्या सह शिष्टानां वसुक्रस्त्वयुजामृचाम् ।
प्र देवत्रे(३०)ति सूक्तानां पञ्चानां कवषो मुनिः ॥१२॥
ऐलूषो मौजवान् वाचः प्रावेपा मे(३४)ति चोत्तरे ।
लुशो मुनिः स धानाकस्त्वबुध्र(३५)मितिसूक्तयोः ॥१३॥
नमो मित्रस्य(३७) सूक्तस्य सूर्य्यजोऽभितपा मुनिः ।
अस्मिन्न(३८)इति सूक्तस्य ऋषिरैन्द्र[क]स्तु मुष्कवान् ॥१४॥
यो वां परिज्मा(३९)सूक्तस्य रथ(४०)मित्युत्तरस्य च ।
कक्षीवतः सुता घोषा ऋषिकेत्यत्र कीर्त्तिता ॥१५॥
समानमु त्यं(४१)[ख] घौषेय' सुहस्त्यो नाम वा ऋषिः ।
अच्छेवे(४२)ति त्रिसूक्तानां कृष्ण आङ्गिरसो मुनिः ॥१६॥
दिवस्परि(४५)प्र होते(४६)ति सूक्तयोरनयोर्ऋषिः ।
भालन्दनस्तु वत्सप्रि[ग]र्जगृभ्मे(४७)त्युत्तरस्य तु ॥१७॥
सप्तगुर्नाम विज्ञेयो मुनिरङ्गिरसः सुत' ।
अहम्भुव(४८) मुपक्रम्य सूक्तानां त्रितयं प्रति ॥१८॥

---

(क) इन्द्र इति सर्व्वानुक्रमणी, अनुक्रमणिकाविवरणञ्च ।

(ख) समानमु त्ये इति घ० च० स० ।

(ग) वत्सप्रीरिति सर्व्वानुक्रमणी । वत्सः प्रिय इति अनुक्रमणिकाविवरणम् ।

ऋषिरिन्द्रस्तु वैकुण्ठो महत्त(५१)दिति तु त्रिषु ।
देवानामग्निना सार्कं संवादः क्रियतेऽत्र तु ॥१८॥
यमैच्छामे(५३)ति सूक्तेऽग्निन् देवा ऋषय उत्तरे ।
विश्वे देवा(५२)इति त्वग्निन् सौचीकोऽग्निस्त्वृषिः स्मृतः ॥२०॥
महत्त(५१)दिति पूर्वे तु देवा एवायुजाग्निषाम् ।
पुत्रो नमिः स सौचीकस्तदचे(७९,८०)ति तृचस्य च ॥२१॥
तां सु ते कीर्त्ति(५४)मित्यादिसूक्तानां त्रितयं प्रति ।
बृहदुक्थो वामदेव्य ऋषिरित्यवगम्यताम् ॥२२॥
मा प्र गामे(५७)त्युपक्रम्य चतुःसूक्तेष्वतः परम् ।
बन्ध्वाद्या(क) ऋषयो ज्ञेया गौपायनसुतास्त्रयः ॥२३॥
अगस्त्यस्य(ख) स्वसा मातामगस्त्ये(६०,६)त्यृचो मुनिः ।
इदमित्थे(६१)ति सूक्तस्य ये यज्ञेन(६२)त्यरस्य च ॥२४॥
नाभानेदिष्टनामायमृषिर्वैश्य स मानवः ॥२५॥
गयः प्लातो मुनिर्यः परावत(६३) इति द्वयोः ।
वासुक्रो वसुकर्णोऽस्याग्निरिन्द्र(६५) इति द्वयोः ॥२६॥
अयास्यनामाङ्गिरस इमां धिय(६७)मिति द्वयोः ।
वाध्र्यश्वस्तु सुमित्रोऽयं भद्रा अग्ने(६९)रिति द्वयोः ॥२७॥
बृहस्पतिस्त्वाङ्गिरसो बृहस्पत(७१) इति द्वयोः ।

(क) गौपायना लौपायना वा बन्धु सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्चेति चतुर्णां ऋषित्वं [illegible] [illegible] । [illegible] [illegible] [illegible] । * * * [illegible] [illegible] [illegible] ।
(ख) [illegible] [illegible] [illegible] [illegible] ।

अनयोरुत्तरे सूक्ते लोक्यो (क)वा म बृहस्पति ॥२८॥
अदितिर्वा दक्षपुत्री मुनिरित्यवगम्यताम् ।
ऋषि गाक्यो गोरिवीतिर्जनिष्ठा(७४) इति सूक्तयो ॥२९॥
सिन्धुक्षित्प्रैयमेधो(ख)ऽय प्र सु व (७५) सूक्त उत्तरे ।
ऐरावतो जरत्कर्ण आ व ऋञ्जस(७६) उत्तरे ॥३०॥
भृगुपुत्र स्यूमरश्मिरभ्रप्रुष(७७) इति द्वयो ।
अग्निर्वैश्वानरो वाथ स सौचीकोऽग्निरेव वा ॥३१॥
सप्तिर्वाजम्भरो वायमपश्य(७९)मिति सूक्तयो ।
भौवनो विश्वकर्माथ य इमे(८१)त्यादिसूक्तयो ॥३२॥
ऋषिस्तु तापसो मन्युर्यस्ते मन्य(८३)विति द्वयो ।
सत्येनोत्तभिता(८५)सूक्त सूर्या सावित्रीत्यार्षं तत् ॥३३॥
वि ही(८६)ति सूक्तमिन्द्राण्या इन्द्रस्य च वृषाकपे ।
वि हि सोतो (८६,१) (ग)कि सुबाह(८६,८) विन्द्राणी (८६,११)
नाह(८६,१२)मित्यृचां ॥३४॥
अयमेमी(८६,१६)ति चारभ्य तथा चतसृणामृचाम् ।
उक्ष्णो ही(८६,१४)त्यनया साक नवानामिन्द्र एव दृक् ॥३५॥
उवे अम्ब सुलाभिके(८६,७) वृषाकपायि रेवति(८६,१३) ।
पर्शुर्ह(८६,२३)ति तिसृणां च ऋषिरैन्द्रो वृषाकपि ॥३६॥
एकादशानां शिष्टानामिन्द्राणी सा पुलोमजा ।

(क) लौक्य इति सर्वानुक्रमणी ।
(ख) प्रयमेध इति सर्वानुक्रमणिकाविवरणम् ।
(ग) वि हि सोतो(८६,१)रित्यादिविषयकथन सर्वानुक्रमण्यनुक्रमणिकाविवरणयोर्न दृश्यते । बृहद्देवतायां तु यथायथमाख्यातम् ।

पायूरक्षोहणं(८७)(क) सूक्ते भरद्वाजसुतो मुनिः ॥३७॥
हविष्यान्तस्य(८८)(ख) सूक्तस्य मूर्द्धन्वान्नाम दर्शितः(ग) ।
अयन्त्वङ्गिरसः पुत्रो वामदेव्योऽथवा पुनः ॥३८॥
विश्वामित्रसुतो रेणुः सूक्तस्येन्द्रं स्तवे(८९)त्यृषिः ।
सहस्रशीर्षा(९०) सूक्तस्य ऋषिर्नारायणः स्मृतः ॥३९॥
सञ्जागृवद्भि(९१)रित्यस्मिन् वैतहव्योऽरुणो मुनिः ।
यज्ञस्ये(९२)त्यस्य सूक्तस्य शार्य्यातो नाम मानवः ॥४०॥
महि द्यावे(९३)ति सूक्तस्य पार्थ्य(घ)स्तान्व ऋषिः स्मृतः ।
प्रैते(९४) सूक्तस्य सर्पोऽयं काद्रवेयोऽर्बुदो मुनिः ॥४१॥
उर्व्वशी च हये(९५) सूक्ते मुनिरैलः पुरूरवाः ।
ऐलस्य वाक्यमेताः प्रथमाथ चतुर्दशी ॥४२॥
तृतीया द्वादशी षष्ठी सप्तदश्या सहेति षट् ।
सचा य(९५,८)दिति तिस्रश्च उर्व्वश्या उत्तरा नव ॥४३॥
प्र ते मह(९६) इति तस्य वरुरङ्गिरसः सुतः ।
ऐन्द्रः सर्व्वहरिर्वायमृषिरित्यवगम्यताम् ॥४४॥
या ओषधी(९७)(ङ)स्तु सूक्तस्य ऋषिराथर्व्वणो भिषक् ।
आर्ष्टिषेणस्तु देवापिर्मुनिः सूक्ते बृहस्पते(९८) ॥४५॥

---

(क) मोक्षमूलरसम्पादितऋग्वेदे सर्व्वानुक्रमण्यामनुक्रमणिकाविवरणे च रक्षोघ्नमिति पाठो वर्त्तते ।
(ख) मोक्षमूलरसम्पादितऋग्वेदे हविष्यान्तमिति पाठोऽस्ति ।
(ग) दर्शक इति पाठः सम्भवितुमर्हति ।
(घ) पार्थ इति सर्व्वानुक्रमणी ।
(ङ) ओषधीरिति म० भ० ।

भरद्वाजसुता रात्रिरथवा गन्धतामृषिः ।
ममाग्ने(१२८) इति सूक्तस्य विहव्योऽङ्गिरस सुतः ॥६४॥
नासद्(१२९)सूक्ते मुनिर्ज्ञेय परमेष्ठी प्रजापति ।
यो यज्ञ(१३०) सूक्ते(क) यज्ञस्तु प्राजापत्य ऋषि स्मृत ॥६५॥
काक्षीवत सुकीर्तिस्तु सूक्तेऽप प्राच(१३१) उत्तरे ।
ईजान(१३२) सूक्ते नार्मेध शकपूत ऋषि. स्मृत ॥६६॥
प्रो ष्वस्मा(१३३) इति सूक्तस्य सुदाः पैजवनो मुनि ।
यौवनाश्वस्तु मान्धाता सूक्तस्योभे य(१३४)दित्यृषि ॥६७॥
इहोत्तमामथार्द्धा(१३४,७) गोधा नारी ददर्श ह ।
यस्मिन्(१३५) सूक्ते कुमारोऽयमृषिर्यामायन स्वयम् ॥६८॥
मुनयो वातरशना एकर्चा सप्त केशिन(१३६) ।
जूतिश्च वातजूतिश्च विप्रजूतिर्वृषाणकः ॥६९॥
करिक्रतैतशौ च दारुष्यशृङ्गश्च सप्तम ।
उत(१३७) सूक्त सप्तर्षय(ख) एकचा एव ते विदु ॥७०॥
तव त्य(१३८) इति सूक्तस्य अङ्गस्तूपिदरो स्मृत ।
विश्वावसु सूर्य(१३९) सूक्ते मुनिर्गन्धर्व एव स ॥७१॥
अग्ने तवे(१४०)ति सूक्तस्य मुनिरग्निस्तु पावक ।
अग्ने अच्छे(१४१)ति सूक्तस्य मुनिरग्निस्तु तापस ॥७२॥
अय(१४२) सूक्ते द्रुणा शार्ङ्गा जरिता द्रोण उत्तर ।
मारिसृक्व स्तम्बमित्रश्च एते पक्षिणो विदु ॥७३॥

(क) यो यज्ञाद्धे इति प० प० आ० ।
(ख) भरद्वाजादय इम ७९९ ऋचोऽस्यमन्त्राः ।

र्यं चि(१४२)त्सूक्तस्य शार्ङ्गोऽग्निरय(१४४)मित्युत्तरस्य तु।
तार्क्ष्यपुत्रः सुपर्णो वा मुनिर्यामायनोऽथवा ॥७४॥
स ऊर्ध्वकृशनो ज्ञेय इन्द्राणीमां खनाम्यृ(१४५)षिः।
ऐरम्मदो देवमुनिररण्यान्यृ(१४६)षिः स्मृतः ॥७५॥
सुवेदा नाम शैरीषिः(क) श्रत्ते(१४७) सूक्ते मुनिः स्मृतः।
सुष्वाणास(१४८)स्तु सूक्तस्य वैन्यो नाम पृथुर्मुनिः ॥७६॥
सविता(१४९) सूक्तस्य चार्षन्(ख) हैरण्यस्तूप एव सः।
मृळीको नाम वासिष्ठः समिद्धश्चि(१५०)दित्यृषिः ॥७७॥
श्रद्धयाग्नि(१५१)रिति त्वस्य श्रद्धा कामायनी मुनिः।
भरद्वाजसुतः शासः शास इत्थे(१५२)त्यृषिः स्मृतः ॥७८॥
इन्द्रस्य मातरो याश्च ऋषयो देवजामयः।
ईङ्खयन्ती(१५३)रिति त्वस्य सोमो(१५४) वैवस्वती यमी ॥७९॥
अरायि(१५५) सूक्तेऽस्यर्षिर्भारद्वाजः शिरिम्बिठः(ग)।
अग्निं हिन्वन्तु नः(१५६) सूक्ते केतुरग्निसुतो मुनि ॥८०॥
इमा नु(१५७) भुवन आप्त्यः साधनो भौवनोऽथवा।
सूर्यो न(१५८) इति सूक्तस्य सौर्यश्चक्षुरृषिः स्मृतः ॥८१॥
उदसौ(१५९) त्वस्य पौलोमी शची नाम मुनिः स्मृता।
स्याभिवयस(१६०) सूक्तस्य वैश्वामित्रस्तु पूरणः ॥८२॥
प्राजापत्यस्तु मुञ्चामी(१६१)त्यस्य यक्ष्मनाशनः।

---

(क) शैनुर्विरिति ग० घ० ङ०। अनुक्रमणिकादावेवमेव।
(ख) चार्षन्त इति ग० घ० ङ०।
(ग) शिरिम्बिठ इति सर्वानुक्रमण्यां।

रक्षोहायग्नर्यिर्ब्राह्मो ब्रह्माग्नि(१६२)रमुष्य तु ॥८३॥
अचोभ्या(१६३)मिति सूक्तस्य काश्यपो विदहा मुनि ।
प्रचेतास्तु जगौ सूक्तमपेही(१६४)त्यङ्गिर सुत ॥८४॥
देवा' कपोत (१६५) सूक्तस्य कपोतो नैर्ऋतस्त्वृषि ।
ऋषभ मे(१६६)ति सूक्तस्य वैराज ऋषभो मुनि ॥८५॥
शाक्वरो वा स ऋषभस्त्वभ्येद(१६७)मिति तूत्तरे ।
विश्वामित्रजमदग्नी ऋषिर्गाथिनभार्गवौ ॥८६॥
वातायनो मुनि सूक्त वातस्ये(१६८)त्यनिलो जगौ ।
मयोभू (१६९) शवर सूक्त काचीवत ऋषिर्जगौ ॥८७॥
विभ्राट्(१७०)सूक्तमिद सौर्यो नाम्ना विभ्राडृषिर्जगौ ।
इटतो[क] भार्गव सूक्त त्वन्यमितरतो(१७१) जगौ ॥८८॥
चौश्युत्तराणि सूक्तानि विदुरङ्गिरसस्त्रय ।
आयाह्या(१७२)ला(१७३)भि(१७४)प्रवर्त्तो ध्रुवोऽभीवर्त्त इत्यमी॥८९॥
प्र वो ग्रावाण(१७५) इत्यस्मिन्नूर्ध्वग्रावार्बुदिर्मुनि ।
प्र सूनव(१७६) इति तस्य सूनुर्नामार्भवो मुनि ।९०॥
प्राजापत्य पतङ्गोऽय पतङ्ग(१७७) सूक्तमुक्तवान्।
अरिष्टनेमिस्तार्क्ष्योऽय जगौ सूक्त त्यमूष्वि(१७८)ति ॥९१॥
उत्तिष्ठते(१७९)ति चैकर्चा सूक्तमेतत्त्रयो विदु ।
शिबिरौशीनर पूर्व काशिराज प्रतर्दन ।९२॥
रौहिदश्वो वसुमना इत्येत ऋषय क्रमात् ।

---

(क) इटत इत्यत्र प्रथमायास्त्वमिक।

गोधा घोषा विश्ववारा पालोपनिषन्निषत् ।
ब्रह्मजाया जुहूर्नामा अगस्त्यस्य स्वसादितिः ॥१००॥
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी ।
लोपामुद्रा च नद्यश्च यमी नारी च शश्वती ॥१०१॥
श्रीर्लाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा ।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः ।
स गौतमो(क) वामदेवो यः खिलान्ता ऋषो जगौ ॥१०२॥

येर्वेदमन्त्राः सकलाः सुदृष्टा
येनार्षानुक्रमणी प्रदिष्टा ।
नमोऽस्तु तेभ्यो मुनिपुङ्गवेभ्यो
भवन्तु ते चापि मयि प्रसन्नाः ॥१०३॥

इति दशम मण्डलम् ॥

इति शौनकाचार्यकृतार्षानुक्रमणी समाप्ता ॥

---

(क) स गोतम इति ज० ।

# अथ छन्दोऽनुक्रमणी ।

## प्रथमं मण्डलम् ।

ऋग्वेदगतसूक्तानां सूक्तस्थानामृचामपि ।
यानि छन्दांसि विद्यन्ते तानि वक्ष्यामि सम्प्रति ॥१॥
गायत्रं नव सूक्तानि मधुच्छन्दस आदितः ।
आनुष्टुभे परे ज्ञेये दशमैकादशे उभे ॥२॥
मेधातिथेस्तु सूक्तेषु गायत्रेषूत्तरे त्विति ।
पुरउष्णिक्[क] परानुष्टुप्[ख][१] तिस्रश्चान्या[ग] अनुष्टुभः ॥३॥
शुनःशेपस्य सूक्तानि गायत्राण्येव तत्र तु ।
त्रिष्टुभौ प्रथमस्याद्ये[घ] षष्ठ्याद्या[ङ]श्च तथा दश ॥४॥
उत्तमा[च] च चतुर्थस्य षोडशी[छ] चोत्तमस्य या ।
षष्ठस्तु पाङ्क्त[ज]माद्यास्तु पञ्चमे षड्[झ]नुष्टुभः ॥५॥
ऋगस्माकं शिप्रिणीना[ञ]मेषा पादनिचृन्मता ।

(१) सर्वानुक्रमण्यामनुक्रमणिकाविवरणे च पाठस्यास्य एकविंशमक्ष-काया ऋचश्छन्दः प्रतिष्ठेत्युक्तम् ।

(क) सू० २३, ऋ० १९ । (ख) सू० २३, ऋ० २० । (ग) सू० २३, ऋ० २२, २३, २४ । (घ) सू० २४, ऋ० १, २ । (ङ) सू० २४, ऋ० ६, ७, ८, ९, १०, ११, १२, १३, १४, १५ । (च) सू० २७, ऋ० १३ । (छ) सू० ३०, ऋ० १६ । (ज) सू० २९ । (झ) सू० २८, ऋ० १, २, ३, ४, ५, ६ । (ञ) सू० ३०, ऋ० ११ ।

# अथ छन्दोऽनुक्रमणी ।

## प्रथमं मण्डलम् ।

ऋग्वेदगतसूक्तानां सूक्तस्थानामृचामपि ।
यानि छन्दांसि विद्यन्ते तानि वक्ष्यामि सम्प्रति ॥१॥
गायत्र नव सूक्तानि मधुच्छन्दस आदितः ।
आनुष्टुभे परे ज्ञेये दशमैकादशे उभे ॥२॥
मेधातिथेस्तु सूक्तेषु गायत्रेषूत्तरे त्विति ।
पुरउष्णिक्[क] परानुष्टुप्[ख](१)तिस्रश्चान्त्या[ग] अनुष्टुभः ॥३॥
शुनःशेपस्य सूक्तानि गायत्राण्येव तत्र तु ।
त्रिष्टुभौ प्रथमस्याद्ये[घ] षष्ठ्याद्या[ङ]श्च तथा दश ॥४॥
उत्तमा[च] च चतुर्थस्य षोडशी[छ] चोत्तमस्य या ।
षष्ठन्तु पाङ्क्त[ज]माद्यास्तु पञ्चमे षड्[झ]नुष्टुभः ॥५॥
ऋगस्माकं शिशिप्रीणा[ञ]मेषा पादनिचृन्मता ।

---

(१) सर्व्वानुक्रमण्यामनुक्रमणिकाविवरणे च सूक्तस्यास्य एकविंशसङ्ख्याकाया ऋचश्छन्द प्रतिष्ठेत्युक्तम् ।

---

(क) सू० २३, ऋ० १६ । (ख) सू० २३, ऋ० २० । (ग) सू० २३, ऋ० २२, २३, २४ । (घ) सू० २४, ऋ० १, २ । (ङ) सू० २४, ऋ० ६, ७, ८, ९, १०, ११, १२, १३, १४, १५ । (च) सू० २७, ऋ० १३ । (छ) सू० ३०, ऋ० १६ । (ज) सू० २९ । (झ) सू० २८, ऋ० १, २, ३, ४, ५, ६ । (ञ) सू० ३०, ऋ० ११ ।

हिरण्यस्तूपसूक्तानि त्रैष्टुभान्यथ तत्र तु ॥६॥
प्रथमस्य चतुर्थस्य जागते(क) प्रथमे तयोः ।
अष्टमी षोडशी चान्त्या(ख) त्रिष्टुभश्चरमे पुनः ॥७॥
अन्त्या च नवमी(ग) चापि त्रिष्टुभावेव गम्यताम् ।
उत्तमे तु जगत्याद्या(घ) नवमी(ङ) जगतीनिवृत् ॥८॥
कण्वस्य प्रथमं(च) सूक्तं चतुर्थं(छ) पञ्चमं(ज) च यत् ।
प्रस्कण्वस्य च तान्ये(झ)व प्रगाथा बार्हता द्वृचाः ॥९॥
प्रस्कण्वस्य द्वितीय(ञ)ञ्च षष्ठ(ट)ञ्चानुष्टुभे उभे ।
चतस्रश्चोत्तमस्यान्त्या(ठ) कण्वस्यानुष्टुबुत्तमा(ड) ॥१०॥
सर्वा गायत्र्य एवान्याः कण्वप्रस्कण्वयोर्द्वयोः ।
सव्यस्य सप्त सूक्तानि(ढ) जागतान्येव तत्र तु ॥११॥
प्रथमस्य तृतीयस्य द्वृचोऽन्त्य(ण)स्त्रैष्टुभः स्मृतः ।
त्वमाविथा(त)सम सत्र(थ) तुभ्येदेते(द) स श्रेष्ठम्(ध) ॥१२॥
त्वं भुव(न)स्त्रिष्टुभश्चैता आर्चन्नत्रे(प)त्र्यृचा सह ।

---

(क) सू० ३१, ३४। (ख) सू० ३१, ऋ० ८, १६, १८। (ग) सू० ३३, ऋ० ६, १२। (घ) सू० ३५, ऋ० १। (ङ) सू० ३५, ऋ० ९। (च) सू० ३६। (छ) सू० ३९। (ज) सू० ४०। (झ) सू० ४४, ४७, ४८। (ञ) सू० ४५। (ट) सू० ४९। (ठ) सू० ५०, ऋ० १०, ११, १२, १३। (ड) सू० ४३, ऋ० ९। (ढ) सू० ५१, ५२, ५३, ५४, ५५, ५६, ५७। (ण) सू० ५१, ऋ० १४, १५ सू० ५३, १०, ११। (त) सू० ५६, ऋ० ६। (थ) सू० ५४, ऋ० ८। (द) सू० ५७, ऋ० ९। (ध) सू० ५८, ऋ० ११। (न) सू० ५२, ऋ० १२। (प) सू० ५२, ऋ० १५।

त्रयोदशश्च[क] गायत्रं जागतं तदनन्तरम्[ख] ।
प्रस्तारपङ्क्तौ आद्यन्ते[ग] त्वा विद्युन्मद्भिरस्य तु ॥२०॥
त्रिष्टुभस्तु द्वितीयाद्या[घ] विराड्रूपा तु पञ्चमी[ङ] ।
षोडशं जागतं[च] त्वस्य द्वचान्त्य[छ]स्त्रैष्टुभः स्मृतः ॥२१॥
षष्ठी[ज]त्वेका विराट्स्थाना सा च स्वस्ति न इत्यसौ ।
ऋजुनीती[झ]ति गायत्र्यस्त्वस्यैकानुष्टुबुत्तमा[ञ] ॥२२॥
परापि[ट]त्रैष्टुभान्येव तत्रापि प्रथमे पुनः ।
त्वं सोमासी[ठ]ति गायत्र्यो द्वादशोष्णिक्ततः परा[ड] ॥२३॥
चतु[ढ]र्जगत्यः प्रथमा उपान्त्यान्त्याः[ण] षडुष्णिहः ।
उत्तमस्य तु सूक्तस्य तिस्रो[त]ऽनुष्टुभ आदितः ॥२४॥
नवमीप्रभृति[थ]स्तस्य गायत्रोऽस्य परस्तृचः ।
कुत्ससूक्तेषु गायत्रं चतुर्थं[द] त्रैष्टुभेष्वथ ॥२५॥
पाङ्क्तं द्वादशमं[ध] सूक्तमुद्धृत्यान्त्यान्तथाष्टमीम् ।
महापदत्यष्टमी[न] सा यवमध्या च योद्धृता ॥२६॥

---

(क) सू० ८६ । (ख) सू० ८७ । (ग) सू० ८८, ऋ० १, ६ । (घ) सू० ८८, ऋ० २, ३, ४ । (ङ) सू० ८८, ऋ० ५ । (च) सू० ८९ । (छ) ८९, ऋ० ८, ९, १० । (ज) सू० ८९, ऋ० ६ । (झ) सू० ९० । (ञ) सू० ९०, ऋ० ९ । (ट) सू० ९१, ९२, ९३ । (ठ) सू० ९१, ऋ० ५, ६, ७, ८, ९, १०, ११, १२, १३, १४, १५, १६ । (ड) सू० ९१, ऋ० १७ । (ढ) सू० ९१, ऋ० १, २, ३, ४ । (ण) सू० ९१, ऋ० १८, १९, २०, २१, २२, २३ । (त) सू० ९३, ऋ० १, २, ३ । (थ) सू० ९३, ऋ० ९, १०, ११ । (द) सू० ९७ । (ध, सू० १०५ । (न) सू० १०५, ऋ० ८ ।

प्रथम(क)श्चैकविंश(ख)श्च नवम(ग)श्चाष्टमं(घ) ततः ।
ऊर्ध्वं(ङ)श्च षोडश त्रीणि(च) सप्तमंश्च त्रयोदशम्(छ) ॥२७॥
एतानि आगतान्येषु प्रथमेऽन्त्यं तृचं(ज) विना ।
एकोनविंशे(झ) चैकविंशे(ञ) तथैवान्त्यं तृचं विना ॥२८॥
त्र्यृचं त्रयोदशे(ट) त्वन्त्यां नवमे(ठ)ऽष्टादशे(ड) विना ।
ततं से पञ्चमीं चान्त्या(ढ)मष्टमेऽन्त्यौ तृचौ(ण) विना ॥२९॥
कक्षीवतस्तु सूक्तेषु चतुर्थ(त) तस्य आगतम् ।
उपोत्तमस्य चर्चौ द्वे चतुर्थी पञ्चमी(थ) च या ॥३०॥
पञ्चमस्य तु गायत्र्यस्तिस्रोऽन्त्याः प्रथमा(द) च या ।
अनुष्टुभौ विराजौ वा नवमी चाष्टमी(ध) च या ॥३१॥
अनुष्टुप्सु चतुर्थी(न) च सप्तमी(प) बृहती विराट् ।
तृतीया पञ्चमी षष्ठी द्वितीया(फ) चोष्णिहाक्षरैः ॥३२॥
गायत्री वा द्वितीया(ब)स्य तृतीया(भ) नुष्टुमेव वा ।

---

(क) सू॰ ९४। (ख) सू॰ ११४। (ग) सू॰ १०२। (घ) सू॰ १०१। (ङ) सू॰ ११४। (च) सू॰ ११०, १११, ११९। (छ) सू॰ १०६। (ज) सू॰ ९४, ऋ॰ १५, १६। (झ) सू॰ ११३, ऋ॰ १९, २०। (ञ) सू॰ ११५, ऋ॰ १०, ११। (ट) सू॰ १०६, ऋ॰ ७। (ठ) सू॰ १०२, ऋ॰ ११। (ड) सू॰ १११, ऋ॰ ५। (ढ) सू॰ ११०, ऋ॰ ५, ९। (ण) सू॰ १०१, ऋ॰ ८, ९, १०, ११। (त) सू॰ ११९। (थ) सू॰ १२५, ऋ॰ ४, ५। (द) १२०, ऋ॰ १, १०, ११, १२। (ध) सू॰ १२, ऋ॰ ८, ९। (न) १२०, ऋ॰ ४। (प) सू॰ १२०, ऋ॰ ७। (फ) सू॰ १२०, ऋ॰ २, ३, ५, ६। (ब) सू॰ १२०, ऋ॰ २। (भ) सू॰ १२०, ऋ॰ ३।

सप्तमस्य विराड्रूपे सूत मे[क] आव[ख] इत्यृचौ ॥२३॥
उत्तमस्य तु सूक्तस्य द्वे वाय्यन्त्ये[ग] अनुष्टुभौ।
अवशिष्टानि सूक्तानि[घ] त्रैष्टुभान्यवगम्यताम् ॥२४॥
आत्यष्ट्यन्यथ सूक्तानि परुच्छेपस्य तत्र तु।
आद्यस्यातिधृति षष्ठी[ङ] सुषुमे[च]त्यतिशाक्करम् ॥२५॥
मह प्रभा व[छ] इत्यन्या तृतीया[ज]त्यष्टिरुत्तमा[झ]।
अष्टमस्यान्यया[ञ] साक नवमस्याप्युपोत्तमे[ट] ॥२६॥
चतुर्थस्योत्तमा[ठ] त्रिष्टुब्दशमस्यो[ड]त्तमस्य[ढ] च।
सप्तमस्यादितस्त्रिष्टुबेकस्या[ण]नुष्टुभस्तृच[त] ॥२७॥
गायत्री[थ] च धृति[द]श्चैव वृहत्यन्यस्य पञ्चमी[ध]।
द्वे सूक्ते दीर्घतमस प्रथमे[न] जागते तयोः ॥२८॥
पूर्वस्य दशमी[प] त्रिष्टुबथ चानुष्टुभ परम्[फ]।
षष्ठस्य जागत सूक्त चतुर्थं पञ्चम[ब] च यत् ॥२९॥

---

(क) सू० १२२, ऋ० ६। (ख) सू० १२२ ऋ० ५। (ग) सू० १२६, ऋ० ६, ७। (घ) सू० १६, १७, १८, २१, २३, २४, २५। (ङ) सू० १२७, ऋ० ६। (च) सू० १३०। (छ) सू० १२९, ऋ० ८, ९। (ज) सू० १२८, ऋ० ३। (झ) सू० १२८, ऋ० ११। (ञ) सू० १३४, ऋ० ६। (ट) सू० १३५, ऋ० ७ ८। (ठ) सू० १३०, ऋ० १०। (ड) सू० १३६, ऋ० ७। (ढ) सू० १३९, ऋ० ११। (ण) सू० १३३, ऋ० १। (त) सू० १३३ ऋ० २, ३ ४। (थ) सू० १३२ ऋ० ५। (द) सू० १३२, ऋ० ६। (ध) सू० १३९, ऋ० ५। (न) सू० १४०, १४१। (प) सू० १४०, ऋ० १०। (ब) सू० १४२। (फ) सू० १४३, १४४, १४५।

वैराजं दशमं[क]तस्मात्परे औष्णिह[ख]जागते[ग] ।
जागतानि तु सूक्तानि षोडशप्रभृतीनि षट्[घ] ॥४०॥
अनुष्टुबन्तादन्यानि वस्त्र रुद्रेति त्रैष्टुभात्[ङ] ।
त्रयोविंशस्य सूक्तस्य सह षष्ठ्या तृतीयया[च] ॥४१॥
अस्य वामीय सूक्तस्य जगत्यः षड़िमा ऋचः ।
पञ्चपादं[छ] साकं जानां[ज] यद्गायत्रे[झ]अयं स[ञ] च ॥४२॥
सप्तार्धगर्भा[ट] गौरी[ठ]श्च तस्यानुष्टुबुपोत्तमा[ड] ।
प्रस्तारपङ्क्तिस्तु विराड्द्वाचत्वारिंशक[ढ]श्च या ॥४३॥
अतोऽन्यत्त्रैष्टुभं सर्व्वं शिष्टमत्रावगम्यताम् ।
अत्र द्वित्रिष्टुबन्तानि प्रथमे द्वे[ण] अबोधि[त] च ॥४४॥
त्रिष्टुबन्तानि चैतानि जागतेषु प्रतव्यसीम्[थ] ।
तं इच्छन्त[द] किमु श्रेष्ठ[ध] इति चौष्यवगम्यताम् ॥४५॥
अगस्त्यस्य च सूक्तेषु गायत्रं सूक्तमष्टमम्[न] ।
द्वितीयं जागतं सूक्तं इच[प]मुद्धृत्य तूत्तमम् ॥४६॥
अष्टादशं[फ] चतुर्थं[ब]श्च द्वे एते जागते तयोः ।

---

(क) सू० १४९ । (ख) सू० १५० । (ग) सू० १५१ । (घ) सू० १५५, १५६, १५७, १५९, १६०, १६१ । (ङ) सू० १५८ । (च) सू० १६२, ऋ० ३, ६ । (छ) सू० १६४, ऋ० १२ । (ज) सू० १६४, ऋ० १५ । (झ) सू० १६४, ऋ० २३ । (ञ) सू० १६४, ऋ० २९ । (ट) सू० १६४, ऋ० ३६ । (ठ) १६४, ऋ० ४१ । (ड) सू० १६४, ऋ० ५१ । (ढ) सू० १६४, ऋ० ४२ । (ण) सू० १४०, ऋ० १२, १३ । सू० १४१, ऋ० १२, १३ । (त) सू० १४७, ऋ० ५, ६ । (थ) सू० १४३, ऋ० १ । (द) १४५, ऋ० १ । (ध) सू० १६१, ऋ० १ । (न) सू० १७२ । (प) सू० १६६, ऋ० १४, १५ । (फ) सू० १८२ । (ब) सू० १६८ ।

आद्यादुद्धृत्य पङ्क्त्यौ[क] चतुर्थ्याश्चोत्तम तृचम्[ख] ॥४७॥
षष्ठ[ग]मेकादश[घ]श्चास्य सूक्ते आनुष्टुभे परे ।
उभयोरुत्तमा[ङ] त्रिष्टुबाद्या[च] तु बृहती तयो ॥४८॥
एकादशो[छ]ऽस्य बृहती स्कन्धोग्रीवीति गम्यताम् ।
पञ्चमस्य तु सूक्तस्य द्वितीया[ज]भूरिग्विराट् स्मृता ॥४९॥
द्वादशस्योत्तमा[झ]त्रिष्टुप् शिष्टा सर्वा अनुष्टुभ ।
एका पञ्चदशे सूक्ते पञ्चमी[ञ] बृहतीनिचृत् ॥५०॥
त्रयोविंश[ट]न्तु गायत्र तस्योष्णिक् प्रथमा[ठ] तु ऋक् ।
अनुष्टुब्गर्भरूपोष्णिगथवैषा[ड]वगम्यताम् ॥५१॥
तृतीया पञ्चमी षष्ठी सप्तमी[ढ]ता अनुष्टुभ ।
अनुष्टुब्बृहती चान्या[ण] गायत्र सूक्तमुत्तरम[त] ॥५२॥
विज्ञेय उत्तमे सूक्ते दशमीप्रभृतित्रृच[थ] ।
आनुष्टुभ महापङ्क्ती मध्या च बृहती परा[द] ।
अवशिष्टानि सूक्तानि [ध]त्रैष्टुभान्यवगम्यताम् ॥१५३॥

इति प्रथम मण्डलम् ।

---

(क) सू० १८२, ऋ० ६, ८ । (ख) सू० १९८, ऋ० ८, ९, १० । (ग) सू० २०० । (घ) २०५ । (ङ) सू० २००, ऋ० ५, सू० २०५, ऋ० ६ । (च) सू० २००, ऋ० १ । २०५, १ । (छ) सू० २०५, ऋ० १ । (ज) सू० १६६, ऋ० २ । (झ) १७६ ऋ० ६ । (ञ) सू० १८६, ऋ० ५ । (ट) सू० १८७ । (ठ) सू० १८७, ऋ० १ । (ड) सू० १८७, ऋ० २ । (ढ) सू० १८७, ऋ० ३ ५, ६, ७ । (ण) सू० १८७, ऋ० ११ । (त) सू० १८८ । (थ) सू० १९१, ऋ० १०, ११, १२ । (द) सू० १९१, ऋ० १६ । (ध) सू० ६६, ६७, ६९, ७१, ७२, ७३, ७४, ७७, ७८, ७९, ८०, ८२, ८३, ८४, ८५, ८६, ८९, ९० ।

# अथ द्वितीयं मण्डलम् ।

सूक्तं गृत्समदस्याथ प्रथमे[क] आगते उभे ।
साध्वपांसी[ख]ति चर्चौ द्वे तृतीये त्रैष्टुभे सति ॥१॥
त्रैष्टुभानुष्टुभे त्वस्य चतुर्थं पञ्चमं[ग] च यत् ।
गायत्र[घ]माष्टमात्सर्वं तत्रैकानुष्टुबुत्तमा[ङ] ॥२॥
ऊर्ध्वं चत्वारि[च] षड्विंशादूर्ध्वंश्च द्वे[छ] त्रयोदशात् ।
त्रीणि[ज] सप्तदशादूर्ध्वमूर्ध्वं चत्वारि[झ] चाष्टमात् ॥३॥
सर्वाण्येतानि सूक्तानि त्रैष्टुभानि त्रयोदश ।
उत्तमस्योत्तमा[ञ]मेषामुद्धृत्य जगतीमृचम् ॥४॥
विश्वं सत्य[ट]मिति त्रिष्टुब्बृहस्पते अती[ठ]ति च ।
अतोऽन्यन्नागतं सूक्तं मागाते पित[ड]रित्यत: ॥५॥

---

(क) सू० १, २। (ख) सू० ३, ऋ० ६, ७। (ग) सू० ४, ५। (घ) सू० ६, ७, ८। (ङ) सू० ८, ऋ० ६। (च) सू० २६, २७, २८, २९। (छ) सू० १४, १५। (ज) सू० १८, १९, २०। (झ) सू० ९, १०, ११, १२। (ञ) सू० ४३, ऋ० ३। (ट) सू० २४, ऋ० १२। (ठ) सू० २३, ऋ० १५। (ड) सू० ३३।

अच्छा[क]दि सूक्तमुद्धृत्य द्वाविंश[ख]मतिशाकरम ।
अष्टिपञ्चपदावन्त्ये[ग] तृतीय.[घ] षोडशाचर: ॥६॥
सिनीवालि[ङ] याम्नवाङ्ग[च] यांगुङ्गूरि[छ]त्यनुष्टुभः ।
त्रैष्टुभस्य तु शेषस्य चतुर्थं[ज] पञ्चम[झ] च यत् ॥७॥
जागतानि द्वितीयस्य[ञ] द्वितीयाद्यन्तं उत्तमम्[ट][१] ।
गायत्रं नवमं[ठ] तस्य सारस्वत्या[ड]वनुष्टुभौ ॥८॥
इमा मह्ये[ढ]ति बृहती षोडृता[ण] शातिशक्करी ।
तदस्मै द्वित्रिष्टुबन्त[त] सूक्तं सप्तदशन्तु यत् ॥९॥
त्रयोदशं चतुस्त्रिंशमेकविंशं च षोड़शम् ।
एकविंशं त्रयोविंशं चतुर्विंशस्य सप्त तु ॥१०॥
एतानि[थ] त्रिष्टुबन्तानि गम्यतां जागतेष्वपि ॥२४०॥

इति द्वितीयं मण्डलम् ।

---

(१) पञ्चमोत्तर उत्तमे(द) इति पाठ सम्भवितुमर्हति ।

---

(क) सू॰ २२, ऋ॰ १ । (ख) सू॰ २२ । (ग) सू॰ २२, ऋ॰ ४ । (घ) सू॰ २२, ऋ॰ ३ । (ङ) सू॰ ३२, ऋ॰ ६ । (च) सू॰ ३२, ऋ॰ ७ । (छ) सू॰ ३२, ऋ॰ ८ । (ज) सू॰ २३, ३६ । (झ) सू॰ २४, ३७ । (ञ) सू॰ २१, ३४ । (ट) सू॰ २६ । (ठ) सू॰ ४१ । (ड) सू॰ ४१, ऋ॰ १६, १७ । (ढ) सू॰ ४१, ऋ॰ १८ । (ण) सू॰ ४३, ऋ॰ २ । (त) सू॰ १७, ऋ॰ ८, ९ । (थ) सू॰ १३, ऋ॰ १३, सू॰ ३४, ऋ॰ १५, सू॰ ३१, ऋ॰ ७, सू॰ १६, ऋ॰ ९, सू॰ २१, ऋ॰ ५; सू॰ २३, ऋ॰ १९, सू॰ २४, ऋ॰ १६ । (द) सू॰ २५, २६ ।

# अथ तृतीयं मण्डलम्।

द्वितीय[क]श्च तृतीय[ख]श्च विश्वामित्रस्य जागते ।
नवमं[ग] बार्हतं सूक्तं त्रिष्टुबस्योत्तमा[घ]न्निचृत् ॥१॥
औष्णिहं[ङ] द्वे च गायत्रे[च] बार्हतादुत्तराणि तु ।
षोडशे पङ्क्ते सूक्ते[छ] प्रगाथा बार्हता तृचाः ॥२॥
तुभ्यं स्तोका[ज]घृतवन्तः[झ] सप्तर्चन्तु त्र्योदशम्[ञ] ।
ये वृक्णास.[ट] पुरीष्यास.[ठ] उच्छ्रयस्वे[ड]त्यनुष्टुभः ॥३॥
त्रिष्टुबेव विराड्रूपा तुभ्यं स्रोतंत्यू[ढ]गत्र या ।
सतोबृहत्यौ तत्र द्वे ओजिष्ठन्ते[ण] दश क्षिपः[त] ॥४॥
अतोऽन्यत्त्रैष्टुभं सर्वमाग्निर्मथित[थ] इत्यतः ।
अनुष्टुभादिगायत्रं[द] वैराजं चोत्तरे[ध] ततः ॥५॥
उत्तरे[न] जागतं तस्य त्रिष्टुभस्तिस्र उत्तमाः[प] ।
गायत्रे उत्तरे सूक्ते[फ] तयोः पङ्क्त उत्तरे ॥६॥

---

(क) सू० २। (ख) सू० ३। (ग) सू० ९। (घ) सू० ९, ऋ० ९। (ङ) सू० १०। (च) सू० ११, १२। (छ) सू० १६। (ज) सू० २१, ऋ० १। (झ) सू० २१, ऋ० ०। (ञ) सू० १३। (ट) सू० ८, ऋ० ७। (ठ) सू० २२, ऋ० ४। (ड) सू० ८, ऋ० ०। (ढ) सू० २१, ऋ० ४। (ण) सू० २१, ऋ० ५। (त) सू० २३, ऋ० ३। (थ) सू० २३। (द) सू० २४। (ध) सू० २५। (न) सू० २६। (प) सू० २६, ऋ० ७, ८, ९। (फ) सू० २७, २८।

उष्णिक्त्रिष्टुब्जगत्येव[1] तृतीयामष्टलिद्वचः[क]।
अस्तौद्[ख]त्रैष्टुभं तस्य जगत्यौ द्वे उपोत्तमे[ग] ॥७॥
एकादशी[घ] च षष्ठी[ङ] च तावत्योऽन्या अनुष्टुभः।
प्रथमा च चतुर्थी च दशमी द्वादशी[च] च या ॥८॥
एता अनुष्टुभः सर्वा नदीस्तोत्रस्य चोत्तमा[छ]।
अतोऽन्यत्त्रैष्टुभं सर्वं यदिन्द्रं मति[ज]रित्यतः ॥९॥
अनुष्टुभ[झ]न्त्यमुद्धृत्य गायत्रं सूक्त[ञ]मष्टमम्।
गायत्राणि तु वै त्रीणि[ट] त्रैष्टुभ[ठ]न्द्वे [ड]च वार्हते ॥१०॥
षडु[ढ]त्तराणि सूक्तानि त्रैष्टुभान्युत्तरस्य तु।
जगत्यः प्रथमास्तिस्र[ण]स्तिस्रो गायत्र्य उत्तमाः[त] ॥११॥
गायत्रमुत्तमं[थ] तस्य षष्ठ्ये[द]का जगतीनिचृत्।
पञ्चमी[ध] चोत्तमे[न] च द्वे त्रिष्टुभस्त्रैष्टुभे परे[प] ॥१२॥
दशमी[फ] तु जगत्यस्य गायत्री च त्रयोदशी[ब]।

(क) सू० २८, ऋ० ३, ४, ५। (ख) सू० २९। (ग) सू० २९, ऋ० १४, १५। (घ) सू० २९, ऋ० ११। (ङ) सू० २९, ऋ० ६। (च) सू० २९, ऋ० १, ४, १०, १२। (छ) सू० ३३, ऋ० १३। (ज) सू० ३९। (झ) सू० ३७, ऋ० ११। (ञ) सू० ३७। (ट) सू० ४०, ४१, ४२। (ठ) सू० ४३। (ड) सू० ४४, ४५। (ढ) सू० ४६, ४७, ४८, ४९, ५०, ५१। (ण) सू० ५१, ऋ० १, २, ३। (त) सू० ५१, ऋ० १०, ११, १२। (थ) सू० ५२। (द) सू० ५२, ऋ० ६। (ध) सू० ५२, ऋ० ५। (न) सू० ५२ ऋ० ७, ८। (प) सू० ५३। (फ) सू० ५३, ऋ० १०। (ब) सू० ५३, ऋ० १३।

(१) एवेति पाठो भवितुमर्हति।

अनुष्टुभस्तु विंशी च द्वाविंशी द्वादशी[क] च या ॥१३॥
अष्टादशी[ख] बृहत्यश्च जगत्येव तु षोडशी[ग]।
इमं महे उपक्रम्य त्रैष्टुभान्युत्तराणि षट्[घ] ॥१४॥
तेषां षष्ठे चतस्रस्तु मैत्रे गायत्र्य उत्तमाः[ङ]।
जागत[च]त्रैष्टुभे[छ] सूक्ते सप्तर्चे द्वे उपोत्तमे।
गायत्रमुत्तमं[ज] तस्य त्रिष्टुभस्तिस्र[झ] आदितः ॥१५॥

इति तृतीयं मण्डलम्।

---

(क) सू० ५३, ऋ० १९, २०, २०। (ख) सू० ५३, ऋ० १८। (ग) सू० ५३, ऋ० १६। (घ) सू० ५४, ५५, ५६, ५७, ५८, ५९। (ङ) सू० ५९, ऋ० ६, ७, ८, ९। (च) सू० ६०। (छ) सू० ६१। (ज) सू० ६२। (झ) सू० ६२, ऋ० १, २, ३।

चतुर्थस्योत्तमा[क]मेकामृचमुद्धृत्य चोभयोः ।
प्रथमा[ख] मृचमुद्धृत्य अष्टमस्यापि जागतम् ॥७॥
अनुष्टुप्सप्तमस्यान्त्या[ग] चतस्रोऽन्या[घ]श्च पञ्चमे ।
पञ्चमस्यानुवाकस्य मध्ये गायत्रयोर्द्वयोः[ङ] ॥८॥
द्वितीयश्च[च] तृतीयश्च[छ] सूक्ते आनुष्टुभे उभे ।
गायत्रं सप्तमं[ज] सूक्तं जागते नवमाष्टमे[झ] ॥९॥
नवमस्य तु ये ते त्रिरित्यन्या[ञ] मृचं विना ।
जगत्येवोत्तमस्यान्या[ट]दशमी[ठ] पञ्चमस्य तु ॥१०॥
एकादशस्य गायत्र्यस्तृचोऽन्यो[ड]दशमस्य च ।
द्वादशे तु द्वितीया च तृतीया चोत्तमा[ढ] च या ।
आनुष्टुभे त्रिष्टुभस्ताः पुरउष्णिक् च पञ्चमी[ण] ॥११॥

इति चतुर्थं मण्डलम् ।

---

(क) सू॰ ३६, ऋ॰ ९ ; सू॰ ४५, ऋ॰ ७ । (ख) सू॰ ४०, ऋ॰ १ । (ग) सू॰ ३८, ऋ॰ ६ । (घ) सू॰ ३७, ऋ॰ ५, ६, ७, ८ । (ङ) सू॰ ४६, ४९ । (च) सू॰ ४७ । (छ) सू॰ ४८ । (ज) सू॰ ५२ । (झ) सू॰ ५३, ५४ । (ञ) सू॰ ५४, ऋ॰ ६ । (ट) सू॰ ५८, ऋ॰ ११ । (ठ) सू॰ ५०, ऋ॰ १० । (ड) सू॰ ५५, ऋ॰ ८, ९, १० ; सू॰ ५६, ऋ॰ ५, ६, ७ । (ढ) सू॰ ५७, ऋ॰ २, ३, ८ । (ण) सू॰ ५०, ऋ॰ ५ ।

# अथ चतुर्थं मण्डलम्।

प्रथमा(क) त्रैष्टुभेष्वग्निर्वामदेवस्य षट्पदा।
द्वितीया(ख) त्रिजगत्यस्य तृतीया(ग)स्यां निचृद्धृतिः ॥१॥
सप्तमस्य तु सूक्तस्य प्रथमा(घ) जगतीनिचृत्।
अनुष्टुभः पराः पञ्च प्राक्(ङ) समस्य यदि(च)त्यतः ॥२॥
गायत्रे दशमे सूक्ते भुरिजः पदपङ्क्तय(छ)।
उष्णिहो वा विराजस्ता(ज) पञ्चम्या(झ)सामनुष्टुपा ॥३॥
य इमे च महापूर्वा पदपङ्क्तिर्निगद्यते।
अग्निर्होते(ञ)ति गायत्रं नवमं चाष्टमं(ट) च यत् ॥४॥
अयं चक्र(ठ)मथ श्वेत(ड) प्रकर्ष्यावस्य ते उभे।
गायत्राणि तु वै त्रीणि(ढ) न किरिन्द्रेति तत्र तु ॥५॥
वामं वामन्ते(ण) क इम(त)मेतद्वे(थ)दित्यनुष्टुभः।
चतुर्थस्यानुवाकस्य जागतं सूक्तमुत्तमम्(द) ॥६॥

---

(क) सू० १, ऋ० १। (ख) सू० १, ऋ० २। (ग) सू० १, ऋ० ३। (घ) सू० ७, ऋ० १। (ङ) सू० ७, ऋ० २, ३, ४, ५, ६। (च) सू० ७, ऋ० ७। (छ) सू० १०, ऋ० १, २, ३। (ज) सू० १० ऋ० ४, ६, ७, ८। (झ) सू० १०, ऋ० ५। (ञ) सू० १५। (ट) सू० ८, ९। (ठ) सू० १७, ऋ० १४। (ड) सू० २७, ऋ० ५। (ढ) सू० ३०, ३१, ३२। (ण) सू० ३०, ऋ० २४। (त) सू० २४, ऋ० १०। (थ) सू० ३० ऋ० ८। (द) सू० ४५।

## अथ पञ्चमं मण्डलम् ।

आनुष्टुभानां सूक्तानां पङ्क्तिरन्या[क] त्रिमण्डले ।
उरौष्ट[ख] इन्द्र[ग]कृष्णो[घ]ऽच्छ[ङ]बलित्या दे[च]यदद्य[छ] च ॥१॥
विदा[ज]आचिकितानेऽ[झ]ति सूक्तान्येतान्यपास्य तु ।
अत्रौणा पञ्चम[ञ] सूक्त गायत्र पाङ्क्तमुत्तर[ट] ॥२॥
आनुष्टुभं सप्तम[ठ]न्तु जागत सूक्तमष्टम[ड] ।
नवम दशम[ढ]ञ्चैषा सूक्ते आनुष्टुभे तयोः ॥३॥
पूर्वस्य पञ्चमौ[ण]पङ्क्तिश्चतुर्थौ[त] चरमस्य च ।
अतोऽन्यत्त्रैष्टुभं सर्वमाश्वेधक[थ]इत्यत. ॥४॥
उद्वृत्योपोत्तमे सूक्ते गायत्र्येऽर्चन्त इत्युभे[द] ।
प्रकरोच्च चतुर्विंशौ जनस्ये[ध]ति च जागतं ॥५॥
अष्टौ पराणि सूक्तानि[न] ज्ञेयान्यानुष्टुभान्यतः ।
चतुर्थेऽन्या[प]विराड्रूपा आद्ये[फ]गायत्र्यो त्विह ॥६॥

---

(क) सू० ७, १६, १७, १८, २०, २१, २२, २६, ६९ । (ख) सू० ३८ । (ग) सू० ३१ । (घ) सू० ७४ । (ङ) सू० २५ । (च) सू० ६०, ८४ । (छ) सू० ८२ । (ज) सू० ४५ । (झ) सू० ६६ । (ञ) सू० ५ । (ट) सू० ६ । (ठ) सू० ७ । (ड) सू० ८ । (ढ) सू० ९, १० । (ण) सू० ९, ऋ० ५ । (त) सू० १०, ऋ० ४ । (थ) सू० १५ । (द) सू० १३, १४ । (ध) सू० ११ । (न) सू० १६, १७, १८, १९, २०, २१, २५, २३ । (प) सू० १९, ऋ० ५ । (फ) सू० १९, ऋ० १, २ ।

द्वैपदा(क)नुष्टुभे(ख) च द्वे गायत्रं तत उत्तरं(ग) ।
त्रैष्टुभा(घ)नुष्टुभौ(ङ)सूक्ते परे पूर्वापरौ तृचौ ॥७॥
अनुष्टुब्(च)द्वे च गायत्र्यौ(छ) उत्तरस्योत्तरस्तृचः ।
त्रिष्टुबेका(ज)जगत्येका(झ)त्रिष्टुबेका(ञ)द्वितस्तृचः॥८॥
त्रैष्टुभान्येव(ट) पञ्चोर्ध्वं परन्तेभ्यस्तु जागतं(ठ) ।
एतत्तु त्रिष्टुबन्त(ड)ञ्च यत्तु(ढ)आनुष्टुभं परं ॥९॥
स आगमत्त्रैष्टुभे द्वे(ण) द्वे(त) एवानुष्टुभे उरोः ।
स आगमदिति तस्य तृतीया(थ) जगती स्मृता ॥१०॥
उत्तराणि तु सूक्तानि(द) चत्वारि त्रैष्टुभान्यतः ।
तेषामेकातिजगती द्वितीयस्यास्ति पोलगी(ध) ॥११॥
प्रथमस्य नवर्चस्य प्रथमा(न)स्तिस्र उष्णिहः ।
अभि न इले(प)तिविधु(फ)मेष स्तोमो(ब)दृहद्दयः(भ) ॥१२॥
एता एतेषु सकर्ष्या यं वै(म)यत्ते(य)त्यनुष्टुभे ।

---

(क) सू० २४ । (ख) सू० २५ । (ग) सू० २६ । (घ) सू० २७, ऋ० १, २, ३ । (ङ) सू० २७ ऋ० ४, ५, ६ । (च) सू० २८, ऋ० ४ । (छ) सू० २८, ऋ० ५, ६ । (ज) सू० २८, ऋ० १ । (झ) सू० २८, ऋ० २ । (ञ) सू० २८, ऋ० ३ । (ट) सू० २९, ३०, ३१, ३२, ३३ । (ठ) सू० ३४ । (ड) सू० ३४, ऋ० ९ । (ढ) सू० ३५ । (ण) सू० ३६, ३७ । (त) सू० ३८, ३९ । (थ) सू० ३६, ऋ० ३ । (द) सू० ४०, ४१, ४२, ४३ । (ध) सू० ४१, ऋ० १६ । (न) सू० ४०, ऋ० १, २, ३ । (प) सू० ४१, ऋ० १९ । (फ) सू० ४१, ऋ० १० । (ब) सू० ४२, ऋ० १६ । (भ) सू० ४३, ऋ० १५ । (म) सू० ४०, ऋ० ९ । (य) सू० ४०, ऋ० ५ ।

द्वैपदा[क]नुष्टुभे[ख] च द्वे गायत्रं तत उत्तरं[ग] ।
त्रैष्टुभा[घ]नुष्टुभौ[ङ]सूक्ते परे पूर्वापरौ तृचौ ॥७॥
अनुष्टुब्[च]द्वे च गायत्र्यौ[छ] उत्तरस्योत्तरस्तृचः ।
त्रिष्टुबेका[ज]जगत्येका[झ]त्रिष्टुबेका[ञ]द्वितस्तृचः ॥८॥
त्रैष्टुभान्येव[ट] पञ्चोर्ध्वं परन्त्वेभ्यस्तु जागतं[ठ] ।
एतत्तु त्रिष्टुबन्त[ड]ञ्च यत्त[ढ]दानुष्टुभं परं ॥९॥
स आगमत्त्रैष्टुभे द्वे[ण] द्वे[त] एवानुष्टुभे उरोः ।
स आगमदिति तस्य तृतीया[थ] जगती स्मृता ॥१०॥
उत्तराणि तु सूक्तानि[द] चत्वारि त्रैष्टुभान्यतः ।
तेषामेकातिजगती द्वितीयस्यास्ति योऽन्तगो[ध] ॥११॥
प्रथमस्य नवर्चस्य प्रथमा[न]स्तिस्र उष्णिहः ।
अभि न इळे[प]तित्विषु[फ]प्रेष स्तोमो[ब]वृहद्वयः[भ] ॥१२॥
एता एतेषु प्रकर्ष्या यं वै[म]यत्ते[य]त्यनुष्टुभे ।

---

(क) सू० २४ । (ख) सू० २५ । (ग) सू० २६ । (घ) सू० २७, ऋ० १, २, ३ । (ङ) सू० २७ ऋ० ४, ५, ६ । (च) सू० २८, ऋ० ४ । (छ) सू० २८, ऋ० ५, ६ । (ज) सू० २८, ऋ० १ । (झ) सू० २८, ऋ० २ । (ञ) सू० २८, ऋ० ३ । (ट) सू० २९, ३०, ३१, ३२, ३३ । (ठ) सू० ३४ । (ड) सू० ३४, ऋ० ९ । (ढ) सू० ३५ । (ण) सू० ३६, ३७ । (त) सू० ३८, ३९ । (थ) सू० ३६, ऋ० ३ । (द) सू० ४०, ४१, ४२, ४३ । (ध) सू० ४१, ऋ० १६ । (न) सू० ४०, ऋ० १, २, ३ । (प) सू० ४१, ऋ० १९ । (फ) सू० ४१, ऋ० १० । (ब) सू० ४२, ऋ० १६ । (भ) सू० ४३, ऋ० १५ । (म) सू० ४०, ऋ० ९ । (य) सू० ४०, ऋ० ५ ।

जागत[क]स्त्रैष्टुभा[ख]न्येव व्यत्यसात्युत्तराणि षट् ॥१३॥
तत्राद्य द्विस्त्रिष्टुब[ग]न्तं सूक्तं न प्रलपेत्यदः ।
त्रिष्टुबन्त्या[घ] तृतीयस्याप्यत्र मार्कं द्वितीयया[ङ] ॥१४॥
विद्य[च] आनुष्टुभं सूक्तं तेभ्य पञ्चर्चमुत्तर[छ] ।
आद्या[ज]स्तिस्रो गायत्र्य उत्तरस्त्रोष्णिहश्च षट्[झ] ॥१५॥
त्रिष्टुभस्तु जगत्यौ वा तिस्र[ञ]श्चान्ये[ट] अनुष्टुभौ ।
उद्धृत्य षोलशीं पङ्क्तिं पष्ठी[ठ]मानुष्टुभं पर ॥१६॥
को वेदसूक्ते गायत्र्या चाष्टमी द्वादशी[ड] च या ।
तृतीया[ढ] नुष्टुबेवास्य द्वितीया[ण] बृहती निचृत् ॥१७॥
पञ्चमीपञ्चदश्यादौ[त]प्रगाथौ काकुभौ तृचौ ।
ककुभ प्रथमा यास्य दशम्येकादशी[थ] च या ॥१८॥
शिष्टा' सतोबृहत्योऽन्या[द] चतुर्थ्यां[ध] पुरउष्णिह ।
चतुर्थस्यानुवाकस्य जागते द्वे उपोत्तमे[न] ॥१९॥
उपान्त्या[प] प्रथमे त्रिष्टुबुत्तमा तुत्तरे[फ]तयो ।

---

(क) सू० ४४, ४६, ४८। (ख) सू० ४५, ४७, ४९। (ग) सू० ४४ ऋ० १४, १५। (घ) सू० ४६ ऋ० ८। (ङ) सू० ४६, ऋ० २। (च) सू० ५०। (छ) सू० ५०, ऋ० ५। (ज) सू० ५१, ऋ० १, २, ३, ४। (झ) सू० ५१, ऋ० ५, ६, ७, ८, ९, १०। (ञ) सू० ५१, ऋ० ११, १२, १३। (ट) सू० ५१, ऋ० १४, १५। (ठ) सू० ५२, ऋ० ६ १६। (ड) सू० ५२, ऋ० ८, १२। (ढ) सू० ५३, ऋ० ३। (ण) सू० ५३, ऋ० २। (त) सू० ५३, ऋ० ५, ६, १५, १६। (थ) सू० ५३, ऋ० १, १०, ११। (द) सू० ५३, ऋ० ७, ९, १३, १४। (ध) सू० ५३, ऋ० ४। (न) सू० ५४, ५५। (प) सू० ५४, ऋ० १४। (फ) सू० ५५, ऋ० १०।

उत्तम[क] बार्हतं तस्य प्रगाथौ बार्हतौ तृचौ ॥२०॥
द्वितीयाप्रभृतिः[ख]पूर्वः षष्ठीप्रभृति[ग]रुत्तरः ।
उत्तराणि तु चत्वारि [घ]व्यत्यस्तानि यथैव षट् ॥२१॥
द्वित्रिष्टुबन्त्यं[ङ] तत्राद्यं द्विजगत्य[च]न्त्यमुत्तमम् ।
यदुत्तरं[छ] मध्यमयोस्तत्रापि त्रिष्टुबुत्तमा ॥२२॥
सूक्तं केष्ठे[ज]ति गायत्रमनुष्टुप्तस्य पञ्चमी[झ] ।
एका सतोबृहत्यस्य नवमी[ञ]त्रैष्टुभं परम्[ट] ॥२३॥
ऋतस्य[ठ] जागतं सूक्तं चत्वार्य्या[ड]नुष्टुभान्यथ ।
गायत्रं[ढ] त्रैष्टुभं[ण] च द्वे गायत्रे[त] चैक[थ]मौष्णिहम् ॥२४॥
आनुष्टुभे[द]च पाङ्क्तं[ध] च त्रैष्टुभे चोत्तरे[न] ततः ।
एक[प]मानुष्टुभं तस्य प्रथमा[फ]स्तिस्र उष्णिहः ॥२५॥
अग्निर्यद्दा[ब]मिति त्रिष्टुबुपा त्वत्र प्रतीयताम् ।
सप्तोत्तराणि सूक्तानि पाङ्क्तं[भ] त्रैष्टुभ[म]जागते[य] ॥२६॥

---

(क) सू० ५६ । (ख) सू० ५६, ऋ० २, ३ । (ग) सू० ऋ० ५६, ६, ७ । (घ) सू० ५७, ५८, ५९, ६० । (ङ) सू० ५७, ऋ० ७, ८ । (च) सू० ६०, ऋ० ७, ८ । (छ) सू० ५९, ऋ० ८ । (ज) सू० ६१ । (झ) सू० ६१, ऋ० ५ । (ञ) सू० ६१, ऋ० ९ । (ट) सू० ६२ । (ठ) सू० ६३ । (ड) सू० ६४, ६५, ६६, ६७ । (ढ) सू० ६८ । (ण) सू० ६९ । (त) सू० ७०, ७१ । (थ) सू० ७२ । (द) सू० ७३, ७४ । (ध) सू० ७५ । (न) सू० ७६, ७७ । (प) सू० ७८ । (फ) सू० ७८, ऋ० १, २, ३ । (ब) सू० ७८, ऋ० ४ । (भ) सू० ७९ । (म) सू० ८० । (य) सू० ८१ ।

गायत्रं(क) त्रैष्टुभे (ख)च द्वे मध्ये चानुष्टुभं(ग) तयोः ।
जागतोऽच्छावदेत्यस्मिन्विद्धा(घ)निति यस्तृचः ॥२७॥
तत्सवितुर्वृणीमहे(ङ) यत्पर्जन्ये(च)त्यनुष्टुभौ ।
उपोत्तमस्य सूक्तस्य विराट्पूर्वा त्वृगुत्तमा(छ) ॥२८॥
शिष्टा अनुष्टुभः सर्वा अतिजागतमुत्तमम्(ज) ।

इति पञ्चमं मण्डलम् ।

---

(क) सू० ८२। (ख) सू० ८३, ८५। (ग) सू० ८४। (घ) सू० ८३, ऋ० २, ३, ४। (ङ) सू० ८२, ऋ० १। (च) सू० ८३, ऋ० ६। (छ) सू० ८६, ऋ० ६। (ज) सू० ८७।

# अथ षष्ठं मण्डलम्।

त्रैष्टुभेष्वष्टमं सूक्तं भरद्वाजस्य जागतम्।
अद्येभिस्तवे(क) त्येतामृचमुद्धृत्य तूत्तमाम् ॥१॥
सप्तमं(ख) द्विजगत्यन्तं त्वं शतानीति शक्वरी(ग)।
चतुर्दशं द्वितीयञ्च सूक्ते आनुष्टुभे उभे ॥२॥
अच्छा नो(घ)ऽभिप्रयांसी(ङ)ति शक्वर्यावेव ते उभे।
जगत्यौ(च)शक्वरी निचृज्जगत्या(छ)वतिशक्वरी(ज) ॥३॥
एतौ पञ्चदशश्च द्वौ जागतश्चादितस्तृचः।
अनुष्टुप्सप्तदश्य(झ)स्य बृहत्यष्टादशी(ञ)निचृत् ॥४॥
षट्चत्वारिंश्य(ट)य त्रिष्टुप् गायत्रे सति षोडशे।
सप्तविंश्युत्तमे च द्वे तिस्र एता अनुष्टुभः(ठ) ॥५॥
आगाथा वर्धमाना(ड)स्य षष्ठी चापि प्रतीयताम्।
एका सप्तदशस्यास्या(ढ) द्विपदा दशमस्य(ण) च ॥६॥

(क) सू० ८, ऋ० ७। (ख) सू० ७, ऋ० ६, ७। (ग) सू० २, ऋ० ११। (घ) सू० १४, ऋ० ६। (ङ) सू० १५, ऋ० १५। (च) सू० १५, ऋ० १, २। (छ) सू० १५, ऋ० ३। (ज) सू० १५, ऋ० ६। (झ) सू० १५, ऋ० १७। (ञ) सू० १५, ऋ० १८। (ट) सू० १६, ऋ० ४६। (ठ) सू० १६, ऋ० २७, ४७, ४८। (ड) सू० १६, ऋ० १, ६। (ढ) सू० १७, ऋ० १५। (ण) सू० १०, ऋ० ७।

द्यौर्न सूक्त गता या तृविपिप्रो[क] रिति सा विराट् ।
आ गाव इति सूक्तस्य द्वितीयाप्रभृतिस्तृच ॥७॥
जागत[ख]स्त्रैष्टुभस्त्वास्य तथैवानुष्टुबुत्तमा[ग] ।
आनुष्टुभ[घ] बृहत्यन्त[ङ] प्रत्यञ्चा इति सूक्तत ॥८॥
षष्ठी[च]स्त्रिष्टुप् पर यत्तु तस्यादौ पङ्नुष्टुभ[छ] ।
विराज[ज]स्तूत्तरास्तिस्रस्तासां मध्येव वा विराट्[झ] ।९॥
य आनयदिति त्वस्मिन् गायत्र्यनुष्टुबुत्तमा[ञ] ।
पुरुतम[ट]मिति त्वेषा तत्रैवातिनिचृन्मता ॥१०॥
त्वामिद्धिसूक्ते प्रागाथे प्रगाथा बार्हता[ठ]स्तृचा ।
स्वादुष्किलेति सूक्तस्य जगती सप्तविंश्य[ड]प ॥११॥
चतुर्विंशी[ढ] तु गायत्री त्रयोविंशी[ण]त्यनुष्टुबृक् ।
ऊनविंशी[त] बृहत्यस्य गायत्र्या द्विपदोत्तरा[थ] ॥१२॥
स्तुषे जनमिति त्वस्य शक्वर्येकोत्तमा[द] निचृत् ।
आदित्य पृश्निसूक्तस्य प्रगाथौ बार्हतौ[ध] तृचौ ॥१३॥

---

(क) सू० २०, ऋ० ७। (ख) सू० २८, ऋ० १, २, ३। (ग) सू० २८ ऋ० ८। (घ) सू० ४२, ऋ० १, २, ३। (ङ) सू० ४२, ऋ० ४। (च) सू० ४३। (छ) सू० ४४, ऋ० १ २, ३ ४, ५, ६। (ज) सू० ४४, ऋ० ७, ८, ९। (झ) सू० ४४ ऋ० ८। (ञ) सू० ४५, ऋ० ३३। (ट) सू० ४५ ऋ० ३९। (ठ) सू० ४६, ऋ० ६, ७। (ड) सू० ४७, ऋ० २७। (ढ) सू० ४७, ऋ० २४। (ण) सू० ४७, ऋ० २३। (त) सू० ४७, ऋ० १९। (थ) सू० ४७ ऋ० २५। (द) सू० ४९, ऋ० १५। (ध) सू० ४८, ऋ० १, २।

बृहती(क) जगती(ख) त्रिष्टु(ग)ब्जगती(घ) चोत्तरा ऋचः।
उत्तरौ च प्रगाथौ द्वौ तृचौ बार्हत(ङ)काकुभौ(च) ॥१४॥
अष्टादशीत्रयोदश्योरन्तरा(छ)पुरउष्णिहः।
बृहत्य(ज)तिजगत्यौ(झ) च प्रगाथश्चैव काकुभः(ञ) ॥१५॥
द्वे बृहत्यौ(ट) त्रिष्टुबे(ठ)कानुष्टुब(ड)थोत्तरा ऋचः।
महासतोबृहत्यौ(ढ) च महा च बृहतीदयम्(ण) ॥१६॥
जगती(त)त्रिष्टुबि(थ)त्याभ्यां शब्दाभ्यामत्र दृश्यते।
पञ्चमस्यानुवाकस्य दशमस्तृच औष्णिहः(द) ॥१७॥
तृतीयस्य तु गायत्र्यो विश्वेदेवास ए(ध)ति षट्।
गायत्रं(न) पञ्च सूक्तानि चतुर्थप्रभृतीन्यथ ॥१८॥
विश्वेदेवासमस्मा(प)आप्यो जगत्यावेव(फ) ते उभे।
आ ते स्वस्ति(ब)मपि पन्था(भ) यां पूष(म)न्नित्यनुष्टुभः ॥१९॥

---

(क) सू० ४८, ऋ० १। (ख) सू० ४८, ऋ० ३। (ग) सू० ४८, ऋ० ५। (घ) सू० ४८, ऋ० ६। (ङ) सू० ४८, ऋ० १०। (च) सू० ४८, ऋ० ११। (छ) सू० ४८, ऋ० १३, १८। (ज) सू० ४८, ऋ० १४। (झ) सू० ४८, ऋ० १५। (ञ) सू० ४८, ऋ० १६। (ट) सू० ४८, ऋ० १९, २०। (ठ) सू० ४८, ऋ० २१। (ड) सू० ४८, ऋ० २२। (ढ) सू० ४८, ऋ० ६, ८। (ण) सू० ४८, ऋ० ७, २१। (त) सू० ४९, ऋ० १५। (थ) सू० ४९, ऋ० १, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२, १३, १४। (द) सू० ५१, ऋ० १३, १४, १५। (ध) सू० ५२, ऋ० ७, ८, ९, १०, ११, १२,। (न) सू० ५३, ५४, ५५, ५६, ५७। (प) सू० ५२, ऋ० १४। (फ) सू० ५८, ऋ० २। (ब) सू० ५९, ऋ० ६। (भ) सू० ५१, ऋ० १६। (म) सू० ५३, ऋ० ८।

बार्हतं दशमं[क] तस्य चतस्रोऽन्या अनुष्टुभः[ख] ।
त्रिष्टु[ग]ब्बृहत्य[घ]नुष्टुप्[ङ] च परस्य तृच उत्तमः ॥२०॥
गायत्रस्य ततोऽन्यास्तु त्रिष्टुभस्तिस्र[च] आदितः ।
गायत्रमुत्तमं[छ] सूक्तं त्रिष्टुभ[ज]श्चोत्तमा निचृत् ॥२१॥
जगत्यः प्रथमास्तिस्र[झ]स्तथा चान्या चतुर्दशी[ञ] ।
षष्ठस्य त्वनुवाकस्य पञ्च त्रिष्टुभ[१] उत्तमाः[ट] ॥२२॥
उद्धृत्याहिरिवे[ठ]त्येकान्त्यचौ च द्वे उपोत्तमे ।
सप्तमस्य तु सूक्तस्य जगत्यौ द्वे उपोत्तमे[ड] ॥२३॥
नवमं[ढ] जागतं सूक्तं दशमे[ण]चादितस्तृचः ।
उत्तमस्य जगत्यौ तु षष्ठी[त] च दशमी[थ] च या ॥२४॥
एका सप्तदशी[द] पङ्क्तिः संबाधत इ[ध]ति शक्वरी ।

इति षष्ठं मण्डलम् ॥

---

(१) अनुष्टुभ इति झ-पुस्तके पठ्यते ।

(क) सू॰ ५९ । (ख) सू॰ ५९, ऋ॰ ७, ८, ९, १० । (ग) सू॰ ६०, ऋ॰ १३ । (घ) सू॰ ६०, ऋ॰ १४ । (ङ) सू॰ ६०, ऋ॰ १५ । (च) सू॰ ६०, ऋ॰ १, २, ३ । (छ) सू॰ ६१ । (ज) सू॰ ६१, ऋ॰ १४ । (झ) सू॰ ६१, ऋ॰ १, २, ३ । (ञ) सू॰ ६१, ऋ॰ १३ । (ट) सू॰ ६३, ६४, ६५, ६६, ६७ । (ठ) सू॰ ७५, ऋ॰ १४, १५, १६ । (ड) सू॰ ६८, ऋ॰ १०, ११ । (ढ) सू॰ ७० । (ण) सू॰ ७१, ऋ॰ १, २, ३ । (त) सू॰ ७५, ऋ॰ ६ । (थ) सू॰ ७५, ऋ॰ १० । (द) सू॰ ७५, ऋ॰ १७ । (ध) सू॰ ६६, ऋ॰ १० ।

# अथ सप्तमं मण्डलम् ।

त्रैष्टुभे तु वसिष्ठस्य विराजोऽष्टादशा(क)दितः ।
प्रथमस्यानुवाकस्य द्वैपदं सूक्तमुत्तमम्(ख) ॥१॥
चतुर्दशं दृष्टत्यादि(ग) तस्माद्गायत्रमुत्तरम्(घ) ।
प्रगाथं बार्हतं सूक्तं द्वादशर्चमुपोत्तमम्(ङ) ॥२॥
द्वितीयस्यानुवाकस्य तेषु तेषामुपोत्तमम्(च) ।
प्रगाथमेषामुद्धृत्य द्वितीया द्विपदाष्टमम्(छ) ॥३॥
वैराजं पञ्चमं(ज) सूक्तं त्रिष्टुबस्योत्तमा(झ) निचृत् ।
गायत्रं(ञ) त्रिविराडन्त्यं(ट) द्वादशर्चं चतुर्दशम् ॥४॥
तृतीयस्यानुवाकस्य चतस्रोऽ(ठ)न्त्या अनुष्टुभः ।
उत्तमस्य तु सूक्तस्य गायत्री प्रथमा(ड) पुनः ॥५॥
उपरिष्टाद्बृहत्यन्तु तिस्रो(ढ)मध्यगता ऋचः ।
आदावाद्यस्य सूक्तस्य द्विपदा एकविंशतिः(ण) ॥६॥

---

(क) सू० १, ऋ० १, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२, १३, १४, १५, १६, १७, १८। (ख) सू० १७। (ग) सू० १४, ऋ० १। (घ) सू० १५। (ङ) सू० १६। (च) सू० ३२। (छ) सू० ३२, ऋ० ३। (ज) सू० २२। (झ) सू० २२, ऋ० ९। (ञ) सू० ३१। (ट) सू० ३१, ऋ० १०, ११, १२। (ठ, सू० ५५, ऋ० ५, ६, ७, ८,। (ड) सू० ५५, ऋ० १। (ढ) सू० ५५, ऋ० २, ३, ४। (ण) सू० ३४, ऋ० १, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२, १३, १४, १५, १६, १७, १८, १९, २०, २१।

अष्टमस्य जगत्याद्या[क] सूक्तस्यैकादशस्य[ख] च।
त्रयोदश आगतं तु सूक्तं सप्तदश[ग] च यत्॥७॥
तयो पूर्वे[घ] त्रिष्टुबन्तं शक्वर्यन्तमथोत्तरम्[ङ]।
चतुर्थस्यानुवाकस्य प्रगाथा बार्हता[च]द्वृचा।८॥
सूक्तस्यानुष्टुबन्तस्य[छ] चतुर्थ्यादितस्तु च।
मारुतस्त्व गायत्र्यस्तु सान्तपना[ज] इति॥९॥
एकादश्या[झ]द्यौ सूक्तस्य द्विपदा प्रथमस्य तु।
एकादशस्य तिस्रो[ञ]ऽन्या गायत्री नव[ट]चादितः॥१०॥
प्रगाथा बार्हता शेषा[ठ] पुरउष्णिक् षोडशी[ड]।
त्रयोदश[ढ] तु वैराजस्त्र्यावृद्धूत्य तूत्तमे[ण]॥११॥
पञ्चमस्यानुवाकस्य गायत्रं सूक्तमुत्तमम्[त]।
एकादशे[थ] चतुर्थे[द] च प्रगाथा बार्हतास्तृचा॥१२॥
ऐन्द्रावरुणे द्वे सूक्ते[ध] दशमे आगते उभे।

---

(क) सू० ४१, ऋ० १। (ख) सू० ४३, ऋ० १। (ग) सू० ५०। (घ) सू० ४६। (ङ) सू० ५०, ऋ० ४। (च) सू० ५६, ऋ० ४, ५। (छ) सू० ५८ ऋ० १२। (ज) सू० ५८, ऋ० ८, १०, ११। (झ) सू० ५९, ऋ० १, २, ३, ४, ५, ६, ७, ८, ९, १०, ११। (ञ) सू० ६६, ऋ० १७, १८, १९। (ट) सू० ६६, ऋ० १, २, ३, ४, ५, ६, ७, ८, ९। (ठ) सू० ६६, ऋ० १० ११, १२, १३, १४ १५। (ड) सू० ६६, ऋ० १६। (ढ) सू० ६८, ऋ० १, २, ३, ४, ५, ६, ७। (ण) सू० ६८, ऋ० ८, ९। (त) सू० ८९। (थ) सू० ८१, ऋ० १, ३ ५। (द) सू० ७४ ऋ० १, ३, ५। (ध) सू० ८२, ८३।

उत्तमस्य तु सूक्तस्य दशमी निचृदुत्तमा[क] ॥१३॥
षष्ठस्य त्वनुवाकस्य प्रगाथो बार्हतो[ख]द्वृचः ।
एका[ग]प्रस्तारपङ्क्तिश्च सप्तमस्यादितस्तृचः ॥१४॥
गायत्र्य उत्तरास्तिस्रः[घ] पार्जन्यं च चयोदशम्[ङ] ।
पञ्चमं[च] चोत्तमामेका[छ]मुद्धृत्यर्चमनुष्टुभम् ॥१५॥
उत्तमस्योत्तमा[ज]नुष्टुब्जगत्यष्टादशौ[झ]निचृत् ।
एकविंशीत्रयोविंशौ[ञ] तयोभे सप्त[ट]चादितः ॥१६॥
उपोत्तमा तु सूक्तस्य प्रथमैका[ठ]स्त्वनुष्टुबक् ॥

इति सप्तमं मण्डलम् ॥

---

(क) सू० ८८, ऋ० ५। (ख) सू० ९६, ऋ० १, २। (ग) सू० ९६, ऋ० ३। (घ) सू० ९६, ऋ० ४, ५, ६। (ङ) सू० १०२। (च) सू० ९४। (छ) सू० ९४, ऋ० १२। (ज) सू० १०४, ऋ० २४। (झ) सू० १०४, ऋ० १८। (ञ) सू० १०४, ऋ० २१, २२। (ट) सू० १०४, ऋ० १, २, ३, ४, ५, ६, ७। (ठ) सू० १०३, ऋ० १।

# अथाष्टमं मण्डलम् ।

प्रथमस्यानुवाकस्य गायत्रे मण्डलेऽष्टमे ।
द्वित्रिष्टुबन्तं[क] प्रथम द्विप्रगाथादि[ख] बार्हतम् ॥१॥
तृतीये[ग] च चतुर्थे[घ] च प्रगाथा बार्हता तृचाः ।
तृतीयस्य बृहत्यन्त्या[ङ] गायत्र्यौ द्वे उपोत्तमे[च] ॥२॥
पुरउष्णिक् चतुर्थस्य सूक्तस्यैकोत्तमा[छ] निचृत् ।
पञ्चमस्य तु सूक्तस्य बृहत्यौ द्वे उपोत्तमे[ज] ॥३॥
य मे दु.[झ] स्वादव. सोमा[ञ] माकिरेने[ट] त्यनुष्टुभ ।
तृतीयस्य[ठ] चतुर्थस्य[ड] सूक्ते आनुष्टुभे उभे ॥४॥
द्वितीयस्यानुवाकस्य तत्र काश्चिदृचोऽन्यथा ।
चतुर्थे सूक्ते प्रथमा[ढ] षष्ठी[ण] पञ्चदशी[त] च या ॥५॥
चतुर्दशी[थ] चतुर्थी[द] च बृहत्य पञ्चमी[ध] ककुप् ।
त्रिष्टु[न] ब्विराड्[प] जगत्ये[फ] व दशमीप्रभृतिस्तृच ॥६॥

---

(क) सू० १, ऋ० २३, २४ । (ख) सू० १, ऋ० १, २ । (ग) सू० १ ऋ० ३ । (घ) सू० १, ऋ० ४ । (ङ) सू० ३, ऋ० २४ । (च) सू० ३ ऋ० २२, २३ । (छ) सू० ४, ऋ० २१ । (ज) सू० ५, ऋ० ३७, ३८ । (झ) सू० ३, ऋ० २१ । (ञ) सू० २, ऋ० १८ । (ट) सू० ५, ऋ० ३९ । (ठ) सू० ८ । (ड) सू० ९, ऋ० १ । (ढ) सू० ९ । (ण) सू० ९, ऋ० ५ । (त) ९, ऋ० १५ । (थ) सू० ९, ऋ० १४ । (द) सू० ९, ४ । (ध) सू० ९, ऋ० ५ । (न) सू० ९, ऋ० १० । (प) सू० ९, ऋ० ११ ।(फ) सू० ९, ऋ० १२ ।

गायत्रौ परिशिष्टानां द्वितीयान्त्यौ[क] तृचावुभौ ।
पञ्चमस्य[ख] बृहत्याभ्यां मध्येज्योति[ग]रनुष्टुबृक्[घ] ।॥७॥
आस्तारपङ्क्ति[ङ]र्बार्हतः[च] प्रगाथश्चैवमन्त्यविधिः ।
षष्ठस्य तूत्तमा[छ] त्रिष्टुप्प्रतिष्ठा प्रथमा[ज]निचृत् ॥८॥
द्वितीया[झ]वर्धमाना तु सूक्तमुत्तर[ञ]मौष्णिहम् ।
प्रथमस्य[ट] तृतीयस्य[ठ] षष्ठ[ड]श्चौष्णिहमेव हि ॥९॥
तृतीयस्यानुवाकस्य प्रगाथे काकुभे उभे ।
उत्तमोपोत्तमे[ढ] सूक्ते तत्र काश्चिदृचोऽन्यथा ॥१०॥
उपोत्तमे सप्तविंशी[ण] द्विपदैकोत्तमास्त्विमाः ।
उष्णि[त]क्सतोबृहत्यौ[थ] च ककु[द]प्पङ्क्ति[ध]श्च ता ऋचः ॥११॥
वास्तोष्पते ध्रुवे[न]त्येष प्रगाथो बार्हतो तृचः ।
चतुर्थस्यानुवाकस्य प्रगाथाः काकुभा नव[प] ॥१२॥
आद्ये सूक्ते द्वितीये तु वक्ष्यते विधिराश्विने ।
चयः[फ] प्रगाथा बार्हताः प्रगाथाः काकुभास्त्रयः[ब] ॥१३॥

---

(क) सू० ८, ऋ० २, २१ । (ख) सू० १०, ऋ० १, ५ । (ग) सू० १०, ऋ० २ । (घ) सू० १० ऋ० ३ । (ङ) सू० १० ऋ० ४ । (च) सू० १० ऋ० ६ । (छ) सू० ११, ऋ० १० । (ज) सू८ ११, १ । (झ) सू० ११ ऋ० २ । (ञ) सू० १२ । (ट) सू० १३ । (ठ) सू० १५ । (ड) सू० १८ । (ढ) सू० १८, २० । (ण) सू० १८, ऋ० २७ । (त) सू० १८, ऋ० ३४ । (थ) सू० १८, ऋ० ३५ । (द) सू० १८, ३६ । (ध) सू० १८, ३७ । (न) सू० १७, ऋ० १४, १५ । (प) सू० २१, ऋ० १, २, ३, ४, ५, ६, ७, ८, ९ । (फ) सू० २२, ऋ० १, ३, ५ । (ब) सू० २२, ऋ० १३ १५, १६ ।

तेषां मध्ये बृहत्येका(क) त्वनुष्टुप्काकुभहृच(ख) ।
ककुप्(ग)च मध्येज्योति(घ)श्च पङ्क्तिमा चौष्णिहान्यत ॥१४॥
पर चत्वारि(ङ) सूक्तानि यानि विश्वमना जगौ ।
यत्वाङ्क्षाद्(च)युस्वाहि त्व(छ)मुद्गत्यैते अनुष्टुभौ ॥१५॥
उष्णिग्गभा च गायत्री सूक्ते तावामुपोत्तमा(ज) ।
युवो सूक्ते चतस्त्र(झ)श्च षोडशाद्या च्चवस्तथा ॥१६॥
उत्तमा(ञ) चैकविंशी(ट) च मता षड्गायत्र्यो मता ।
अग्निस्तये तु सूक्तस्य प्रगाथा बार्हता हृचा(ठ) ॥१७॥
ये त्रिंशतीति सूक्तेऽग्निश्चतुर्थी(ड) पुरउष्णिक् ।
उत्तमस्य द्वितीया(ढ) च तृतीया(ण) बृहती निचृत् ॥१८॥
अनुष्टुबुत्तमा(त) बभ्रु(थ)रेकस्तु द्वैपदं परम् ।
पञ्चमस्यानुवाकस्य सूक्तस्य प्रथमस्य तु ॥१९॥
दमस्यैका(द)पादनिचृत्ततस्त्रो(ध)ऽन्यास्तु पङ्क्तय ।
अग्नि वो(न)वीतिहोत्र(प)त्यृचावेते अनुष्टुभौ ॥२०॥

---

(क) सू० २१, ऋ० १० । (ख) सू० २२, ऋ० ८, ९ । (ग) सू० २२, ऋ० ११ । (घ) सू० २२, ऋ० १२ । (ङ) सू० २३, २४, २५, २६ । (च) सू० २३, ऋ० १० । (छ) सू० २६ ऋ० २० । (ज) सू० २५, ऋ० २३ । (झ) सू० २६, ऋ० १६, १७, १८ १९ । (ञ) सू० २६, ऋ० २५ । (ट) सू० २६, ऋ० २१ । (ठ) सू० २७, ऋ० १, ३, ५, ७, ९, ११, १३, १५ १७ १९, २१ । (ड) सू० २८, ऋ० ४ । (ढ) सू० ३०, ऋ० २ । (ण) सू० ३०, ऋ० ३ । (त) सू० ३०, ऋ० ४ । (थ) सू० ३९ । (द) सू० ३१, ऋ० १० । (ध) सू० ३१, ऋ० १५, १६ १७, १८ । (न) सू० ३२, ऋ० १४ । (प) सू० ३२, ऋ० ९ ।

तृतीयश्च[क] चतुर्थश्च[ख] बार्हतानुष्टुभे तयोः।
उभयोरेव गायत्रः षोडशी[ग]प्रभृतिस्तृचः ॥२१॥
अधः पञ्चस्य मे[घ]त्यैन्द्राबार्हतेऽनुष्टुबुत्तमा।
उपरिष्टाज्ज्योतिष[ङ]न्तु पङ्क्तिस्तृतस्य पञ्चमी ॥२२॥
द्वाविंशन्त्या[च] च मध्येऽस्ति महा च बृहती[छ] तयोः।
अवितासी[ज]ति शक्वर्यः षण्महापङ्क्तिरुत्तमा[झ] ॥२३॥
जागतं यन्महापाङ्क्तं प्रेदं[ञ] सूक्तमिति स्मृतम्।
तस्यैकातिजगत्याद्या[ट] महापाङ्क्तानि तान्य[ठ]पि ॥२४॥
अग्निमस्तोष्यु[ड]पक्रम्य त्रीणि सूक्तानि तत्र तु।
इन्द्राग्नी युव[ढ]मित्यस्य द्वितीया शक्वरी निचृत् ॥२५॥
त्रिष्टुबन्त्योत्तमा[ण]चैका सूक्तमस्माद्यदुत्तरम्।
त्रैष्टुभा[त]नुष्टुभौ[थ] ज्ञेयौ तस्य पूर्वोत्तरौ तृचौ ॥२६॥
षष्ठस्य त्वनुवाकस्य महापाङ्क्तं वशात्परम्[द]।
स्वादो[ध]स्तु त्रैष्टुभं सूक्तं जगती तत्र पञ्चमी[न] ॥२७॥

---

(क) सू० ३३। (ख) सू० ३४। (ग) सू० ३३,३४, ऋ० १६, १७, १८। (घ) सू० ३३, ऋ० १९। (ङ) सू० ३५। (च) सू० ३५, ऋ० २२, २४। (छ) सू० ३५, ऋ० २३। (ज) सू० ३६, ऋ० १, २, ३, ४, ५, ६। (झ) सू० ३६, ऋ० ७। (ञ) सू० ३७। (ट) सू० ३७, ऋ० १। (ठ) सू० ३७, ऋ० २, ३, ४, ५, ६, ७। (ड) सू० ३९, ४०, ४१। (ढ) सू० ४०, ऋ० २। (ण) सू० ४०, ऋ० १२। (त) सू० ४२, ऋ० १, २, ३। (थ) सू० ४२, ऋ० ४, ५, ६। (द) सू० ४७। (ध) सू० ४८। (न) सू० ४८, ऋ० ५।

ऊनत्रिंशी(क) त्रयोविंशी(ख) दशमी(ग) चोत्तमा(घ) च या ।
षष्ठी(ङ) चैतास्तु गायत्र्यस्ततस्त्वादितो(च) वशे ॥२८॥
त्रयोदशी तु द्विपदा(छ) त्रिंशी चानुष्टुब(ज)ष्टमी ।
सतोबृहत्यौ(झ) षड्विंशी नवमी च स्मृते उभे ॥२९॥
द्वादशी त्वस्य सूक्तस्य विपरीते(ञ)ति सम्मता ।
एकत्रिंशी विराडुष्णिक्(ट) पञ्चमी तु ककु(ठ)न्निचृत् ॥३०॥
ददीरेक्ण(ड)इति त्रेधा ककुम्न्यङ्कुशिरा(१)निचृत् ।
द्वाविंशी चैकविंशी च चतुर्विंशी च पङ्क्तय(ढ) ॥३१॥
उपोत्तमा च शिष्टाः स्युर्बृहत्योऽन्या वशे तत्र(ण) ।
एषा पिपीलिका(त)मध्ये बृहत्यास्तु चतुर्दशी ॥३२॥
ये पातयन्ते अज्मभि(थ)रुपरिष्टाद्बृहत्यसौ ।
विंशेया विषमपदा(द) विज्ञेया बृहतीष्वपि ॥३३॥
सप्तमस्यानुवाकस्य द्वे सूक्ते प्रथमे तयोः ।

---

(१) न्यङ्कुशिरा इति छ चिह्नितपुस्तके पठ्यते । लिपिकरप्रमादकृतो ऽयं पाठः ।

---

(क) सू० ४६, ऋ० २९ । (ख) सू० ४६, ऋ० २३ । (ग) सू० ४६, ऋ० १० । (घ) सू० ४६, ऋ० ३३ । (ङ) सू० ४६, ऋ० ६ । (च) सू० ४६, ऋ० २, ३, ४, ५ । (छ) सू० ४६, ऋ० १३, ३० । (ज) सू० ४६, ऋ० ८ । (झ) सू० ४६, ऋ० ९, २६ । (ञ) सू० ४६, ऋ० १२ । (ट) सू० ४६, ऋ० ३१ । (ठ) सू० ४६, ऋ० ५ । (ड) सू० ४६, ऋ० १५ । (ढ) सू० ४६, ऋ० २१, २२, २४ । (ण) सू० ४६, ऋ० १, ७, ११, १८, १९, २५, २७, २८, ३२ । (त) सू० ४६, ऋ० १४ । (थ) सू० ४६, ऋ० १८ । (द) सू० ४६, ऋ० २० ।

आग्नेयैन्द्रे तथा भार्गे प्रगाथा[क] बार्हता[ख]द्वृचाः ॥२४॥
तृतीये बार्हतः पांक्तः सप्तमी[ग]प्रभृतिस्तृचः ।
चतुर्थस्योत्तमा[घ] त्रिष्टुप्चतस्रोऽन्या[ङ] अनुष्टुभः ॥२५॥
प्रथमा च चतुर्थी च पञ्चमी सप्तमी च या ।
सप्तमेऽनुष्टुब[च]न्ते तु प्रगाथा बार्हता द्वृचाः ॥२६॥
आनुष्टुभास्तु चत्वारः[छ] प्रगाथा आदितस्तृचाः ।
नवमस्येह सूक्तस्य सूक्ते त्वानुष्टुभे परे ॥२७॥
गायत्री द्विबृहत्यन्ते चतुर्थी[ज]प्रभृतिस्तृचः ।
द्वितीया पादतोऽनुष्टु[झ]बुष्णिगन्तरसम्पदा ॥२८॥
पङ्क्तिस्त्वेकादशी त्वस्य[ञ] षोडशी[1] च निचृत्पदा ।
अष्टमस्यानुवाकस्य त्रिप्रगाथादि बार्हतम् ॥२९॥
ऐन्द्रं हि प्रथमं[ट] सूक्तं त्वार्षञ्च पुरुहन्मनः ।
तस्योष्णिक्पुरउष्णिहौ[ठ]मध्येऽनुष्टु[ड]बुपोत्तमा[ढ] ॥४०॥
द्वृचाः प्रगाथा बार्हता द्वितीयस्योत्तमा[ण]स्त्रयः ।

---

(१) षोडशीति छ-चिह्नितपुस्तके पठ्यते ।

---

(क) सू० ४८, ऋ० १, ३, ५, ७, ९ । (ख) सू० ४८, ऋ० २, ४, ६, ८, १० । (ग) सू० ५१, ऋ० ७, ८, ९ । (घ) सू० ५२, ऋ० १० । (ङ) सू० ६३,] ऋ० १, ४, ५, ७ । (च) सू० ५५, ऋ० ५ । (छ) सू० ६८, ऋ० १, ४, ७, १० । (ज) सू० ६९, ऋ० ४, ५, ६ । (झ) सू० ६९, ऋ० २ । (ञ) सू० ६९, ऋ० ११, १६ । (ट) सू० ७० । (ठ) सू० ७०, ऋ० १३ । (ड) सू० ७०, ऋ० १५ । (ढ) सू० ७०, ऋ० १४ । (ण) सू० ७१, ऋ० १०, ११, १२, १३, १४, १५ ।

आनुष्टुभास्तु चत्वारः[क] प्रगाथा आदितस्तृचाः ॥४१॥
पञ्चमस्योत्तमास्तास्य तिस्रो[ख]ऽनुष्टुभ ईरिताः ।
विश्वेत्ता विष्णु[ग]रित्येष प्रगाथो बार्हतो तृचः ॥४२॥
नवमप्रभृतीनान्तु सूक्तानां पृथगुत्तमा ।
बृहत्य[घ]नुष्टु[ङ]त्रिष्टुप्[च] च त्रयाणां कथिता ऋच ॥४३॥
नवमस्यानुवाकस्य प्रगाथा बार्हता तृचा ।
शेषाश्चतुर्णां सूक्तानां षष्ठा[छ]द्वे आगतात्परम् ॥४४॥
आनुष्टुभौ बृहत्यन्त्यामृचो यज्ञा यथा[ज] इति ।
आनुष्टुभ द्विपङ्क्त्यादि कन्या वा[झ] सूक्तमुत्तरम् ॥४५॥
पान्त[ञ]मित्यस्य सूक्तस्य प्रथमैका त्वनुष्टुबृक् ।
दशमस्यानुवाकस्य सप्तमे त्रैष्टुभे पुन ॥४६॥
षष्ठ्ये[ट]का जगती तस्या पर आनुष्टुभस्तृच[ठ] ।
आनुष्टुभा द्वितीया[ड] द्वे परे त्रैष्टुभबार्हते[ढ] ॥४७॥
अनयोस्त्रैष्टुभे सूक्ते या चतुर्थी विराड्[ण]सौ ।
उभौ त्वतिजगत्यादौ[त] बार्हतस्योत्तमे तृचौ[थ] ॥४८॥

---

(क) सू० ७४, ऋ० १,४,७,१०। (ख) सू० ७४, ऋ० १३,१४,१५। (ग) सू० ७७, ऋ० १०, ११। (घ) सू० ७८, ऋ० १०। (ङ) सू० ७९, ऋ० ९। (च) सू० ८०, ऋ० ८। (छ) सू० ८६। (ज) सू० ८८, ऋ० ५, ६, ७। (झ) सू० ९१। (ञ) सू० ९२, ऋ० १। (ट) सू० १००, ऋ० ६। (ठ) सू० १००, ऋ० ७, ८, ९। (ड) सू० ९५। (ढ) सू० ९६, ९७। (ण) सू० ९६, ऋ० ४। (त) सू० ९७, ऋ० १०, १३। (थ) सू० ९७, ऋ० ९।

उपरिष्टाद्बार्हतयोस्तयोः पूर्वः(क) प्रतीयताम् ।
उत्तरस्य तृचस्याद्या(ख) त्रिष्टुबन्त्या(ग) जगत्यपि ॥४८॥
प्रगाथं बार्हतं सूक्तं षष्ठं पञ्चममौष्णिहम्(घ) ।
अन्त्यानवम्यौ(ङ) सूक्तेऽस्मिन् पञ्चमे पुरउष्णिहौ ॥५०॥
उपोत्तमे सप्तमे च चतस्रः(च) काकुभाः स्मृताः ।
अष्टमे त्रित्रिष्टुबन्ते(छ) प्रगाथा बार्हता तृचाः(ज) ॥५१॥
गायत्री तु तृतीया(झ)त्र बृहत्यन्या त्रयोदशी(ञ) ।
एका सतोबृहत्यस्य चतुर्थी(ट) सा प्रतीयताम् ॥५२॥
उत्तमस्योत्तमा(ठ)नुष्टुब्विराड्रूपा तु पञ्चमी(ड) ।
सतोबृहत्यस्तस्यैव सप्तम्याद्ययुजस्तृचः(ढ) ॥५३॥
ककुब्गायत्री च ककुबष्टम्यादौ युजस्तृचः(ण) ।
अन्याः शिष्टा बृहत्यस्तु विज्ञेयास्तत्र चादितः(त) ॥५४॥

इति अष्टमं मण्डलम् ।

---

(क) सू० ९७, ऋ० ११ । (ख) सू० ९७, ऋ० १४। (ग) सू० ९७, ऋ० १५। (घ) सू० ९८, ९९। (ङ) सू० ९८, ऋ० ९, १२। (च) सू० ९८, ऋ० ७, ८, १०, ११। (छ) सू० १०१, ऋ० १४, १५, १६। (ज) सू० १०१, ऋ० २, ४, ६, ८, १०, १२। (झ) सू० १०१, ऋ० ३। (ञ) सू० १०१, ऋ० १३। (ट) सू० १०१, ऋ० ४। (ठ) सू० १०२, ऋ० १४। (ड) सू० १०३, ऋ० ५। (ढ) सू० १०३, ऋ० ७, ९, ११। (ण) सू० १०३, ऋ० ८, १०, १२। (त) सू० १०३, ऋ० १, २, ३, ४, ६, १३।

# अथ नवमं मण्डलम् ।

गायत्रं पावमानीनां षष्टि सूक्तानि सप्त च ।
पञ्चमस्यात्र सूक्तस्य चतस्रो(क)ऽन्त्या अनुष्टुभः ॥१॥
पवस्व सोममन्दय(ख)न्नित्येष द्वैपदस्तृचः ।
अतिवारान(ग)लाय्यस्य(घ) द्वे एते पुरउष्णिहौ ॥२॥
उपोत्तमस्य चानुष्टुप्सूक्तस्याष्टादशी(ङ) विराट् ।
सप्तविंशु(च)त्तमे च द्वे तिस्रोऽनुष्टुभ(छ) उत्तमे ॥३॥
अतः पराणि सूक्तानि(ज) जागताः(१) प्राक् सतुद्रवात् ।
एकां त्रिष्टुभमुद्धृत्य सप्तमस्याष्टमी(झ)मृचम् ॥४॥
चतुर्दशं(ञ) पञ्चदशं(ट) चत्वारि(ठ) च तथादितः(ड) ।
एतानि त्रिष्टुबन्तानि जागतेष्विति गम्यताम् ॥५॥
द्वित्रिष्टुबन्ते तत्रापि द्वितीयाष्टादशे(ढ) उभे ।
त्रैष्टुभानि पराणि(ण) प्रागभि नो वाजसातमात् ॥६॥

(१) जागतानीति भवितुमर्हति ।

(क) सू॰ ५, ऋ॰ ८, ९, १०, ११ । (ख) सूक्त, ०१६, '१७०६ । १८ । (ग) सू॰ ६०, ऋ॰ ३ । (घ) सू॰ ६७, ऋ॰ ३० । (ङ) सू॰ ६६, ऋ॰ १८ । (च) सू॰ ६७, ऋ॰ २७ । (छ) सू॰ ६७, ऋ॰ ३१, ३२ । (ज) सू॰ ६८, ६९, ७०, ७१, ७२, ७३, ७४, ७५, ७६ ७७, ७८, ७९, ८०, ८१, ८२, ८३, ८४, ८५, ८६ । (झ) सू॰ ७४, ऋ॰ ८ । (ञ) सू॰ ६८, ऋ॰ १० । (ट) सू॰ ६९, ऋ॰ १० । (ठ) सू॰ ७०, ऋ॰ १० । (ड) सू॰ ७१, ऋ॰ ९ । (ढ) सू॰ ८५, ऋ॰ ११, १२ । (ण) सू॰ ८७, ८८, ८९, ९०, ९१, ९२, ९३, ९४, ९५, ९६, ९७ ।

सतायांनुष्टुभान्यू[क]र्ध्वं तेभ्यः पञ्चौष्णिहानि[ख] च ।
मे + + + + + + ॥७॥
+ + + + स्य बृहत्योर्दाद्शौ[ग] तयोः ।
षोड़शर्चस्य गायत्री[घ] द्वितीयोत्तरया सह ॥८॥
परीतोऽषिञ्चते[ङ]त्यस्मिन् प्रगाथा बार्हता ऋचाः ।
षोड़शौ च तृतीया च द्वे अस्य द्विपदे[च]उभे ॥९॥
अष्टमी च बृहत्य[छ]स्य नवमी च निवृत्पदा[ज] ।
प्रगाथं काकुभं[झ] सूक्तं सतोबृहती यस्य नः[ञ] ॥१०॥
यवमध्या तु गायत्री स सुन्व[ट] इति काकुभे ।
त्रैष्टुभं त्रिविराड़[ठ]न्तमूर्ध्वबार्हतः[ड] परम् ॥११॥
तस्मिन् पिपीलिकामध्या[ढ]स्तिस्रोऽनुष्टुभ आदितः ।
अया रुचे[ण]त्यथात्यष्टं पाङ्क्तानि[त] चोष्णतः परम् ॥१२॥

इति नवमं मण्डलम् ।

---

(क) सू० ९८, ९९, १००, १०१ । (ख) सू० १०२, १०३, १०४, १०५, १०६ । (ग) सू० ९६, ऋ० १२ । (घ) सू० १०१, ऋ० २, ३ । (ङ) सू० १०७ । (च) सू० १०७, ऋ० ३, १६ । (छ) सू० १०७, ऋ० ८ । (ज) सू० १०७, ऋ० ९ । (झ) सू० १०८ । (ञ) सू० १०८, ऋ० १४, । (ट) सू० १०८, ऋ० १३ । (ठ) सू० ११०, ऋ० १०, ११, १२ । (ड) सू० ११०, ऋ० ४, ५, ६, ७, ८, ९ । (ढ) सू० ११०, ऋ० १, २, ३ । (ण) सू० १११ । (त) सू० ११२, ११३, ११४ ।

# अथ दशमं मण्डलम् ।

त्रैष्टुभाः[क] क्षुद्रसूक्तानामनुवाके दशोत्तराः ।
तेषामाद्यस्य नवमे गायत्रेऽन्ते त्वनुष्टुभौ[ख] ॥१॥
एकादशे पञ्चदशे षड्[ग]चैकादश्यृ[घ]गादितः ।
त्रयोदशस्ये[ङ]कान्त्या जगत्यस्ता निचृत्पदाः ॥२॥
चतुर्दशस्य सूक्तस्य बृहत्ये[च]का ह्युपोत्तमा ।
त्रयोदशीचतुर्दश्यावुत्तमा चेत्यनुष्टुभः[छ] ॥३॥
उत्तमस्य तु सूक्तस्य चतस्रोऽन्त्या अनुष्टुभः[ज] ।
द्वितीयस्यानुवाकस्य सूक्तमानुष्टुभं[झ] विदुः ॥४॥
तृतीयं यदि चाष्टर्चं षष्ठ्या गायत्र्या[ञ] विना ।
अनुष्टु[ट]प्तु द्वितीयस्य प्रथमस्य च योत्तमा ॥५॥
एकादशी द्वितीयस्य ततः प्रस्तारपङ्क्ति[ठ]र्द्धर्क् ।
उपोत्तमा तु पूर्वस्य पुरस्ताद्बृहती[ड] विराट् ॥६॥

---

(क) सू० १, २, ३, ४, ५, ६, ७, ८, ९, १० । (ख) सू० ९, ऋ० ८, ९ । (ग) सू० ११, ऋ० १, २, ३, ४, ५, ६ । (घ) सू० १५, ऋ० ११ । (ङ) सू० १३, ऋ० ५ । (च) सू० १४, ऋ० १५ । (छ) सू०, १४, ऋ० १३, १४, १६ । (ज) सू० १६, ऋ० ११, १२, १३, १४ । (झ) सू० १९, २०, २१, २२, २३, २४, २५, २६ । (ञ) सू० १९, ऋ० ६ । (ट) सू० १७, ऋ० १४ । सू० १८, ऋ० १४ । (ठ) सू० १८, ऋ० ११ । (ड) सू० १७, ऋ० १३ ।

उपान्त्या तु द्वितीयस्य षष्ठी या सप्तमस्य च ।
हरी अस्येति तिस्रश्च जगत्यः(क) पञ्च ता इमाः ॥७॥
पञ्चमी त्वस्य सूक्तस्य त्रिष्टुबे(ख)वाभिसारिणी ।
ऊर्ध्वमानुष्टुभादाद्या विमदस्य दशाक्षरा(ग) ॥८॥
अनुष्टुप्(घ) च द्वचौ च द्वौ गायत्र्यौ(ङ) नवमी विराट्(च) ।
विमदस्य महोदर्काः सर्वा आस्तारपङ्क्तयः(छ) ॥९॥
षष्ठे पुरस्ताद्बार्हते(ज) त्रिष्टुब(झ)न्ते कुह स्तुते ।
त्वया चिदानस्त्वं नस्तु तिस्र एता अनुष्टुभः(ञ) ॥१०॥
आनुष्टुभं(ट) तु दशमं तत्र प्रथमया सह ।
वर्ष्मेमसी महीत्युष्णिगा(ठ)नुष्टुब्भ्ये(ड)व पादतः ॥११॥
अस्य एवानुष्टुभ् सोऽपि युवं शक्रे(ढ)ति यस्तृचः ।
तृतीयस्यानुवाकस्य प्र सु ग्मन्तेति पञ्च च ॥१२॥
सप्तमी चाद्यसूक्तस्य जगत्यः(ण) षडिमा ऋचः ।
चतुर्थस्य तु सूक्तस्य द्वितीयप्रभृतिर्हृचः ॥१३॥

---

(क) सू० १८, ऋ० १३, । सू० २३, ऋ० २, ३, ४, ६ । (ख) सू० २६, ऋ० ५ । (ग) सू० २०, ऋ० १ । (घ) सू० २०, ऋ० २ । (ङ) सू० २०, ऋ० ३, ४, ५, ६, ७, ८ । (च) सू० २०, ऋ० ९ । (छ) सू० २१, २२, २३, २४, २५, २६ । (ज) सू० २२, ऋ० १०, ११, १२, १३, १४ । (झ) सू० २२, ऋ० १५ । (ञ) सू० २२, ऋ० ५, ७, ९ । (ट) सू० २६ । (ठ) सू० २६, ऋ० १, ४ । (ड) सू० २६, ऋ० ३, ५, ९ । (ढ) सू० २४, ऋ० ४, ५, ६ । (ण) सू० ३२, ऋ० १, २, ३, ४, ५ । सू० ३३, ऋ० ७ ।

प्रगाथो बार्हत(क)स्तस्मात्परा गायत्र्य(ख)स्तु षट्।
जागतान्य(ग)स्य सूक्तानि पञ्चमादधि सप्त तु ॥१४॥
एकां त्रिष्टुभ(घ)मुद्धृत्य सौर्यस्य दशमीमृचम्।
षष्ठसप्तमयोश्चान्त्ये(ङ) दशमस्य च तूत्तमाम्(च) ॥१५॥
चतुर्थस्यानुवाकस्य जागते(छ) प्रथमे उभे।
उद्धृत्यान्ये तयोः पूर्वा तिस्रश्चादित उत्तरात् ॥१६॥
षष्ठस्य सप्तमश्चैते जागते(ज) तत्र षष्ठतः।
उद्धृत्यान्ये सप्तमीश्च द्वितीयान्ये च सप्तमात् ॥१७॥
अष्टमस्य च सूक्तस्य जागत(झ)स्तूत्तमो तृच।
एते त्वचाभिचारिण्यो(ञ) के ते नर इति द्वयो ॥१८॥
पञ्च चैकादशिन्याश्चा जगत्य(ट)स्त्वष्टमी विना।
चतुर्दशस्य जागत(ठ)श्चतुर्थीप्रभृतिस्तृचः ॥१९॥
गायत्रानुष्टुभे(ड) सूक्ते मा प्रयत्त इति द्वुभे।
आशनं तस्य पश्चादौ गायत्र्यो(ढ)ऽनुष्टुभ(ण) परा ॥२०॥

---

(क) सू॰ ३३, ऋ॰ २, ३। (ख) सू॰ ३३, ऋ॰ ४, ५, ६, ७, ८, ९। (ग) सू॰ ३५, ३६ ३७, ३८, ३९, ४०, ४३। (घ) सू॰ ३७, ऋ॰ १०। (ङ) सू॰ ३५, ऋ॰ १३, १४। सू॰ ३६, ऋ॰ १३, १४। (च) सू॰ ३९, ऋ॰ १४। (छ) सू॰ ४३, ऋ॰ १, २, ३, ४, ५, ६, ७, ८, ९। सू॰ ४४, ऋ॰ ४, ५, ६, ७, ८, ९। (ज) सू॰ ४८, ऋ॰ [illegible] ३, ४, ५, ६, ७, ८ [illegible] (झ) सू॰ [illegible] सू॰ ४९, ऋ॰ १, ३, ४, ५, ६, ७, [illegible] ऋ॰ ६, [illegible] ५०, ऋ॰ ६, ७। (ञ) सू॰ ५०, ऋ॰ [illegible] ४। [illegible] ७, ९, १०, ११। (ट) सू॰ ५६, [illegible] (ड) सू॰ ६०, ऋ॰ १, २, [illegible] १०, ११, १२।

मं रोदसी यथा युगं यथेयमिति पङ्क्तयः(क) ।
अत्र दके इति ह्येका महापङ्क्ति(ख)र्हि षट्पदा ॥२१॥
विराट्पूर्वा(ग) समिद्धेति त्रिष्टुप्पङ्क्त्युत्तरैव या ।
पञ्चमस्यानुवाकस्य चत्वारि प्रागुपोत्तमा ॥२२॥
जागतान्यृ(घ)चमुद्धृत्य यां मे धिय(ङ)मिति त्रिमाम् ।
पूर्वयोरुत्तमे(च) चर्चौ परयोश्चोत्तमा(छ)मृचम् ॥२३॥
द्वितीयेऽनुष्टुब(ज)ष्टम्या नवम्या सह पञ्चमी ।
तृचोऽस्य षष्ठीप्रभृतिः प्रगाथो बार्हतो(झ)मतः ॥२४॥
दशमी तस्य गायत्री(ञ) जगत्यो(ट)ऽन्या विनोत्तमाम् ।
षष्ठस्य त्वनुवाकस्य जागते(ठ) सप्तमाष्टमे ॥२५॥
नवमी च तृतीयस्य प्रथमे चादितो तृचः ।
नवमस्य पञ्चमी च दशमस्य च जागतः(ड) ॥२६॥
श्रेयो द्वितीयया सार्कं पञ्चमीप्रभृतिस्तृचः ।
उपोत्तमस्य सूक्तस्य तथा प्रथमया सह ॥२७॥

---

(क) सू० ५९, ऋ० ८ । सू० ६०, ऋ० ८, ९ । (ख) सू० ५९, ऋ० ९ । (ग) सू० ५९, ऋ० १० । (घ) सू० ६१, ६४, ६५, ६६ । (ङ) सू० ६४, ऋ० १२ । (च) सू० ६१, ऋ० १०, ११ । सू० ६१, ऋ० १६, १७ । (छ) सू० ६५, ऋ० १५ । सू० ६६, ऋ० १५ । (ज) सू० ६७, ऋ० ५, ८, ९ । (झ) सू० ६७, ऋ० ६, ७ । (ञ) सू० ६१, ऋ० १० । (ट) सू० ६७, ऋ० १, २, ३, ४ । (ठ) सू० ७५, ७६ । (ड) सू० ७१, ऋ० ९ । सू० ६९, ऋ० १, २ । सू० ७७ ऋ० ५ । सू० ७८, ऋ० २, ५, ६, ७ । सू० ८३, ऋ० १ ।

उत्तमस्य चतस्रोऽन्त्या जगत्य(क) इति गम्यताम् ।
सप्तमस्यानुवाकस्य आद्यमानुष्टुभ(ख) स्मृतम् ॥२८॥
अस्मिन् नवो नवस्त्रिस्रो द्वे द्वे त्वभ्यणाम्यनूवराः ।
यदग्निनाघोरचक्षु पूषा त्वा त्रिष्टुभो(ग) दश ॥२९॥
आ न प्रजां जगत्य(घ)स्ता पूर्वापरमिह प्रियम् ।
दृष्टमेतदि(ङ)ति ज्ञेया बृहती न्यङ्कुसारिणी ॥३०॥
षष्ठस्यानुष्टुभ(च) सूक्त तस्यैका त्रिष्टुबु(छ)त्तमा ।
तृतीयस्य च सूक्तस्य चतस्रोऽन्त्या अनुष्टुभ(ज) ॥३१॥
पङ्क्ति(झ)मस्य द्वितीयन्तु तत्राप्येव निबोधिता ।
अष्टमस्यानुवाकस्य प्रथमे जागते(ञ)उभे ॥३२॥
तथा चतुर्थं(ट) पञ्चम(ठ) पूर्वादुद्धृत्य तूत्तमाम्(ड) ।
चतुर्थात्पञ्चमी चान्या सप्तमी(ढ) च व्यपास्य तु ॥३३॥
षष्ठादन्त्या(ण)स्तु तिस्रश्च भिषगानुष्टुभ(त) परम् ।
महि(थ)प्रस्तारपङ्क्ति तु पुरस्ताद्बृहती(द) परा ॥३४॥

---

(क) सू० ८४, ऋ० ४, ५, ६, ७। (ख) सू० ८५। (ग) सू० ८५, ऋ० १४, १९, २०, २१, २३, २४, २६ ३६, ३७, ४४। (घ) सू० ८५, ऋ० १८, २७, ४३। (ङ) सू० ८५, ऋ० ३४। (च) सू० ९०। (छ) सू० ९०, ऋ० १५। (ज) सू० ८७, ऋ० २२, २३, २४, २५। (झ) सू० ८६। (ञ) सू० ९१, ९२। (ट) सू० ९४। (ठ) सू० ९६। (ड) सू० ९१, ऋ० १५। (ढ) सू० ९४, ऋ० ५, ७, १४। (ण) सू० ९६, ऋ० ११, १२, १३। (त) सू० ९७। (थ) सू० ९३। (द) सू० ९३, ऋ० १५।

यज्ञे यज्ञे च विश्वेषां वावर्त्त ता अनुष्टुभः[क] ।
न्यङ्कुसारिण्यो तं घर्मं[ख] ह्यधनः पङ्क्तिरचरैः[ग] ॥३५॥
नवमस्यानुवाकस्य पञ्चसूक्तमिदौष्णिहम्[घ] ।
तस्मिन् पिपीलिकामध्ये[ङ] हरी वज्रमिमे शुची ॥३६॥
प्रथमा वास्य गायत्री[च] त्रिष्टुब[छ]स्योत्तमा पुनः ।
नवम्यन्ते द्वितीयस्य चतुर्थी चाष्टमस्य च ॥३७॥
प्रोदर्कस्येन्द्र वृञ्जेति जगत्य[ज]स्ताश्चतुर्दश ।
मध्येगायत्र्यो[झ] बृहती[ञ] निरा हावानिति द्वयोः ॥३८॥
मुद्गलस्य बृहत्या[ट]द्या तृतीया चोत्तमा च या ।
पुनर्वै प्रेता जायता पुनर्दायेत्यनुष्टुभः[ठ] ॥३९॥
दशमस्यानुवाकस्य गायत्री[ड] षष्ठसप्तमे ।
प्रथमं जागतं[ढ] सूक्तं प्रकर्षन्त[ण]श्च चिच इत् ॥४०॥
उद्धृत्य प्रथमादन्या[त] त्रितरस्मादुपोत्तमाम्[थ] ।
द्वितीयस्य चतुर्थ्येका जगती[द] चात्र कथ्यते ॥४१॥

---

(क) सू० ९३, ऋ० २, ३, १२ । (ख) सू० ९३, ऋ० ११ । (ग) सू० ९३, ऋ० ९ । (घ) सू० १०५ । (ङ) सू० १०५, ऋ० २, ७ । (च) सू० १०५, ऋ० १ । (छ) सू० १०५, ऋ० ११ । (ज) सू० १००, ऋ० १, २, ३, ४, ५, ६, ७, ८, ९, १०, ११ । सू० १०१, ऋ० ९, १२ । सू० १०३, ऋ० ४ । (झ) सू० १०१, ऋ० ४, ६ । (ञ) सू० १०१, ऋ० ५ । (ट) सू० १०२, ऋ० १, ३, १२ । (ठ) सू० १०२, ऋ० १२ । सू० १०९, ऋ० ६, ७, । (ड) सू० ११८, ११९ । (ढ) सू० ११३ । (ण) सू० ११५, ऋ० ९ । (त) सू० ११३, ऋ० १० । (थ) सू० ११५, ऋ० ८ । (द) सू० ११४, ऋ० ४ । सू० १११, ऋ० १, २, ३, ४, ५, ६, ७ ।

पञ्चमस्य च सूक्तस्य जागत[क]स्त्वादितो तृच ।
जागत[ख] द्वशम सूक्तमुद्धृत्याद्याञ्च पञ्चमीम् ॥४१॥
वाक्सूक्तस्य द्वितीया च द्वादशस्य च सप्तमी ।
उत्तमा च विहव्यस्य जगत्य[ग]स्ता दशा च्च ॥४२॥
चतुर्दश त्वपरिष्टाद्वार्हत[घ] तद्विनोत्तमाम् ।
रात्रीसूक्त तु गायत्र[ङ] सैवमत्रापि गम्यताम ॥४४॥
एकादशेऽनुवाके तु द्वितीय[च] जगतीसुखम् ।
तृतीयस्य च सूक्तस्य चतुर्थ्येका त्वनुष्टु[छ]वृक् ॥४५॥
चतुर्थस्य च सूक्तस्य प्रथमा न्यङ्कुसारिणी[ज] ।
उपाद्योपान्त्ये प्रस्तारपङ्क्ती[झ] एवावगम्यताम् ॥४६॥
महासतोवृहत्य[ञ]न्ता विराड्रूपान्तु[ट]शेषिता ।
प्राकार[ठ]महापाङ्क्तौ[ड] तु पञ्चमस्यादितस्तृचो ॥४७॥
अष्टमस्य तु त्वमिन्द्रेति त्रिष्टुब[ढ]न्त्या निवृत्पदा ।
षष्ठ सूक्त महापाङ्क्त[ण] तस्यैका पङ्क्ति[त]रुत्तमा ॥४८॥

---

(क) सू० ११७, ऋ० १ २। (ख) सू० १२२, ऋ० २, ३, ४, ५, ६, ७, ८। (ग) सू० १२४, ऋ० ७। सू० १२५, ऋ० २। सू० १२८, ऋ० ९। (घ) सू० १२६, ऋ० १, २, ३, ४, ५, ६, ७। (ङ) सू० १२७। (च) सू० १३०, ऋ० १। (छ) सू० १३१, ऋ० ४। (ज) सू० १३२, ऋ० १। (झ) सू० १३२, ऋ० २, ६। (ञ) सू० १३२, ऋ० ७। (ट) सू० १३२, ऋ० ३, ४, ५। (ठ) सू० १३३ ऋ० १, २, ३। (ड) सू० १३३, ऋ० ४, ५, ६। (ढ) सू० १३३, ऋ० ७ (ण) सू० १३४। (त) सू० १३४, ऋ० ७।

आनुष्टुभान्य[क]तस्त्रीणि दशमन्त्वथ जागतम्[ख]।
सूक्ते तु द्वादशे षष्ठी त्रिष्टु[ग]ज्ज्योतिष्मतीविराट्[घ] ॥४८॥
सतोबृहत्य[ङ]स्तिस्रोऽन्त्या आद्ये विष्टारपङ्क्तिके[च](१)।
अनुष्टुबं[छ] तदाग्नेयं द्विजगत्या[ज]दि सूक्तयोः ॥५०॥
मध्ये चतुर्दशं सूक्तं तदानुष्टुभयो[झ]र्द्वयोः।
गायत्री[ञ] बृहती[ट]ज्ञेया सूक्ते गायत्र्यौ[ठ]परे ॥५१॥
सतो बृहत्युपान्त्यान्त्या पङ्क्ति[ड]र्विष्टारपूर्विका।
आनुष्टुभे[ण]परे च द्वे जागत[त] तदनन्तरम् ॥५२॥
तेषां पूर्वन्तु पंक्त्यन्तं[थ] त्रिष्टुबन्त[द] तु जागतम्।
उपोत्तमस्य सूक्तस्य बृहत्य[ध]स्तिस्र आदितः ॥५३॥
उपरिष्टाज्ज्योतिष्मती[न] विज्ञेये उत्तरे ऋचौ।
उपान्त्या जगती[प] वान्त्या त्वन्यानुष्टुभ[फ] मुत्तरम् ॥५४॥

(१) अन्त्योपरिष्टाज्ज्योतिस्तु द्वादशन्यादितो तृच।
त्रिष्टारपाङ्क्त शिष्टन्तु सतोबार्हतन्तृच। इति पाठान्तरम्।

(क) सू० १३५, १३६, १३७। (ख) सू० १३८। (ग) सू० १४०, ऋ० ६। (घ) सू० १४०, ऋ० ५। (ङ) सू० १४०, ऋ० २, ३, ४। (च) सू० १४०, ऋ० १। (छ) सू० १४२, ऋ० ७, ८। (ज) सू० १४२, ऋ० १२। (झ) सू० १४१, १४३। (ञ) सू० १४४, ऋ० १। (ट) सू० १४४, ऋ० २। (ठ) सू० १४४, ऋ० ३, ४। (ड) सू० १४४, ऋ० ५। (ढ) सू० १४४, ऋ० ६। (ण) सू० १४५, १४६। (त) सू० १४७। (थ) सू० १४५, ऋ० ६। (द) सू० १४७, ऋ० ५। (ध) सू० १५०, ऋ० १, २, ३। (न) सू० १५०, ऋ० ४, ५। (प) सू० १५०, ऋ० [illegible]। (फ) सू० १५१।

अतोऽन्यत्त्रैष्टुभं[क] सर्वं यदनुक्तमिहापि तत् ।
उत्तमस्यानुवाकस्य तुभ्येदमिति जागतम्[ख] ॥५५॥
तथैवास्तारपङ्क्त्य[ग]न्तं विभ्राडिति च जागतम्[घ] ।
पञ्चमस्य द्वितीयस्य सप्तमं विंशमेव च ॥५६॥
गायत्राणि[ङ] सवस्यैव महीत्यादीनि पञ्च च ।
एकविंशस्य षष्ठस्य द्वे चास्य द्वैपदे[च] उभे ॥५७॥
त्रैष्टुभं[छ] तु विराडादि द्वैपदं षष्ठमेतयोः ।
एतानि त्रैष्टुभान्य[ज]स्य नवमं दशमं तथा ॥५८॥
चतुर्दशं सप्तदशं तथैवाष्टादशं च यत् ।
पतङ्गादीनि सूक्तानि त्रैष्टुभान्ये[झ]व सप्त तु ॥५९॥
जगत्यानुष्टुभा[ञ] चाद्ये तेषामाद्यतृतीययोः ।
पूर्वेषु पञ्चवर्गेषु दशमेऽनुष्टु[ट]बुत्तमा ॥६०॥
शिष्टान्यनुष्टुभान्ये[ठ]व सूक्तान्यस्य चतुर्दश ।
आनुष्टुभेष्वपेहीति सूक्ते पङ्क्ति[ड]रिहोत्तमा ॥६१॥

---

(क) सू० १४७, १४८, १४९। (ख) सू० १६७। (ग) सू० १७०, ऋ० ४। (घ) सू० १७०, ऋ० १, २, ३। (ङ) सू० १५३, १५६, १५८, १७१, १७५, १८५, १८६, १८७, १८८, १८९। (च) सू० १५७, १७२। (छ) सू० १५७। (ज) सू० १६०, १६१, १६५, १६८, १६९। (झ) सू० १७७, १७८, १७९, १८०, १८१, १८२, १८३। (ञ) सू० १५२, १५४। (ट) सू० १६१, ऋ० ५। (ठ) सू० १५२, १५४, १५५, १५९, १६२, १६३, १६४, १६६, १७२, १७४, १७६, १७८, १९०, १९१। (ड) सू० १६४, ऋ० ५।

तथा द्वितीया गायत्री[क] प्रसुनव इति लिङ्ग ।
संसमित्युत्तमे सूक्ते तृतीया त्रिष्टुबे[ख]व च ॥६२॥
छन्दांस्यङ्गोपाङ्गानुकीर्त्तितानि
गायत्र्यादीनि चतुर्दशानि ।
तत्तद्विशेषैः सहवैदिकानि
कल्याणदायीनि भवन्तु मह्यम् ॥६३॥
इति शौनकाचार्यविरचिता छन्दोऽनुक्रमणी समाप्ता ॥

---

(क) सू॰ १७६, ऋ॰ २। (ख) सू॰ १९१, ऋ॰ ३।

# अथ अनुवाकानुक्रमणी ।

पितृदेवर्षिसाध्येभ्यो ब्राह्मणेभ्यश्च सर्वशः ।
आचार्येभ्यो गुरुभ्यश्च प्रणम्य प्रयतः शुचिः ॥१॥
मधुच्छन्दःप्रभृतिभिर्ऋषिभिर्हि तपोबलात् ।
दृष्टानामनुवाकानामृक्षु वक्ष्याम्यतन्द्रितः ॥२॥
आदौ सूक्तपरीमाणं संख्यास्य क्रममेव च ।
मण्डले मण्डले चैव यावन्तो हि समीरिताः ॥३॥
सूक्तसंख्यानुवाकानां सूक्तानामृक्समाहिताः ।
पादाक्षरसमाम्नायं छन्दस्येव प्रतिष्ठितम् ॥४॥
एकैकमनुवाकन्तु त्रिस्नानि ब्राह्मणानि तु ।
संवत्सरे संवत्सरे पठेदहरहः शुचिः ॥५॥
श्रावणस्य तु मासस्य पौर्णमास्यामुपक्रमः ।
समाप्य तर्पयेद्देवान् पितॄनृषीननुक्रमात् ॥६॥
ऋग्वेदे शैशिरीयायां संहितायां यथाक्रमम् ।
प्रमाणमनुवाकानां सूक्तैः शृणुत शाकलाः ॥७॥
कण्वाङ्गिरोऽगस्त्यशुनका विश्वामित्रोऽत्रिरेव च ।
वसिष्ठकश्यपप्रख्या जमदग्निरथोत्तमः ॥८॥
अग्निमीळे[1] त्रिसूक्तस्तु सुरूपे[2]न्द्र[3] चतुःसूक्तौ ।

---

(अनु० १) म० १, सू० १—३ । (अनु० २) म० १, सू० ४—७ ।
(अनु० ३) म० १, सू० ८—११ ।

अग्नि[४] समान[५]मित्येतौ षट्कौ कस्ये[६]ति सप्तक ॥९॥
त्वमग्ने[७] पञ्चक विद्यात्र वोयक्ष[८]मथाष्टकम् ।
अग्ने विवस्वद्[९]भित्य[१०] नूचित्ते[११] सप्तकास्त्रय ॥१०॥
पश्वा न[१२]नवक विद्यादुपप्रयन्तो [१३]दशैकञ्च ।
वैत्निकानामनादेशे अस्मिन् ग्रन्थेऽनुवाकानाम् ॥११॥
यस्तु चर्चायते वेदे तस्य सञ्ज्ञेति न श्रुति ।
प्र ये शुभन्ते[१४] नवकमिम[१५] द्वादशक विद्यात् ॥१२॥
इन्द्र मित्र [१६]दशैवाथ नासत्याभ्या[१७] न्तु पञ्चकम् ।
कदित्था[१८]षट् पर सप्ताग्नि[१९]मा त्वा जुव [२०]षट्कम् ॥१३॥
वेदिषदे[२१] सप्तदशावोधी[२२]त्यष्टौ सूक्तानि ।
कया[२३]चिपञ्चसूक्तास्तु युवो[२४]र्द्वादशक विद्यात् ॥१४॥
इत्याद्ये मण्डले दृष्टाश्चत्वारो विंशतिश्च वै ।

---

(अनु० ४) म० १, सू० १२—१७ । (अनु० ५) म० १ सू० १८—२३ ।
(अनु० ६) म० १ सू० २४—३० । (अनु० ७) म० १ सू० ३१—३५ ।
(अनु० ८) म० १, सू० ३६—४३ । (अनु० ९) म० १, सू० ४४—५० ।
(अनु० १०) म० १, सू० ५१—५७ । (अनु० ११) म० १,सू० ५८—६४ ।
(अनु० १२) म० १, सू० ६५—७३ । (अनु० १३) म० १,सू०७४—८४ ।
(अनु० १४) म० १,सू० ८५—९३ । (अनु०१५) म०१,सू०९४—१०५ ।
(अनु०१६) म०१,सू०१०६—११५ । (अनु०१७ म०१ सू०११६—१२० ।
(अनु०१८) म०१ सू०१२१—१२६ । (अनु०१९)म०१ सू०१२७—१३३ ।
(अनु०२०) म०१,सू०१३४—१३९ । (अनु०२१)म०१,सू०१४०—१५६ ।
(अनु०२२) म०१,सू०१५७—१६४ । (अनु०२३)म०१,सू०१६५—१७९ ।
(अनु०२४) म०१,सू०१८०—१९१ ।

गौतमादौशिजः कुत्सः परुच्छेपादृषेः परः।
कुत्साद्दीर्घतमा इति एष बाष्कलकः क्रमः॥१५॥

त्वं[१] यो[२]गणाना[३]मा ते[४] दश
तृतीयैकादशास्त्रयः परे।
सोमस्य मा तवस[१]न्द्वादशोक्तं
प्र वो देवाये[२]ति सप्तदशकन्तु विद्यात्॥१६॥
इच्छन्ति त्वा[३]नवेन्द्रं मति-[४]
स्त्रिपञ्चको नवक इमं महे[५]।
त्वां ह्यग्ने[१]दश भद्रं[२] यस-[३]
स्त्वेकादशका उभाविमौ॥ १७॥
त्रयोदशायं प्र अभुभ्य [४]इरितोऽयं
पिबे[५]त्येष चापि त्रयोदश।
अबोध्यग्निः समिधा [१]चतुर्दश
अतः परोऽष्टादशकः प्रवेधसे[२] ॥१८॥

---

(अनु० १) म० २, सू० १—११। (अनु० २) म० २, सू० १२—२२।
(अनु० ३) म० २, सू० २३—३२। (अनु० ४) म० २, सू० ३३—४३।
अनु० १) म० ३, सू० १—१२। (अनु० २) म० ३, सू० १३—२९।
(अनु० ३) म० ३, सू० ३०—३८। (अनु० ४) म० ३, सू० ३९—५३।
(अनु० ५) म० ३, सू० ५४—६२।
(अनु० १) -० ४, सू० १—१०। (अनु० २) म० ४, सू० ११—२१।
अनु० ३) म० ४, सू० २२—३२। (अनु० ४) म० ४, सू० ३३—४५।
(अनु० ५) म० ४, सू० ४६—५८।
(अनु० १) म० ५, सू० १—१४। (अनु० २) म० ५, सू० १५—२९।

अभि मह्ने[१] द्वादशको विदा[२] मत्या
स्वद्राम: [३]षोडश यदद्य[४] त्रिपञ्चकः।
त्वं ह्यग्ने[१]पञ्चदश त्व[२]मष्टौ तथा
महो[३]विंशतिर्या रयिवः [४]षट्कः ॥१८॥
द्विः षड्ढ्वे व.[५] स्तुषे[६]द्विसप्तकः
षष्ठः षष्ठे मण्डले योऽनुवाकः।
अग्निं नरः [१]सप्तदशाय षोडश
लेह यत्[२] प्र शुक्रा[३]ह्यधिका तु विंशतिः ॥२०॥
क ईं व्यक्ताः[४] पञ्चदशोऽथ विंशति-
रप स्वसुः[५] पञ्चदश प्र वीरया[६]।
मा चि[१]न्महीं इन्द्र [२]इन्द्रः सुतेषु[३]
पञ्चायं मन्माष्टौ वय [४]द्विपञ्चकः ॥२१॥

---

(अनु० ३) म० ५, सू० २९—४४। (अनु० ४) म० ५, सू० ४५—५६।
(अनु० ५) म० ५, सू० ५७—७२। (अनु० ६) म० ५, सू० ७३—८७।
(अनु० १) म० ६, सू० १—१५। (अनु० २) म० ६, सू० १६—३०।
(अनु० ३) म० ६, सू० ३१—४६। (अनु० ४) म० ६, सू० ४७—६१।
(अनु० ५) म० ६, सू० ६२—६६। (अनु० ६) म० ६, सू० ६७—७५।
(अनु० १) म० ७, सू० १—१७। (अनु० २) म० ७, सू० १८—३३।
(अनु० ३) म० ७, सू० ३४—५५। (अनु० ४) म० ७, सू० ५६—७५।
(अनु० ५) म० ७, सू० ७६—८९। (अनु० ६) म० ७, सू० ९०—१०४।
(अनु० १) म० ८, सू० १—५। (अनु० २) म० ८, सू० ६—११।
(अनु० ३) म० ८, सू० १२—१८। (अनु० ४) म० ८, सू० १९—२२।

यो यजाति[५]र्द्वादशेमे[६]ह पञ्चो-
ऽग्ने[७] दशैकादशको य [८]इत्युत ।
त्रयोदश त्वन्न इन्द्र द्युमन्तं[९]
परो दशको गौर्धयत्यादि:[१०] ॥२२॥
स्वादिष्ठया[१]ऽष्टसूक्तः पवस्व[२]
विंशत्पञ्चः परः सप्तकोऽया[३] ।
प्रा[४]ष्टादशैकादशकः प्र ते[५]ऽस्य
प्रेषा [६]सप्तैकादशकः सखाय:[७] ॥२३॥
अग्ने वृहन्[१]षोडशकस्त्रयोदश
त्वष्टा[२]प्र देवत्रे[३]ति चाष्टादशाच्छा[४] ।
अष्टाविदं[५] षोडशकस्तु भद्रा:[६]

---

(अनु० ५) म० ८, सू० ३१—४२ । (अनु० ६) म० ८, सू० ४३—४८ ।
(अत: परं ११ एकादश सूक्तानि बालखिल्यम्) ।
(अनु० ७) म० ८, सू० ६०—६९ । (अनु० ८) म० ८, सू० ७०—८० ।
(अनु० ९) म० ८, सू० ८१—९३ । (अनु० १०) म० ८, सू० ९४—१०३ ।
(अनु० १) म० ९, सू० १—२४ । (अनु० २) म० ९, सू० २५—६० ।
(अनु० ३) म० ९, सू० ६१—६७ । (अनु० ४) म० ९, सू० ६८—८५ ।
(अनु० ५) म० ९, सू० ८६—९६ । (अनु० ६) म० ९, सू० ९७—१०३ ।
(अनु० ७) म० ९, सू० १०४—११४ ।
(अनु० १) म० १०, सू० १—१६ । (अनु० २) म० १०, सू० १७—२९ ।
(अनु० ३) म० १०, सू० ३०—४२ । (अनु० ४) म० १०, सू० ४३—६० ।
(अनु० ५) म० १०, सू० ६१—६८ । (अनु० ६) म० १०, सू० ६९—८४ ।

सत्येन[७] षट् सं [८]नवेन्द्र [९]त्रयोदश ॥२४॥
तमस्य द्यावापृथिवी[१०]अष्टकः
परस्तयोर्विंशतिनां सदासीत्[११] ।
ऋग्वेदान्त्यो द्वादशकोऽनुवाक-
श्चत्वारिंशच्चाम इत्ये[१२]ति चास्मिन् ॥२५॥
आद्ये चतुर्विंशतिरिहानुवाका
अतः परं मण्डलं यच्चतुष्कम् ।
द्वे पञ्चके त्रीणि षट्कानि चैव
दशाष्टमं सप्त नवमं द्वादशान्त्यम् ॥२६॥
एकाधिका स्यान्नवतिः शतञ्च
वदन्ति वै मण्डलमादितो यत् ।
चत्वारिंशत्त्रीणि चाहुर्द्वितीयं
सूक्ते च षष्टिश्च तृतीयमाहुः ॥२७॥
अष्टापञ्चाशत्त्वपि यच्चतुर्थं
सप्ताधिकाशीतिरतः परं स्यात् ।
पञ्चाधिका सप्ततिरुत्तरन्तु
चत्वारि वासिष्ठमथो शतञ्च ॥२८॥
द्वे चैव सूक्ते नवतिश्च विद्या-

---

(अनु०७) म० १०, सू० ८५—९० । (अनु०८) म०१०, सू० ९१—९९ ।
(अनु०९) म०१०,सू०१००—११२ । (अनु०१०)म०१०सू०११३—१२८ ।
(अनु०११)म०१०,सू०१२९—१५१ । (अनु०१२)म०१०,सू०१५२—१९१ ।

दशाष्टम नवम वै शत स्यात् ।
चतुर्दश त्वाऽरथाधिकान्य-
स्याद्ये यदुक्त दशमे तथैव ॥२८॥
एतत्सहस्र दश सप्त चैवा-
ष्टावतो बाष्कलकेऽधिकानि ।
तान् पारणे शाकले शैशिरीये
वदन्ति शिष्टा न खिलेषु विप्राः ॥३०॥
पञ्चाशीतिर्दाशतयेऽनुवाका
दृष्टा पुराणर्षिभिर्मेधात्मभि ।
यस्तानृग्निदेद् वैवाप्यधीते
स नाकपृष्ठ भजते ह शश्वत् ॥३१॥
अध्यायानां चतुःषष्टिर्मण्डलानि दशैव तु ।
वर्गाणा तु सहस्रे द्वे सङ्ख्याते च षडुत्तरे ॥३२॥
सहस्रमेतत् सूक्ताना निश्चित खैलिकैर्विना ।
दश सप्त च पथन्ते सङ्ख्यात वै पदद्वयम् ॥३३॥
एकर्च एकवर्ग स्यादेकस्य नवकस्तथा ।
द्वौ वर्गौ तु खचौ ज्ञेयो न्यून त्र्यशत स्मृतम् ॥३४॥
चतुष्क शतमेकञ्च चत्वार सप्ततिस्तथा ।
पञ्चकाना सहस्रन्तु द्वे च सप्तोत्तरे शते ॥३५॥
त्रीणि च शतानि षट्काणाञ्चत्वारिंशत् षड्वर्गाः ।
शतमूनविंशक सप्तकानां न्यूना षष्टिरष्टकानाम् ॥३६॥
ऋचा दशसहस्राणि ऋचां पञ्चशतानि च ।

ऋचामशीतिः पादश्च पारणं सम्प्रकीर्तितम् ॥२७॥
अर्धर्चानां सहस्राणामेकविंशतिकं तथा।
शतद्वयन्तु द्वात्रिंशत् सपादं मुनिभिः पुरा ॥२८॥
शाकल्यदृष्टे पदलक्षमेकं
सार्धञ्च वेदे त्रिसहस्रयुक्तम्।
शतानि चाष्टौ दशकद्वयञ्च
पदानि षट् चेति च चर्चितानि॥२९॥

एकञ्च दशसहस्रं दश च सहस्राणि सप्त च शतानि चर्चापदानि ज्ञेयानि पदानि चान्यानि चत्वारि। चत्वारि वा शतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि॥

इत्यनुवाकानुक्रमणी समाप्ता॥

---

NOTE —The last 21 pages had not the benefit of the late Raja Rajendralala Mitra's revision.

BHARATIYA VIDYA BHAVAN LIBRARY. S N

पार्थिवो द्रविणोदा(क)ग्नि(१) पुरस्ताद्यस्तु कीर्त्तित ।
तमाहुरिन्द्र दाढ्या(२)द्के तु बलवित्तयो ॥६१॥
अय हि द्रविणोदाऽग्निरय दाता बलस्य हि ।
द्रविणोदाग्निरेवाय द्रविणोदा(ख)स्तदोच्यते ॥६२॥
आग्नेयेष्ववदृश्येत(३) प्रवादाद्द्रविणोदस ।
(४)ऐन्द्रस्य नवकस्येह(५) यदैन्द्रावरुण परम् ॥६३॥

---

(१) द्रविणोदोऽग्निरिति क॰ ख॰ घ॰ ।

(२) अतिदाढ्यादिति ङ॰ पुस्तकान्तरञ्च ।

(३) आग्नेयेष्वेव दृश्यन्ते इति ग॰ ।

(४) ख॰ ङ॰ चिह्नितपुस्तकयो, पुस्तकान्तरे च ऐन्द्रस्य नवकस्येहेति श्लोकार्द्धात्मक, द्रविणोदाग्निरेवायमिति श्लोको न विद्यते । तत्र,—

जायते च बलेनायमध्वर्युभिरध्वरे ।
हवींषि द्रविणा प्राहुर्हविषो यत्र जायते ॥
दातारस्त्वृत्विजस्तेषां द्रविणोदास्तत स्वयम् ।
ऋषीणा पुत्र इत्येषां दृश्यते सहसोपदे ॥
मथ्यमाद्वा यतो जज्ञे तस्माद्वा द्रविणोदस ।

एतत् षाड्श्लोकद्वय दृश्यते । ङ॰ चिह्नितपुस्तके द्रविणोदस इत्यत्र द्राविणोदस इतिपाठ, पुस्तकान्तरे च अध्येतीत्यत्र अध्येत्विति पाठोऽस्ति ।

(५) नवकस्यादिति ङ॰ पुस्तकान्तरञ्च ।

---

(क) ऋ॰ १, १५ १० । (ख) ऋ॰ १, १५, ७ ।

तस्योत्तरं तु (१)सोमानं स्तूयते ब्रह्मणस्पतिः ।
ऋग्भिः पञ्चभिराद्याभि(२)स्तिसृभिः सदसस्पतिः ॥६४॥
नराशंसो(क)ऽन्यया चर्चा सोमेन्द्रौ तु निपातितौ ।
चतुर्थ्यां सोम इन्द्रश्च पञ्चम्यां दक्षिणा सह(३) ॥६५॥
प्रसङ्गाद्दक्षिणा प्रोक्ताः सम्बन्धाः स्वामलोकयोः ।
प्राजापत्यं तथैन्द्रः स्यादिति तस्येह नामनी(४) ॥६६॥
कथिते द्वे च षट्चान्यान्येषाद्याद्याः(५) प्रजापतिः ।
(६)शिष्टानि यानि नामानि तानि वक्ष्याम्यतः परं ॥६७॥
सप्तभिः कश्च कामश्च सदसस्पतिरेव च ।
ब्रह्मस्पति(७)र्वाचस्पतिस्तत(८)स्तु ब्रह्मणस्पतिः ॥६८॥
तृतीयान्ते तु सूक्तस्य चतुर्थं(९) पञ्चमश्च यत् ।

---

(१) तस्योत्तरे चेति क० ख० च० ।
(२) अन्याभिरिति ख० ।
(३) तथेति क० ख० ।
(४) यानि तस्येह नामानि प्राजापत्यानि तानि चेति ख० पुस्तकान्तरञ्च ।
(५) कथितानीह यद्यानि तेषां स्यात् इति ख० पुस्तकान्तरञ्च ।
(६) शिष्टानीति श्लोकार्द्धं क० ग० घ० च० चिह्नितपुस्तकेषु न दृश्यते ।
(७) इन्द्रस्पतिरिति क० ।
(८) स्तुत इति ग० च० ।
(९) प्रथममिति ख० ङ० पुस्तकान्तरञ्च ।

---

(क) ऋ० १, १८, ९ ।

चतुर्भिरितरैस्तत्र(१) न सूक्तं प्राप्नुयुष्यते(२)॥६८॥
सर्वाण्येव तु सर्वासां देवतानां प्रजापतेः ।
नामानि कथयन्त्येते सम्यग्भक्तिविदृष्वः ॥७०॥
तदाङ्गैर्नैतदेवं स्यादष्टानामेव(३) हि स्तुतः ।
तैरेव चास्य कल्प्यन्ते(४) क्रतवश्च हवींषि च ॥७१॥
सहर्क्षिर्मध्यमस्थानैः पर(५) मग्निस्तु पार्थिवः ।
नवकेनेह(६) सूक्तेन प्रतीत्य(७)(क)मिति संस्तुतः ॥७२॥
मरुतां साहचर्य्यात्तु(८) सूक्तेऽस्मिन्नाग्निमारुते ।
मन्यते माध्यमस्त्वेव(९) यास्कोऽग्निं न तु पार्थिवम् ॥७३॥
स्यादयं पार्थिवस्त्वेव(१०) तथा रूपं हि दृश्यते ।

---

(१) स्तेनमिति क० घ० च० ।
(२) नापि सूचोऽश्नुते इति क० घ० च०, नानाप्यृचोऽश्नुते इति ग० ।
(३) एव इति ख० ग० ड० ।
(४) तैरेवास्य प्रकल्प्यन्ते इति ख० ड० पुस्तकान्तरञ्च ।
(५) वर्यमिति क० ग० घ० च० ।
(६) नवर्चेनेहेति ड० पुस्तकान्तरञ्च ।
(७) प्रत्यञ्चमिति ड० ।
(८) वेति ड० ।
(९) मध्यमं त्वेवमिति ख० ड० पुस्तकान्तरञ्च ।
(१०) पार्थिवश्चैवेति ड० पुस्तकान्तरञ्च ।

---

(क) ऋ० ७, ६८, ६ ।

भूयसे(क) वीतये(ख) चेति(१) वैद्युतेन तदस्ति हि(२) ॥७४॥
अथ स्याद(३)भिधानस्य देवतायाः पृथक् पृथक्(४)।
ऋचोऽर्धर्चस्य पादस्य कथञ्जायेत(५) दैवतम् ॥७५॥
यथा निविदि सावित्र्यां स्तूयते कर्म कर्मणा(६)।
दोग्ध्री धेनु(ग)र्वोढानड्वानाशुः सप्तिपुरं धिया:(७) ॥७६॥
यथा वरुणमित्रीया(८) वरुणः प्राविता भुवत्(घ)।
सूक्तप्रायेणैभिरग्ने(९) परीक्ष्य(१०) तत्र देवताः(११) ॥७७॥
शब्दानां द्वैपदादीनां द्विदैवतकदैवतम्।
असंस्तुतं संस्तुतवदप्रदिष्टं दैवतं क्वचित् ॥७८॥

---

(१) ऊयसे तीतये चैतदिति क॰ घ॰ च॰।
(२) वैद्युतेनेत्यतस्त्विहेति ख॰ ङ॰।
(३) स्यतश्चिदिति ङ॰ पुस्तकान्तरेषु।
(४) स्तुतौ स्तुताविति ग॰ ङ॰ पुस्तकान्तरेषु।
(५) मायेतेति ख॰ ङ॰ पुस्तकान्तरेषु।
(६) सूर्यकर्मणेति ङ॰ पुस्तकान्तरेषु।
(७) तथैव चेति क॰ घ॰ च॰।
(८) यथा च ग्रम्नो मित्रीया इति क॰ घ॰ च॰।
(९) चाग्नेरिति ख॰ ङ॰ पुस्तकान्तरेषु।
(१०) परीक्ष्य इति ग॰।
(११) परीक्ष्यस्तत्र संस्तवः इति ङ॰ पुस्तकान्तरेषु।

---

(क) ऋ॰ १, १८, २। (ख) ऋ॰ १, ५, ६।
(ग) ऋ॰ ५, ११, ७। (घ) ऋ॰ १, १६, ८।

यत्र द्विदेवते मन्त्र एकवद्देवतोच्यते ।
विभक्ष्यति तद्विद्यात् बह्व्यबह्वश्च तत्[१] ॥७९॥
आशीर्वादेषु संज्ञास्तु कर्मसंज्ञासु देवताः ।
बह्वो हि बहुवचन[२] द्विवद्वौ यत्र संस्तुतौ[३] ॥८०॥
सुधन्वन[क] आङ्गिरसस्या[ख]सन् पुत्रास्त्रयः पुरा[४] ।
ऋभु[ग]र्विभ्वा[घ][५]च वाज[ङ]श्च[६]शिष्यास्ते त्वष्टुरेव च[७] ॥८१॥
शिक्षयामास तांस्त्वष्टा त्वाष्ट्रं यत्कर्म किञ्चन ।
परिनिष्ठितकर्माणो विश्वेदेवा उपाह्वयन् ॥८२॥
धेनुं सर्वदुघां चक्रुस्तं सवदुच्यते ।
इहतश्चतयेऽश्विभ्यां रथं दिव्यं त्रिवन्धुरम् ॥८३॥
इन्द्राय च हरी देवमहितेनाग्निनापि यत् ।

---

(१) बह्वल्पबह्वश्च यदिति ख॰ पुस्तकान्तरञ्च ।
(२) बह्वो हि बहुवाच्यन इति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(३) द्विपदे यत्र संस्तुते इति क॰ ग॰ घ॰ च॰ ।
(४) आसन् सुधन्वनः पुत्रास्त्रय अङ्गिरसश्च ये इति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(५) विभ्वेति ग॰ घ॰ ।
(६) वायुश्चेति ख॰ ।
(७) त्वष्टुश्च तेऽभवन्निति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च ।

---

(क) ऋ॰ ५, ४२, ११ । (ख) ऋ॰ ४, ४०, १ । (ग) ऋ॰ १, ११०, ७ ।
(घ) ऋ॰ १, १११, १ । (ङ) ऋ॰ १, २७, ८ ।

एकस्य चमसमित्युक्ते ज्येष्ठो[१] द्वावित्यथाह च ॥८४॥
उक्त्वा ततश्चतुरस्त्वन्ययोर्मतं तत्र हर्षिताः ।
त्वष्टा च सविता[२]चैव[३] देवदेवप्रजापतिः ॥८५॥
सर्व्वान् देवान् समामन्त्र्य चामृतत्वं ददुश्च ते ।
तेषामाद्यन्तयो[४] नाम्ना दृश्यते बहु वस्तवः[५] ॥८६॥
विश्वेषां ते ततश्च[६]वाहनान्यायुधानि च ।
तृतीयसवने तेषां तैस्तु भागः प्रकल्पितः ॥८७॥
अपिब[क]त्सोममिन्द्रस्य तैस्तत्र सवने[७] [ख]सह ।
तेषां स्तुतिरिन्द्रसूक्तमथ[८]मित्यार्भवं[९] परम् ॥८८॥

---

(१) श्रेष्ठेति पुस्तकान्तरं ।
(२) सवितेति छ० ।
(३) चैवेत्यत्र चैवेतिपाठः समीचीनः ।
(४) आद्यन्तयोरिति सविसर्गान्तपाठो युक्तः ।
(५) धेनुं सवर्दुघामित्यदि दृश्यते बहुवस्तवः इत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु न विद्यते । दृश्यते बहुवस्तव इत्यत्र, दृश्यन्ते बहव-स्तवा इति पाठः साधुः ।
(६) ततस्ततश्चक्रे तद्वदिति छ० पुस्तकान्तरञ्च ।
(७) सवनैरिति ग० ।
(८) त्र्यृचमिति क० ग० घ० च० ।
(९) इत्यष्टकमिति ग०छ० पुस्तकान्तरञ्च ।

---

(क) ऋ० १, १७, २। (ख) ऋ० १, १६, ५।

इहेन्द्राग्नी स्तुतौ देवौ तृतीयस्यादिरश्विनौ[१]।
हिरण्यपाणिं[२] सावित्रौ तिस्रश्चाप्यत[३] उत्तराः[४] ॥८९॥
एकाग्नेर्दे तु देवानां[५] द्वादश्यो देवपत्नयः।
इन्द्राणी वरुणानी च आग्नेयी[६] च[७] पृथक् स्तुताः ॥९०॥
द्यावापृथिव्यौ द्वे च स्यात् स्योना[क]दित्येव पार्थिवी[ख][८]।
देवानां वात इत्येषा[९] सूक्तशेषस्तु वैष्णवः ॥९१॥
वायोस्तोत्रेन्द्रवायुभ्यां द्वृचौ द्वाभ्यां[१०] ततः परम्।
ऋचे[११] मित्रावरुणयोस्तथेन्द्राय मरुत्वते ॥९२॥

---

(१) स्यादितोऽश्विनाविति ङ॰ पुस्तकान्तरञ्च।
(२) हिरण्यपाणिरिति पाठो युक्तः।
(३) ऽप्यन्य इति ख॰, सावित्र्यस्ततोऽप्यत इति ङ॰ पुस्तकान्तरञ्च।
(४) चतस्रश्चाप्यथोत्तराः इति ग॰।
(५) च देवीनामिति ङ॰ पुस्तकान्तरञ्च।
(६) चाग्नायीति ख॰ ङ॰ पुस्तकान्तरञ्च।
(७) ता इति ख॰ ङ॰ पुस्तकान्तरञ्च।
(८) मह्यौ द्वे स्योनेत्यृक् पार्थिवी स्तुतेति ङ॰।
(९) व्रतो देवा इति देवीति क॰ घ॰ च॰।
(१०) त्र्यृचौ द्वाभ्यामिति क॰ ग॰ घ॰ ङ॰ पुस्तकान्तरञ्च, तृचस्ताभ्यामिति ख॰ ङ॰।
(११) तृचः इति ग॰ ङ॰ पुस्तकान्तरञ्च।

---

(क) ऋ॰ १, २२, १५। (ख) ऋ॰ ८, २५, ९।

एषो(१) विश्वेषां देवानां पूष्ण आघृणये(क) ऽष्टचः(२) ।
अभक्तो हि हविष्मत्सु दृप्तः पूर्णो दृतौ(ख) रथे(३) ॥८३॥
आघृणिस्तद्युतः पूषा स गोभिरिध्यते यतः(४) ।
यथा हि मधुनः पूर्णो दृतिर् स्तौति चाश्विनौ(५) ॥८४॥
आवर्त्तनिं मधुनेति दृतेरिव च दृश्यते(६) ।
अर्धाऽष्टमा ऽपां ज्ञेया अर्धर्चान्याग्निदेवता(७) ॥८५॥
कस्य नूनन्तु काय्यायाः आग्नेय्यृक् सवितुस्तृचः ।
भगभक्तस्य(ग) भागो वा परं यदिति(८) वारुणम्(९) ॥८६॥
अभिप्यावोति चाग्नेये चाग्नेर्मध्यमस्य तु ।

---

(१) एष इति ग० घ० ङ० च० ।
(२) आघृणयेति चेति ख०, आघृणिरित्यृचः इति ग०, तस्मादृग्भर्यमिति चेति ङ० ।
(३) दृतौ रथे इति ङ० पुस्तकान्तरेषु ।
(४) गोभिर्गोभिरिध्यते ततः इति ख० ।
(५) स्तौति यौति चाश्विनाविति ख०, चाश्विनौ इति ङ० ।
(६) अभक्तो हि हविष्मत्स्वित्यादि दृतिरेव च दृश्यते इत्यन्तपाठः क० ग० घ० च० चिह्नितपुस्तकेषु न दृश्यते ।
(७) अर्धाङ्गान्याग्निदेवतेति ख० ङ०, अर्धर्चान्याग्निदेवतेति ङ० ।
(८) हि एवेति ग० ।
(९) इन्द्रियादि वारुणे इति ङ० ।

---

(क) ऋ० १,४२,१०। (ख) ऋ० ४,४५,१। (ग) ऋ० १,२४,५।

जराबोधे(क)ति विज्ञेया वैश्वदेव्युत्तमोत्तमा(१) ॥९७॥
पराश्चतस्रो यास्त्वैन्द्रे चेन्द्रोलूखलयोः स्तुतिः(२)।
मन्येते(३) यास्ककात्थक्या(४)विन्द्रस्येति तु भागुरिः ॥९८॥
यच्चिद्ध्युलूखलस्य द्वे द्वे परे मुसलस्य तु।
चर्माधिषवणीयं(५) वा सोमं वान्या प्रशंसति ॥९९॥
ऐन्द्रं यच्चिद्धि सत्येत्युत्तरस्त्वाश्विनात्तृचात्(६)।
आश्विनादुत्तरस्त्वन्य उषस्य(७) स्तृच उत्तमः ॥१००॥
स्तूयमानः शश्वदिति प्रीतस्तु मनसा ददौ।
शुनःशेपाय(ख) दिव्यन्तु रथं सर्वं हिरण्मयम् ॥१०१॥
आग्नेयं सूक्त(८)मैन्द्रे च(९) चिच्चिदित्याश्विनं ततः।
स्तुतेऽर्थवादं कर्मैतदिन्द्रस्येति तु शंसति ॥१०२॥
पादोऽग्ने क्रयामीति मैत्रावरुण उत्तरः।

---

(१) वैश्वदेव्युत्तमागमः इति क० ग० घ० च०।
(२) यन्त्रेति मुसलोलूखलस्तुतिरिति ङ० पुस्तकान्तरञ्च।
(३) मन्येतामिति ख० ङ० पुस्तकान्तरञ्च।
(४) याक्षकाण्ड्यादिति ङ० पुस्तकान्तरञ्च।
(५) चर्माधिषवणीये इति ख०।
(६) आश्विनं तृचमिति ङ०।
(७) आश्विनेत्युत्तरं वस्तु चौषस्य इति ङ० पुस्तकान्तरञ्च। वस्तु इत्यत्र वस्त्विति ख०।
(८) सूक्तमिति ख० ग० ङ० पुस्तकान्तरञ्च।
(९) द्वे इति ख०।

---

(क) ऋ० १,२७,१०। (ख) ऋ० १,२४,१२।

तृतीयो रात्रिसंस्तावः(१) सूक्तं सावित्रमुच्यते ॥१०३॥
पश्चेमानि जगौ दृष्ट्वा(२) सूक्तान्याङ्गिरसो मुनिः ।
हिरण्यस्तूपतां प्राप्य(३) सख्यं चेन्द्रेण साम्यताम् ॥१०४॥
आग्नेयं प्रेति मारुतं क्रौञ्चं(४) (क)बौधि पराश्रतः ।
शक्रमुद्(५)ब्राह्मणस्पत्यं यं रथमिति पयप्रुपाः ॥१०५॥
वरुणार्यमभिधानो मध्य आदित्यदैवतः ।
पौष्णं सम्पूषन्(६) पञ्चोत्र(७)प्रतीया न तु केवला ॥१०६॥
मित्रेण वरुणेनाथ(८) विश्वैर्देवैश्च संस्तवः ।
उभमर्चविंशा पूर्वमादित्यादैवतं विना ॥१०७॥
ज्ञातुं न शक्यते भिन्नात्मपापि कश्चिदुच्यते ।
आदित्या वसवो रुद्रास्तस्मात् इति च श्रुताः ॥१०८॥
अतः सौम्योऽग्र(९) आग्नेये प्रगाथेनाश्विनौ स्तुतौ ।

---

(१) रात्रिः स्तुता सवितेति घ० ।
(२) दृष्टेति ग० ङ० घ० पुस्तकान्तरेषु ।
(३) प्राप्य इति घ० ।
(४) क्रौञ्चमिति पुस्तकान्तरं ।
(५) शक्तिदृष्टेति ग० घ० पुस्तकान्तरेषु ।
(६) सम्पूषन्निति पाठो विशुद्ध ।
(७) पौष्णं सम्प्रयोगेति ङ० पुस्तकान्तरेषु ।
(८) वरुणेनाथेति ग० घ० पुस्तकान्तरेषु ।
(९) सौम्यश्च इति पुस्तकान्तरं ।

---

(क) ऋ० १, १८, १ ।

महोपमा लिङ्गभाजा वय सोम सुदानव[१] ॥१०९॥
अर्धर्चौ देवदेवत्य एष इत्याश्विने परे।
आदित्य मन्यते यास्को हविषेति[२] सहस्तुत[३] ॥११०॥
महोपसे तत सौर्य्यमुदुत्यमिति मस्तुलम्।
भक्तिर्येन वरुणोद्यु रोगघ्नस्तृच उत्तम ॥१११॥
रोगोपनुच[४]माद्याभ्यामुद्यन्नित्युक्तमे त्वृचे।
अर्धर्चं तु द्विषद्वेष ऐन्द्र सव्य[५] (क)शतर्चिषु ॥११२॥
स्वयमिन्द्रसम पुत्रमिच्छन्नोऽङ्गिरसो मुने।
वज्रेव[६] सव्यो भूत्वर्षि[७] यौगिलात्पुत्रलाङ्गत ॥११३॥
प्रथमे मण्डले ज्ञेया ऋषयस्तु शतर्चिन।
क्षुद्रसूक्तमहासूक्ता अन्ये मध्येषु मध्यमा[८] ॥११४॥

---

(१) उक्तमत्रर्षिर्योत्यादि वय सोम सुदानव इत्यन्तपाठ क० ग० घ० च० चिह्नितपुस्तकेषु न विद्यते।
(२) हविषेति पुस्तकान्तरे।
(३) आदित्यमित्यादि श्लोकार्द्धं क० ग० घ० च० चिह्नितपुस्तकेषु नोप लभ्यते।
(४) रोगापनुद्धीति ग०, रोगापनुत्तिविति ङ०।
(५) अर्द्धर्चन्तु द्विषद्द्वेषदैन्द्राणश्चेति ङ०।
(६) वज्रे चेति ङ०।
(७) भूत्वर्यैरिति क० ग० घ० च०।
(८) प्रथमे मण्डले ज्ञेयेत्यादि अन्ये मध्येषु मध्यमा इत्यन्तपाठ क० घ० च० चिह्नितपुस्तकेषु नैष्यते।

---

(क) ऋ० १, ८८, ५।

नवकं जातवेदस्यं नूचिवत्तु वया इति ।
वैश्वानरीयं तत्सूक्तमाग्नेयन्तु ततः परम्[1] ॥११५॥
ऐन्द्राग्नश्चे तत[2]स्त्रीणि त्वमे ग्रधाय[क] मारुतम् ।
आग्नेयानि तु पश्चे[ख]ति नवगश्वद्धि वामिति[3] ॥११६॥
[4]द्मग्राश्विनानीमानीति इन्द्रावरुणयोः स्तुतिः ।
सौपर्ण्यास्तु काश्चिच्च[5] निपात[6]स्तुतिषु स्तुताः ॥११७॥
उपप्रयन्तः[ग] सूक्तानि आग्नेयान्युत्तराणि षट् ।
हिरण्यकेशो[घ] रजसस्तृचोऽग्नेर्मध्यमस्य तु ॥११८॥
इत्येति[7] पञ्च लैन्द्राणि[8] यामित्यस्यां निपातिताः ।

---

(१) वह्निमाग्नेयमुत्तरमिति ख० छ० पुस्तकान्तरञ्च ।
(२) इन्द्रः इति छ० ।
(३) नवपड्ढैमदानि त्विति छ० पुस्तकान्तरञ्च ।
(४) छ० चिह्नितपुस्तके पुस्तकान्तरे च, दस्राश्विनानीति श्लोकार्द्धस्थले, उपान्त्यं समभेऽर्द्धर्चं न मैनावयं विदुरिति पाठोऽस्ति ।
(५) याः काश्चिदिति ग० छ० पुस्तकान्तरञ्च ।
(६) निपाताः इति छ० पुस्तकान्तरञ्च ।
(७) इत्येतीति ख० छ० पुस्तकान्तरञ्च ।
(८) चैन्द्राणीति छ० पुस्तकान्तरञ्च ।

---

(क) ऋ० १, ३७, ४ । (ख) ऋ० १, ६५, १ । (ग) ऋ० १, ७४, १ ।
(घ) ऋ० १, ७६, १ ।

दध्य[क]ङ्ङृतुरथर्वा च मारुतानि प्रये ततः ॥११९॥
अलाय्यानो[ख] वैश्वदेवे द्वे देवानां स्तुतिर्मता[1] ।
आनोभद्रास्य देवानां भद्रं यावच्छतं पुनः ॥१२०॥
मधुवातास्तृचे तस्मिन् परमं मध्वपीष्यते ।
आम्यर्या मम इत्येषां वैश्वदेवी प्रगिष्यते[2] ॥१२१॥
[3]अदितिर्द्यौरिति त्वस्यां विभूतिः कथिता[4]दितेः ।
त्वं सोममसौम्यमौपम्य[5] मेता उत्यास्तृचोऽश्विनोः ॥१२२॥
अग्निनाग्नेय[6] सोमस्य अग्नीषोमाविति स्तुतिः[7] ।

---

(१) अलाय्यान इति स्थले देवाना स्तुतिरपरेति क० ख० घ० च०, अला॰ य्यांनो इत्यत्र अलाय्यामाविति ख० ।
(२) आनो भद्रास्य देवानामित्यादि वैश्वदेवी प्रगिष्यते इत्यन्तपाठः क० घ० च० चिह्नितपुस्तकेषु नोपलभ्यते ।
(३) पुस्तकान्तरे, अदितिर्द्यौरिति श्लोकार्द्धं, आनो भद्रायेति श्लोकार्द्धात् पूर्वं पठितं ।
(४) कथ्यते इति ख० घ० पुस्तकान्तरञ्च ।
(५) मेकम्यमिति ख०, मेधाव्यमिति क० घ० च० ।
(६) अग्निनाग्नि तमिति क० घ० च० ।
(७) विश्वं स्तुमे इति घ० पुस्तकान्तरञ्च ।

---

(क) ऋ० १, ८०, १६ । (ख) ऋ० १०, ४४, ५ ।

गोतमाद्दौगिरः[क] कुत्सपरुच्छेपादृषेः[1] परः ॥१२३॥
इमं कुत्स[ख] आङ्गिरसो ददर्शजातवेदसं जगाद षोड़शर्चं।
पूर्वा देवा इत्यृचो देवदेवास्त्रयः पादा उत्तमायास्ततोऽर्द्धम् ॥१२४॥
तस्यैव वा यस्य तत्पूर्वसूक्तं मित्रादिभ्यो वात्र[2] षड्भ्यः प्रकृताभ्यः।
अन्त्योऽर्धर्चः षणां स्तुतानां पूर्वा देवाः पादैः स्तुतिभिः स्तुताः[3] ॥१२५॥
भरद्वाजे गृत्समदे वसिष्ठे नोधस्य[ग] गस्त्ये विमदे नभाके[घ]।
कुत्सेनोदर्के[4] बहुदेवतेषु तथा द्विदेवेषु समानदेवधर्म्माः[5] ॥१२६॥

---

(१) गोतमो नाम य ऋषिः कुत्स आङ्गिरस इति क॰ घ॰ च॰।

(२) वात्रेत्यत्र स्तुताग्रा इति क॰ घ॰, स्तुताग्रौ इति च॰।

(३) ङ॰ चिह्नितपुस्तके पुस्तकान्तरे च,—

इमं कुत्स आङ्गिरसो ददर्श जातवेदसम्।
कुत्साद्दीर्घतमास्त्वेयमध्ये तावत्त्वधीयते॥
पूर्व्वा देवास्ततो देवास्त्रिभिः पादैस्तु संस्तुताः।
षोडशर्चं तथा सूक्तं जगाद चतुरित्यसौ।
अन्त्येऽर्द्धर्चे तु वा षण्णां लिङ्गोक्तानां स्तुतौ गताः॥

इति पाठो वर्त्तते।

क॰ घ॰ च॰ चिह्नितपुस्तकेषु, कुत्साद्दीर्घतमास्त्वेतीति श्लोकार्द्धस्थाने कुत्साद्दीर्घतमा इति ते द्वे एवमधीयते। इति पाठोऽस्ति। इतीत्यत्र ग्रन्थदिति ग॰।

(४) कुत्सेनोदर्केति क॰ घ॰ च॰।

(५) समानधर्म्मिण इति ख॰ ग॰ ङ॰ पुस्तकान्तरञ्च।

---

(क) ऋ॰ १, १८, १। (ख) ऋ॰ १, १०६, ६। (ग) ऋ॰ १, ६१, १४। (घ) ऋ॰ ८, ४०, ७।

द्वे विरूपे सूक्तमौषसमाग्नये(१) समित्स्रये(क)ति द्रविणोदसेऽग्नये ।
वैश्वानरस्येति(२) वैश्वानरीयसूक्तमस्मात्पूर्व्वं षडृचयेऽग्नये पुनः ॥१२७॥
जातवेदस्यं सूक्तमस्मान्नेक ऐन्द्रात्पूर्व्वं काश्यपार्षं वदन्ति ।
जातवेदसे सूक्तमाद्यन्तु तेषामेकभूयस्त्वं मन्यते शाकपूणिः ॥१२८॥
हृषाद्या(३) सहस्रर्चान्तं सूक्तं नानाविधं भवेत् ।
नवनवतिः पञ्चशता ऋचः स्युः सहस्रं शतम् ॥१२९॥
नानादैवतमेकार्षं छन्दोभिश्चित्रमुत्पयम्(४) ।
(५)सयोरूपेन्द्राणि पञ्च वैश्वदेवानि चन्द्रमाः ॥१३०॥
चौथ्यैन्द्राग्नेय इन्द्राग्नी ततमित्यार्भवे परे ।
चित(ख) गास्तनुगच्छन्तं क्रूराः श्यामा(६) दक्षौ(ग) सुताः ॥१३१॥

---

(१) सौषस्यमग्नेयेति ङ० पुस्तकान्तरं ।
(२) वैश्वानरस्येति ये इति ग० ।
(३) हृषादमिति पाठ शुद्ध ।
(४) वैश्वानरस्येति वैश्वानरीयमित्यादि छन्दोभिश्चित्रमुत्पयमित्यन्तपाठ क० ख० घ० चिह्नितपुस्तकेषु न विद्यते । जातवेदस्यं सूक्तमस्मानि-त्यादि छन्दोभिश्चित्रमुत्पयमित्यन्तपाठ ग० चिह्नितपुस्तके न दृश्यते । हृषाद्या सहस्रर्चान्तमित्यादि छन्दोभिश्चित्रमुत्पयमित्यन्तपाठ ङ० चिह्नितपुस्तके नेक्षते ।
(५) क० ख० घ० चिह्नितपुस्तकेषु सयोरूपेन्द्राणीति श्लोकात् प्राक्, अयमः शुचयेऽग्नये वैश्वानरीय जातवेदस इति जातवेदस्यम् । इत्य-धिकं पठितम् ।
(६) श्यामेति ग० घ० ।

---

(क) ऋ० १, ६६, १ । (ख) ऋ० ७, ३४, १० । (ग) ऋ० १, ११०, १८ ।

कूपे प्रक्षिप्य गाः(१) सर्वास्तत एवापजह्रिरे(२) ।
स तत्र सुषुवे सोमं मन्त्रवि(३)न्मन्त्रवित्तमः ॥१२२॥
देवांश्चावाह्यन् सर्वांस्तच्छुश्राव बृहस्पतिः ।
आगच्छतोऽथ तान् दृष्ट्वा स वसत्यस्य तत्स्थलम् ॥१२३॥
सर्व्वं दृक्कश्च वरुणस्यार्य्यम्ण इत्युपालभत् ।
कूपेष्टकाभिर्व्रणितान्यङ्गान्येवाभवन्मम ॥१२४॥
दृष्ट्वा सर्व्वानहं स्तौमि यद्यप्येको न पश्यति(४) ।
बृहस्पतिप्रचोदिता विश्वेदेवगणास्तथः ॥१२५॥
जग्मुस्ते(५) तस्य तं यज्ञं भागांश्च जगृहुः सह ।
बृहस्पति(६)स्त्रितस्यैतत्(७) ज्ञानं विज्ञानमेव च ॥१२६॥
तृचेनान्येन सूक्तेन जगादर्षिरसाविति ।
द्यावापृथिव्यावीलेति आग्नेयः(८) पाद उत्तरः ॥१२७॥
आश्विनः सूक्तशेषः स्यादिदं राव्युपसोः स्तुतिः ।

---

(१) ता इति ख॰ ग॰ ङ॰ पुस्तकान्तरेषु ।

(२) एवाप्य जह्रिरे इति ख॰ पुस्तकान्तरेषु ।

(३) तत्र सोमं सुषावासौ मन्त्रवदिति ङ॰ पुस्तकान्तरेषु ।

(४) आगच्छतोऽथेत्यादि यद्यप्येको न पश्यतीत्यन्तपाठः क॰ ग॰ घ॰ च॰ चिह्नितपुस्तके नोपलभ्यते ।

(५) आजग्मुरिति ख॰ ङ॰ पुस्तकान्तरेषु ।

(६) बृहस्पतेरिति ख॰ ङ॰ पुस्तकान्तरेषु ।

(७) त्रितस्यैतमिति क॰ घ॰ च॰ ।

(८) द्यावापृथिव्योरीळे चेत्याग्नेयः इति ङ॰ पुस्तकान्तरेषु ।

इमा रौद्रं तत(१) सौम्यं चित्र पश्चाश्विनान्यत ॥१३८॥
नासत्याभ्यामिति त्वन्ये अर्धर्चं तु स्वप्ननाशिनी(२) ।
ऐन्द्र(३)वैश्वदेवश्च सोमसे पृथुरुत्तरे ॥१३९॥
अयिर्दानस्य(४) भाव्यस्य(क) प्रातरित्यत्र शंसति ।
कक्षीवता(ख) विदित्वेति(५) यदैन्द्रमुपदिश्यते ॥१४०॥
पराच वैश्वदेव(६) तत् प्रदिष्टं स्वरसामसु ।
अधिगम्य गुरोर्विद्या गच्छन् स्वनिलयं प्रति ॥१४१॥
कक्षीवानध्वनि श्रान्तः सुष्वापारण्यगोचरः ।
तं राजा स्वनयो नाम भावयव्यसुतो(७)व्रजन् ॥१४२॥
क्रीडार्थं सानुगोऽपश्यत् सभार्यः सपुरोहितः ।
अथैनं रूपसम्पन्नं दृष्ट्वा देवसुतोपमम् ॥१४३॥
कन्यादाने मतिं चक्रे वर्णगोत्राविरोधतः ।
सम्बोध्यैनं स पप्रच्छ वर्णगोत्रादिकं तदा ॥१४४॥
राजन्नाङ्गिरसोऽस्मीति कुमारः प्रत्युवाच तम् ।

(१) परमिति क॰ घ॰ च॰ ।
(२) त्वन्येत्वा तु सप्तनाशिनीति क॰ ग॰ घ॰ च॰ ।
(३) ऐन्द्रवदिति ख॰, ऐन्द्र चेति च॰ ।
(४) लिति घ॰ ।
(५) कक्षीवत ऋदित्यानीति क॰ ग॰ घ॰ च॰ ।
(६) परोक्ष वैश्वदेव इति ख॰ ।
(७) भावयव्यसुत इति ग॰ ।

(क) ऋ॰ २ १२६ १ । (ख) ऋ॰ १ ११० ६ ।

पुत्त्रोऽहं दीर्घतमस औचथ्यस्य[क] इत्यपेनृप[१] ॥१४५॥
अथास्मै स ददौ कन्याः[२] दिव्याभरणभूषिताम्[३]।
तावतश्च रथानश्वान् वीडङ्गान् वै[४] चतुर्युजः ॥१४६॥
वधूनां वाहनार्थाय धनकुप्य[५]मजाविकम् ॥
निष्काणां वृषभाणाञ्च[६] शतं शतमदात्पुनः ॥१४७॥
गवां सहस्रं षष्टीश्च सर्व्वाः खल्वरिधायसः[७][ख]।
शतमश्वाञ्च्छतं निष्कान्वधान् दशवधूमतः ॥१४८॥
चतुर्युजो गवाश्चैव सहस्रं षष्ठ्यधिकम्[८]।
स्वनयाद्भावयव्याद्यः कक्षीवान् प्रत्यपद्यत ॥१४९॥
प्रतिगृह्य च तुष्टाव मातः[९] पित्रे शशंस च ॥
एतदुत्तरसूक्तेन शतमित्यादिनोदितम्[१०] ॥१५०॥

---

(१) राजन्नाङ्गीरसोऽस्मीत्यादि औचथ्यस्य ऋषेर्नृपेत्यन्तपाठः ड० चिह्नितपुस्तके न दृश्यते।
(२) कन्याः इति ड०।
(३) दशभारसमन्विता इति ड०।
(४) रथांश्चास्य दीधिनोऽश्वैरिति ड०।
(५) धनं कुप्यमिति ड०।
(६) निष्काणां शतमश्वानामिति ड०।
(७) गवां सहस्रमिति श्लोकार्द्धं ड० चिह्नितपुस्तके न विद्यते।
(८) षष्ट्युपाधिकमिति ड०।
(९) ततः इति ड०।
(१०) ड० चिह्नितपुस्तके, एतदुत्तरसूक्तेनेति श्लोकार्द्धस्थले, एतस्मादुत्तरे सूक्ते शतमित्यादि चोच्यते इति पाठोऽस्ति, शतमश्व स्वर्णं निष्कानिति श्लोकार्द्धात्प्राक् पठितश्च।

---

(क) ऋ० १, १५८, १। (ख) ऋ० १, १२६, ५।

फलप्रदर्शनं तस्य क्रियते प्रायशस्त्विह ।
द्वितीयान्तु पितापश्यत्सुगु[क]रित्यादिकास्त्वचम् ॥१५१॥
कक्षीवतं[१] सर्व्वमिति भगवानाह शौनकः ।
एषा तु दैर्घतमसी सानुलिङ्गा कथं भवेत् ॥१५२॥
उच्यथे प्रातरि[ख]सूक्ते सूनोर्दानेन हर्षितः ।
राजाश्वाश्विमाहाय सुगुरित्यादिना किल[२] ॥१५३॥
कर्म्माणि याभिः कथितानि राज्ञां[३]
दानानि चोच्चावचमध्यमानि ।
नाराशंसी[ग]रित्यृचस्ताः प्रतीया-
याभिः स्तुतिर्दानवतीषु राज्ञां[४] ॥१५४॥
मज्ञामन्दान् भावयव्यस्य गीता
जायापत्योर्द्वौ ऋचौ सम्प्रवादः[५] ।

---

(१) काक्षीवतमिति पाठ समीचीनः ।
(२) अधिगम्य गुरोर्विद्यामित्यादि सुगुरित्यादिना किलेत्यन्तपाठः क० घ० च० चिह्नितपुस्तकेषु न विद्यते । फलप्रदर्शनं तस्येत्यादि सुगुरित्यादिना किलेत्यन्तपाठोऽपि ख० ङ० चिह्नितपुस्तकयोर्न दृश्यते ।
(३) कर्म्माणि यावन्ति कृतानि राज्ञेति ङ० ।
(४) प्रतीयात् स्तुती दृष्टा याश्च वरिष्ठराज्ञामिति ङ० पुस्तकान्तरञ्च ।
(५) सम्प्रवादो दृचेनेति क० घ० च० ॥

---

(क) ऋ० १, १२५, १ । (ख) ऋ० १, २, ४ । (ग) १०, ८५, ६ ।

सम्वादं रोमशये(क)न्द्रराज्ञो-
रेते तृचौ(१)मन्यते शाकपूणिः ॥१५५॥
इन्द्रेण जायापत्योश्चेतिहासं
(२)तृचेऽस्मिन्मन्यते शाकटायनः ।
प्रादात्सुतां(३) रोमशां नाम नाम्ना
बृहस्पतिर्भावयव्याय राज्ञे ॥१५६॥

इति बृहद्देवतायां तृतीयोऽध्यायः ॥

---

(१) सम्वादमस्यास्त्व चैव ताभ्यामेते तृचौ इति ख॰ ङ॰ पुस्तकान्तरञ्च ।
(२) द्वृचे इति ग॰ ।
(३) स तामिति ख॰ ङ॰ ।

---

(क) ऋ॰ १, १२६, ७ ।

फलप्रदर्शनं तस्य क्रियते प्रायशस्त्विह।
द्वितीयान्तु पितापश्चस्तुग[क]रित्यादिकामृचम् ॥१५१॥
कचीवतं[1] सर्व्वमिति भगवानाह शौनकः।
यथा तु दैर्घतमसी सानुलिङ्गा कथं भवेत् ॥१५२॥
उच्चर्वे प्रातरि[ख]सूक्ते सूनोर्दानेन हर्षितः।
राजश्चाभिषमाश्राय सुगुरित्यादिना किल[2] ॥१५३॥
कर्माणि याभिः कथितानि राज्ञां[3]
दानानि चोच्चावचमध्यमानि।
नाराशंसी[ग]रित्यृचस्ताः प्रतीया-
द्याभिः स्तुतिर्दानवतीषु राज्ञां[4] ॥१५४॥
पञ्चामन्दान् भावयव्यस्य गीता
जायापत्योर्द्वौ ऋचौ सम्वादः[5]।

---

(१) काचीवतमिति पाठ समीचीनः।
(२) अधिगम्य गुरोर्विद्यामित्यादि सुगुरित्यादिना किलेत्यन्तपाठ क॰ घ॰ च॰ चिह्नितपुस्तकेषु न विद्यते। फलप्रदर्शन तस्येत्यादि सुगुरित्यादिना किलेत्यन्तपाठोऽपि ख॰ ङ॰ चिह्नितपुस्तकयोर्न दृश्यते।
(३) कर्म्माणि यावन्ति कृतानि राज्ञेति ङ॰।
(४) प्रतीयात् स्तुती दृष्टा यासु नरिष्टराज्ञामिति ङ॰ पुस्तकान्तरच।
(५) सम्वादो द्वेनेति क॰ घ॰ च॰।

---

(क) ऋ॰ १, १२५, १। (ख) ऋ॰ १, १, ४। (ग) १, ०, ५, ६।

अथाग्नेये अग्निमित्युत्तरे य-
त्पञ्चेन्द्राणि प्रत[क]दैन्द्र्यृगत्र[१] ।
युवन्त[ख]मिन्द्रापर्वतौ[ग] सह स्तुता-
विन्द्रन्तु मेने यास्क एकं प्रधानं[२] ॥४॥
स्तूयेतर्चुं पर्वतो विद्धि वज्रो[३]
दिवस्तुतौ चेन्द्रमाह[४] प्रधानं ।
आलावंयोरथ पञ्चेन्द्रवाय्वो[५]रेका
वायोरुत्तर द्विप्रधानं ॥५॥
तत्र पञ्चवरुण मित्रदेवा
दिवादिभ्य[६] कथिताभ्यः परे द्वे
द्वे द्वे पदे संस्तुते[७] रोदसी च
देवाश्वार्धर्चेन विभक्तमन्यत् ॥६॥

---

(१) अग्निमाग्नेये अत उत्तराणि पञ्चेन्द्राणि प्रतदैन्द्र्यृगेकति ङ० पुस्तकान्तरघ ।
(२) विन्द्रन्तु मेन इह यास्क प्रधानमिति क० घ० च० ।
(३) स्तुत्युक्त पर्वतद्धि यम्न इति क० घ० च० ।
(४) चन्द्रमाऽऽहरिति क० घ० च० ।
(५) आलागवपञ्चेन्द्रवाय्वोरिति क० घ० च०, आलावायोरथ पञ्चेन्द्रवाय्वोरिति ग० ।
(६) दिभ्य आद्या इति ङ० ।
(७) द्वे वापरे संस्तुताविति ङ० ।

---

(क) ऋ० ८, १३, २० । (ख) ऋ० ८, ७१, ४ । (ग) ऋ० ३, ५३, १ ।

## अथ चतुर्थोऽध्यायः ।

ततस्त(१)मर्थं हरिवान्(क) विदित्वा
प्रियं सखायं स्वनयं दिदृक्षुः ।
अभ्याजगामाशु शचीसहायः
सौत्यार्चयत्तं(२) विधिनैव(३) राजा ॥ १ ॥
अभ्याजगामाङ्गिरसौ च तत्र
दृष्ट्वा(४) तयोः सा चरणौ च वन्दे ।
इन्द्रः समित्वाद्य तामुवाच
रोमाणि ते सन्ति न सन्ति राज्ञि ॥ २ ॥
सा प्राञ्जभावादथ तां जगाद
अपोपमे शक्र पराङ्मुखेति ।
तां पूर्वयत्रोय नृपः सखायां-
दन्यमजस्रोऽथ पतिं तु प्राऽब्रवीत्(५) ॥ ३ ॥

---

(१) तत्पर्वमिति स० प० पुस्तकान्तरे च ।
(२) सम्यचिंतं तमिति स० ।
(३) सम्यचिंतोऽग्नौ विधिना चेति प० पुस्तकान्तरे च ।
(४) दृष्ट्वेति स० प० पुस्तकान्तरे च ।
(५) तां पूर्वदा सान्त्वनया प्रपृच्छ्यैवाच सत्रमाप पतिं पतिव्रतेति स०
प० च० ।

---

(क) ऋ० १, ८१, ३ ।